CC-0. In Public Domain. Digitization by eGangotri

Bop-2

श्रीहरिकृष्णनिबन्धमणिमालायाः
षष्ठो (६) मणिः ।

फक्किकारत्नमञ्जूषा

सिद्धान्तकौमुदीस्थपङ्क्तिव्याख्यानरूपा ।

(कारकादिकृदन्तान्तो द्वितीयो भागः)

प्रकाशकः—
श्रीहरिकृष्णनिबन्धभवनम्
बनारस-सिटी ।

(सर्वाधिकारः प्रकाशकाधीनः)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीगोकुलेश्वरप्रीत्यै तदीयजननोत्सवे ।
श्रीहरिकृष्णदासेन सदानन्दाभिलाषिणा ॥
विक्रमीय-युगवसुनवेन्दुमितशरदि सुतारे
स्थापितमिह शुभसहसि शुक्ल इनतिथिगुरुवारे ।
श्रीहरिकृष्णनिबन्धभवनमिति मणिमालाभा
ग्रन्थनाय बुधजनविनोदमतिमङ्गलदाया: ॥

पाणिनीयव्याकरणे वादरत्नम्—

[न्यायव्याकरणाचार्य मीमांसकशिरोमणिना श्रीसूर्यनारायणशुक्लेनविरचितम्]।

इस ग्रन्थ के प्रथमभाग मे न्यास प्रकरण तथा द्वितीय भाग में परिष्कार प्रकरण है। न्यास-परिष्कार का इतना उत्तम ग्रन्थ आज पर्यन्त छपा ही नहीं। इन दोनों भागों को संग्रह करलेने से फिर न्यासरत्नावली, न्यायकौमुदी, पाणिनीतन्त्रक्षोदपत्र, शिशुतोषणी, भावकुतूहल, शास्त्रार्थरत्नावली इत्यादि किसी ग्रन्थ के संग्रह करने की आवश्यकता न होगी।

मूल्य प्रथम भाग १॥) द्वितीयभाग १।) (तृतीय परिशिष्टभाग छपता है)।

फक्किकासरलार्थः

व्याकरणाचार्य पण्डितरामचरित्रत्रिवेदिः विरचितः ।

संस्कृत प्रेमी विद्यार्थियों को मालुम होवे कि आप लोगोंने फक्किका की अनेक प्रकाशित पुस्तकें देखी सुनी होंगी। परन्तु हमने आप लोगों के हित के लिए अत्यन्त उपयोगी परीक्षोपयोगी फक्किकासरलार्थः नाम की पुस्तक बनवाई है। यह पुस्तक ऐसी उत्तम परीक्षा की रीति से लिखी गई है कि जीससे विद्यार्थियों की समस्त कठिनाई दूर होगई हैं प्रत्येक मध्यम परीक्षार्थी को इस पुस्तक की एक एक प्रति खरीद कर लाभ उठाना चाहिए। मूल्य भी लागत मात्र चारो खण्ड की संपूर्ण पुस्तक का ॥) आठ आना मात्र है

प्राप्तिस्थानम्—श्रीहरिकृष्णनिबन्धभवनम्, बनारस सिटी

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

S'RĪ HARIKRIṢṆA NIBANDHA MAṆI MĀLĀ

NO. 6.

THE

PHAKKIKĀRATNA MANJŪS'Ā

(COMMENTARY ON THE PANKTĪ OF SĪDDHĀNTA KAUMŪDĪ)

By

VYĀKARANA KĀVYATĪRTHA

MAITHIL PANDIT S'RI KANAKALAL S'ARMA

(Part II)

PUBLISHED BY

S'ri Hari Krishna Nibandha Bhawan

BENARES.

1936.

MEHARCHAND LACHHAMANDAS SANSKRIT BOOK DEPOT

[ALL RIGHTS RESERVED BY THE PUBLISHER]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शास्त्रार्थ के लिये अपूर्व ग्रन्थ–

कौमुदीकल्पलतिका

रचयिता–

परिष्कारदर्पण इत्यादि अनेक ग्रन्थों के निर्माणकर्त्ताऽशुकवि
वैयाकरणशिरोमणि प्रसिद्धशास्त्रार्थी जौनपुर बदलापुरनिवासी–
शुक्ल श्रीवेणीमाधवशास्त्री जी।

आदरणीय विद्वज्जन एवं विद्यार्थिगण ?

आप महानुभावों की सेवा में यह सूचित करते हुए बड़ा ही हर्ष हो रहा है कि आज तक पाणिनीयव्याकरण के पठन पाठन में अप्रसिद्ध तथा अप्रचलित एवं अकल्पित जितनी कोटियां थीं वह सब प्रकाशित हो गईं। विशेषतः सिद्धान्तकौमुदी के प्रतीकों पर विचित्र कल्पनायें, पंक्तियों के विशिष्टव्याख्यानपूर्वक अपूर्वखण्डन, नये २ अद्भुत सूत्रों के न्यास, सूत्रों के विलक्षण तथा अतिसुगमरीति के शाब्दबोधप्रकारों ने इस ग्रन्थ की शोभा को क्या ही मनोहर किया है जो देखने से ही विदित हो सकती है। और भी विशेष बात तो यह है कि ग्रन्थकार के पुत्र श्री राजनारायणशुक्ल शास्त्री जी ने इस ग्रन्थ की टिप्पणी में मूलशेष प्रक्रिया परिष्कार आदि का यथोचित लेख करते हुये छात्रों को परीक्षा में उत्तीर्ण होने के लिये अतिसरल तथा संक्षिप्तपङ्क्तियों का व्याख्यान भी किया है। इस ग्रन्थ से यह आशा पाई जाती है कि इस के द्वारा सँस्कृतसाहित्य का जितना बड़ा उपकार हुआ वैसा अन्य प्रकाशित पुस्तकों से नहीं। केवल इसी एक ग्रन्थ के पास में रखने से सिद्धान्तकौमुदी के ऊपर अब तक छपे हुये फक्किकादि-ग्रन्थों की आवश्यकता ही न पड़ेगी। इस रीति से इतना उत्तम होते हुये भी स्वरवैदिकप्रकरणान्त इस ग्रन्थ का मूल्य केवल १॥) रक्खा गया है। आशा है कि संस्कृतानुरागी सज्जन इस ग्रन्थ से अतिशीघ्र लाभ उठावेंगे। अन्यथा सम्भवतः द्वितीयसँस्करण की प्रतीक्षा करनी पड़ेगी।

प्राप्तिस्थानम्–श्रीहरिकृष्णनिबन्धभवनम्, बनारस सिटी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीहरिकृष्णनिबन्धमणिमालायाः

षष्ठो (६) मणिः ।

फक्किकारत्नमञ्जूषा

सिद्धान्तकौमुदीस्थपङ्क्तिव्याख्यानरूपा ।

मुद्गलपुर (मुङ्गेर) मण्डलान्तर्गत महमदाग्रामवास्तव्येन गणपति-
ठक्कुरात्मजैकनाथठक्कुरात्मजेन व्याकरणकाव्यतीर्थेन ठक्कुरोपनामक
पण्डितश्रीकनकलालशर्मणा मैथिलेन रचिता ।

(कारकादिकृदन्तान्तो द्वितीयो भागः ।)

प्रकाशकः—

श्रीहरिकृष्णनिबन्धभवनम्,

बनारस सिटी ।

१९०३

राजशासनानुसारेण सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परिष्कारदर्पण

(परिष्कारों का विचित्रग्रन्थ शास्त्रार्थकलासहित)

आप महानुभावों की सेवा में निवेदन करते हुए अत्यन्त हर्ष होता है कि जिस परिष्कारदर्पणनामक ग्रन्थ के लिये विद्वज्जन बहुत दिनों से आकाङ्क्षित थे वह प्रकाशित हो गया। इस ग्रन्थ में ३ प्रकरण हैं। जिसमें प्रथम प्रकरण पारिभाषिक (अवच्छेदकत्व अवच्छेद्यत्व निरूपितत्व निरूपकत्त्व सम्बन्धावच्छिन्नत्त्व आदि) शब्दों के लक्षण उदाहरण समन्वय दोषादिवारणपूर्वक दिखाये हैं। द्वितीयप्रकरण व्याकरण के परिष्कारों तथा पाणिनीय सूत्रों के शाब्दबोधों का है उसमें शेखरादि सहायक प्रायः सभी स्थलों का परिष्कारविवरण परीक्षोपयोगी तथा अध्ययनाध्यापनादि का महोपकारक है। इस ग्रन्थ के बनानेवाले जौनपुर बदलापुर निवासी घटिकाशतकशतावधानाशुकविकौमुदीकल्पलतिकाद्यनेकग्रन्थकार वैयाकरणशिरोमणि प्रसिद्ध शास्त्रार्थी पण्डितप्रवर शुक्लश्रीवेणीमाधवशास्त्री जी हैं। शास्त्री जी का अतुलनीय श्रम तथा इनकी विचित्र परिष्कारशैली एवं कल्पनायें ग्रन्थ के देखने से ही आप को अनुभूत होंगी। ग्रन्थकार के पुत्र श्रीराजनारायणशुक्लशास्त्री जी ने इस ग्रन्थ की भी टिप्पणी वैसी ही विचित्र की है जैसी आप लोग कौमुदीकल्पलतिका में देख चुके होंगे। इस ग्रन्थ को पास में रखने से पूर्ण विश्वास है कि परिष्कारों का बनाना समझना तथा उनके द्वारा परीक्षा में उत्तीर्ण होना अतीव सरल है। शास्त्री—आचार्य परीक्षाओं का अत्यन्त उपकारक है। तृतीयप्रकरण इस ग्रन्थ का शास्त्रार्थकला नाम से है। जिसमें परिभाषेन्दुशेखर की परीक्षोपयोगिपरिभाषाओं का ज्ञापक परिष्कारादि दिखलाते हुये अन्त में विचित्र कल्पनाओं द्वारा शेखर ही का खण्डन कर दिया गया है। उपरोक्तविषयों से यह ग्रन्थ अत्यन्त उपादेय हो गया है। इतना होते हुये भी इसका मूल्य स्वल्प ही १=) अट्ठारह आना मात्र रक्खा है। अधिक क्या प्रशंसा करें यदि इसके लिये अतिशीघ्र आर्डर न दिये तो इसके आधुनिकलक्षणों से प्रतीत होता है कि द्वितीयसंस्करण की प्रतीक्षा करनी पड़ेगी।

प्राप्तिस्थानम्—श्रीहरिकृष्णनिबन्धभवनम्, बनारस सिटी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

फक्किकारत्नमञ्जूषाया द्वितीयभागस्य विषयानुक्रमणिका ।

विषयः	पृ०	पं०
(प्रथमा)		
प्रातिपदिकार्थेति	१	१०
नियतोपस्थितिकः प्राति०	२	४
लिङ्गमात्र इति ।	२	२१
अलिङ्गा नियतलिङ्गाश्चे०	३	९
परिमाणमात्रे द्रोणो	३	१४
वचनं संख्येति ।	३	३३
नागेशास्तु	४	१८
(द्वितीया)		
कारके	५	३
कर्तुरीप्सिततमं कर्म	५	२४
कर्तुः किम् । माषेष्वश्वं	६	४
तमब्ग्रहणं किं पयसा०	६	२४
कर्मेत्यनुवृत्ताविति ।	८	१५
अनभिहिते	८	२५
अनभिहिते तु प्रातिपदि०	९	१६
अभिधानं तु प्रायेण०	९	२२
अथमूलोक्तपरिगणनो०	१०	४
नागेशास्तु	१०	२५
क्वचिन्निपातेनाभिधानं	११	२७
तथा युक्तंचानीप्सितम्	१२	१२
अकथितञ्च	१२	३१
दुह्याजिति	१३	२०
गां दोग्धि पय इति	१३	३३
बलिं याचते वसुधाम् ।	१४	७
अविनीतं विनयं याचते	१४	१५
तण्डुलानोदनं पचति	१४	१८
गर्गान् शतं दण्डयति	१४	२२
व्रजमवरुणद्धि गाम्	१४	२७
माणवकं पन्थानं०	१४	३२
वृक्षमवचिनोति	१५	४
माणवकं धर्मं ब्रूते	१५	८
माणवकं धर्मं शास्ति	१५	१३
शतं जयति देवदत्तम्	१५	१९
सुधां क्षीरनिधिं मथ्नाति	१५	२१
देवदत्तं शतं मुष्णाति	१५	२३
ग्राममजां नयति हरति०	१५	२५
अर्थनिबन्धनेयं संज्ञा	१५	३०
अकर्मकधातुभिर्योगे	१६	८
गतिबुद्धिप्रत्यवसानार्थेति	१६	३६
अण्यन्तानां किमिति ।	१७	१४
नियन्तृकर्तृकस्येति	१७	१८
सूत्रे ज्ञानसामान्यार्थो०	१७	२५
शब्दायतेर्नेति ।	१७	३२
येषां देशकालादिभिन्न	१८	६
परिक्रयणे सम्प्रदानमि०	१८	२२
अभुक्तर्थस्य नेति ।	१९	२
उभसर्वतसाविति ।	१९	५
जपमनुप्रावर्षत् ।	१९	१७
परापि हेताविति०	११	२३
नदीमन्ववसितेति	१९	३१
अपिः पदार्थेति	१९	३३
कालाध्वनोः	२०	१७
(तृतीया)		
स्वतन्त्रः कर्ता	२०	२४
साधकतमं करणम्	२१	२
तमब्ग्रहणं किं गङ्गायां	२१	१०
रामेण बाणेन हतो वाली	२१	१९
प्रकृत्यादिभ्य उपसंख्या	२१	२२
दिवः कर्म च	२१	२८
अपवर्गे तृतीया	२२	१०
सहयुक्तेऽप्रधाने	२२	१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयः	पृ०	पं०
येनाङ्गविकारः	२२	३३
इत्थम्भूतलक्षणे	२३	१०
द्रव्यादिसाधारणमिति	२४	२
गम्यमानापि क्रियेत्यादि	२४	१०
अशिष्टव्यवहारे	२४	१५
(चतुर्थी)		
कर्मणा यमभिप्रैति०	२४	२१
कर्मणेतिकिम् ।	२५	२
यसंग्रहणं किमिति	२५	९
क्रियया यमभिप्रैति०	२५	१७
अन्यकर्तृकोऽभिलाषो०	२५	३२
प्रीयमाणः किम्	२६	६
श्लाघन्हुङ्स्थाशपां	२६	११
धारेरुत्तमर्णः	२६	२५
स्पृहेरीप्सितः	२७	६
क्रुधद्रुहेर्ष्याऽसूयार्थानां	२७	१५
तादर्थ्ये चतुर्थी	२७	२७
क्लृपि सम्पद्यमाने च	२७	३२
क्रियार्थोपपदस्य च	२८	२
उपपदविभक्तेरिति	२८	१२
मन्यकर्मण्यनादरे	२८	२५
(पञ्चमी)		
ध्रुवमपायेऽपादानम्	२८	३४
जुगुप्सा विरामेति	३०	१३
भीत्रार्थानां भयहेतुः	३०	१९
वारणार्थानामीप्सितः	३०	३१
अन्तर्द्धौ येनादर्शनमि०	३१	८
अन्यारादिति	३१	२२
अञ्चूत्तरपदस्येति	३१	२९
प्रभृतियोगे पञ्चमीति	३१	३०
अपपरिबहिरिति	३२	८
अन्यतरस्यां ग्रहणं सं०	३२	१५
(षष्ठी)		
षष्ठी शेषे	३२	२९
रुजार्थानामिति	३३	२
हिंसायां किम् । धानापे०	३३	५
शतस्य दीव्यतीति	३३	११
शेषे किं द्विरहन्यध्ययनम्	३३	१५
कर्तृकर्मणोः कृति	३४	९
उभयप्राप्तौ कर्मणि	३६	२१
स्त्रीप्रत्यययोरकाकारयोः	३६	२५
शेषे विभाषा	३६	२९
चतुर्थी चाशिषि	३६	३२
(सप्तमी)		
आधारोऽधिकरणम्	३७	३
क्तस्येन्विषयस्य	३७	३४
साध्वसाधुप्रयोगे च	३८	७
निमित्तात्कर्मप्रयोगे	३८	११
यस्य च भावेन भाव०	३८	२०
अर्हाणां कर्तृत्वेऽनर्हा०	३८	३२
षष्ठी चानादरे	३९	२
यतश्च निर्धारणम्	३९	७
पञ्चमी विभक्ते	३९	२६
नक्षत्रे च लुपि	३९	३६
सप्तमीपंचम्यौ कारक०	४०	१०
स्वस्वामिभ्यां पर्यायेण०	४०	२०
(समासप्रकरणेऽव्ययीभावे)		
समर्थः पदविधिः	४०	२५
भूतपूर्वे चरडिति निर्द्दे०	४२	४
निपातेनाभिहितेऽप्यधि०	४२	७
आराद्वनादित्यत्र तु ना०	४२	१६
दुर्यवनमिति	४२	२४
निर्मक्षिकमिति	४२	२८
अतिहिममिति	४२	३२
शब्दप्रादुर्भाव इति	४२	३५
अनुविष्णु	४३	२
प्रतिशब्दस्य वीप्साया०	४३	१०
ऋद्धेराधिक्यं समृद्धिः	४३	१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयः	पृ०	पं०
यथाऽसादृश्ये	४३	१६
विभाषा	४४	१६
एतत्सामर्थ्यात्प्राचीना०	४४	२३
(तत्पुरुषसमासे)		
इदं सूत्रं त्युक्तुं शक्यम्	४५	८
समासान्तः प्रयोजनम्	४५	९
द्वितीया श्रितातितपति०	४५	१९
स्वयं क्तेन	४५	२७
खट्वा क्षेपे	४५	३५
तृतीया तत्कृतार्थेन०	४६	१०
पूर्वसदृशसनोनार्थ०	४६	२७
मिश्रग्रहणं सोपसर्गस्या०	४७	९५
कृद्ग्रहणं गतिकारकपूर्व०	४७	१६
बहुलग्रहणं सर्वोपाधि०	४७	२०
कृतेतिकिम्	४७	२९
चतुर्थी तदर्था०	४७	४४
तदर्थेन प्रकृतिविकृति०	४८	७
अश्वघासादयस्तु०	४८	३१
अर्थेन नित्यसमासो०	४८	३४
पञ्चमी भयेन	४९	८
प्रतिपदविधाना षष्ठी न०	४९	१५
यदा प्रकरणादिना दन्ता०	४९	३३
अनित्योऽयं गुणेन०	४९	३५
पूर्वोत्तरसाहचर्येण कृद०	५०	१९
तक्षकस्य सर्पस्य	५१	५
राजपूजितमित्यादौ०	५२	५
पत्यर्थभर्तृशब्दस्य तु०	५२	२०
कथं तर्हि घटानां नि०	५२	३०
पूर्वापराधरोत्तरमेकेति	५३	५
षष्ठीसमासापवाद इति	५३	१२
सर्वोऽप्येकदेशोऽह्ना०	५३	२५
केचित्तु सर्वे एकदेशः	५३	३३
अर्द्धं नपुंसकम्	५३	३७
एकविभक्तावषष्ठ्यन्त०	५४	१६

विषयः	पृ०	पं०
एकदेशिसमासविषय०	५४	२१
द्वितीयतृतीयचतुर्थ०	५४	२६
उपमानानि सामा०	५५	३
इह पूर्वपदन्तत्सदृशे ला०	५५	१९
पूर्वनिपातनियमार्थम्	५५	२६
उपमितं व्याघ्रादिभिः	५५	३०
विशेषणं विशेष्येण व०	५६	२१
युवा खलतिपलितवलि०	५६	२७
लिविशिष्टपरिभाष०	५६	३३
युवत्यामेव जरतीधर्मो०	५७	४
कुमारश्रमणादिभिः	५७	८
अर्थाभावेऽव्ययीभावेन०	५७	१५
तत्रोपपदं सप्तमीस्थम्	५८	३२
उपपदमतिङ्	६०	१९
अतिङ् किम् माभवान्०	६१	२०
व्याघ्रीति	६२	४
अश्वक्रीतीति	६२	११
अह्नष्ठखोरेव	६२	२२
त्रियामदन्तत्वद्वाविति०	६३	२
दीर्घाह्नी प्रावृडिति	६३	१९
ननु लक्षणप्रतिपदो०	६३	२४
आदिति योगविभागात्	६३	३०
जात्यख्यायामित्यादि	६३	३४
सविशेषणस्य प्रतिषेध०	६४	९
अशालाकिम् धर्मसभा०	६४	१६
(बहुव्रीहिसमासे)		
शेषो बहुव्रीहिः	६४	२६
अनेकमन्यपदार्थे	६५	६
अप्रथाविभक्त्यर्थे०	६५	११
समानाधिकरणानामि०	६५	१४
प्रादिभ्यो धातुजस्येति	६५	१९
नञोऽस्त्यर्थानामिति	६५	२१
वृद्धिनिमित्तस्य च०	६६	१५
पूर्वपदात्संज्ञायामगः	६७	५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयः	पृ०	पं०
उपसर्गाद्बहुलम्	६७	११
कथंतर्हि विंनसा हतवो०	६७	१८
इनः स्त्रियाम् ।	६७	२१
(द्वन्द्वसमासे)		
चार्थेद्वन्द्वः	६७	२५
मिलितानामन्वय इति	६८	१४
समाहारस्यैकत्वादेक०	६८	३४
विभाषावृक्ष इति सूत्र०	६९	६
हस्त्यश्वादिषु सेनाङ्ग०	६९	५
मृगाणां मृगैरेवेत्यादि	६९	१०
अश्ववडवग्रहणं तु०	६९	११
वैकल्पिकः । समाहार०	६९	१७
विप्रतिषिद्धं किमिति	६७	१९
पुत्रेऽन्यतरस्यामित्यत०	६९	२८
पुनर्द्वन्द्वग्रहणं प्रसिद्ध०	६९	३३
अर्थैकशेष इति	७०	२
वृद्धो यूना तल्लक्षण०	७०	९
नपुंसकमनपुंसकेनैक०	७०	२३
श्वशुरः श्वश्रवा	७१	४
त्यदादीनि सर्वैर्नित्यम्	७१	१२
[सर्वसमासशेषप्रकरणे]		
कृत्तद्धितसमासैकशेष०	७१	१७
सुपां सुपा तिङा नाम्नेति	७२	११
[समासान्तप्रकरणे]		
ऋक्पूरब्धूरिति	७२	२८
कृष्णोदक्पाण्डुसंख्या०	७२	२८
[अलुक्समासप्रकरणे]		
अलुगुत्तरपदे	७२	३४
पूरण इति वक्तव्यम्	७२	३८
चतुर्थीतियोगविभागात्०	७३	६
गवियुधिस्थिरः	७६	८
[समासाश्रये]		
घरूपकल्पचेलडब्रुव०	७३	१६
हृदयस्य हृल्लेखेति	७३	२५

विषयः	पृ०	पं०
इकोह्रस्वोऽङ्यो०	७३	२९
सम्प्रसारणस्य	७३	३२
स्त्रीप्रत्यये चानुपसर्जे०	७४	११
समाननस्य छन्दस्य०	७४	२७
तेषां कृतदीर्घाणां०	७४	३५
अग्रे शब्दस्य तु०	७५	६
प्रातिपादिकार्थमात्र०	७५	१४
कर्मणि ल्युडिति	७५	१६
ननु माषान्वपतस्त०	७५	१९
उत्तरपदं यत्प्रातिपदिकं०	७५	२७
पदव्यवायेऽपि	७६	५
विष्किरः शकुनौ वा	७६	१९
[तद्धितप्रकरणेऽपत्याधिकारे]		
समर्थानां प्रथमाद्वा	७६	२८
तस्यापत्यम्	७७	६
आदिवृद्धिरन्त्योपधावृद्धी	७७	११
तस्येदमित्यपत्येऽपीति०	७७	३२
कृतसन्धेः किम्	७८	९
प्रथमात्किमिति	७८	१७
दैवयज्ञि इति सूत्रादन्य	७८	३०
अपत्यं पौत्रप्रभृति गोत्रम्	७८	३१
गोत्रे स्वैकोनसंख्यानाम्	७९	१०
यद्वा स्वद्व्यूनसंख्येभ्योऽनि	७९	१७
नियमार्थमिदं सूत्रमिति	८०	४
[ताद्धिते चातुरर्थिकप्रकरणे]		
सिद्धे यस्येति लोपेन०	८०	२१
समन्ताद्वेष्टितः परिवृत०	८०	२६
मत्वर्थीयेनैव सिद्धे०	८०	३१
कौमारापूर्ववचने	८०	३२
अपूर्वत्वे निपातनमिति	८१	२
इसुसुक्तान्तात्कः	८१	४
इसुसोः प्रतिपदोक्तयोर्ग्रहं०	८१	११
मतोश्च बव्हजङ्गात्	८१	१६
लुग्ग्रहणं सर्वलोपार्थम्	८१	२१

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयः	पृ०	पं०
[तिङन्ते स्वादिप्रकरणे]		
श्रौत्राहन्तीत्यादि०	८२	११
अर्हर्दिवमिति	८२	२०
तोष्टूय्यमान इति	८२	२१
विजयतेतरामिति	८३	३
वर्तमाने लट्	८३	१९
लःकर्मणि च भावे	८४	२
भू सत्तायाम्	८५	१२
अतोदीर्घोयञि	८५	१६
परोक्षे लिट्	८६	४
नित्यत्वाद्वुक०	८६	१७
भवतेरः	८६	२४
अनद्यतने लुट्	८७	८
येन नाव्यवधानं ते०	८७	१३
अनेकाल्वत्वात्सर्वादेशः	८७	२७
प्रवर्तनायां लिङिति	८७	२८
ङित्वोच्चेर्ज्ञायते	८८	२
सुटा यासुड् न वाध्यते	८८	९
सकारद्वयस्यापि निवृ०	८८	२५
सार्वधातुके किमिति	८८	२९
इहोपसर्गाणामसमस्त०	८९	३
आमो मकारस्य नेत्व०	८९	९
ननु कृञ्चानुप्रयुज्यत०	८९	१४
प्रत्यये किमिति	८९	२३
एकाच उपदेशेनुऽदात्ता०	८९	३२
एकाचःकिमिति	९०	३
नन्वनयोः पूलयोः कटं	९०	१५
आदेशश्चेहेति	९०	२३
सनिपातपरिभाषया	९०	३१
इह सवर्णदीर्घस्येति	९१	५
क्रादीनां चतुर्णां ग्रहणम्	९१	१८
संज्ञायाः कार्यकालत्वात्०	९२	३
ईट किटकटीत्यत्रेति	९२	२०
पुनः प्रसङ्गविज्ञानात्पी०	९३	७
विघटयतीति	९३	११
हलादिः शेषापाद इति	९३	१९
केचिद्घटादौ	९३	२५
श्रापाके श्रै इति कृता०	९३	३१
निशानं चाक्षुषज्ञानमिति	९४	८
कथं तर्हि प्रज्वालयति०	९४	१५
कथं संक्रामयतीति	९४	१९
कथं तर्हि निशामय०	९४	२७
परमपि हलादिः शेषं०	९५	२८
[अदादिप्रकरणे]		
ऋतेरीयङ्	९६	३
गमहनेत्युपधालोपस्तस्य	९६	१०
आभीयतया जस्याऽसि०	९६	१३
वधादेशोऽदन्त इति	९६	१६
अयं दर्शनेऽपीति	९६	१९
ङकारस्त्विति	९६	२४
अत्र भाष्ये खशादिरय०	९६	२७
योगविभागो वैचित्र्यार्थः	९६	३४
आङ्पूर्वत्वं प्रायिकमिति	९७	७
इह उतो वृद्धिर्नेति	९७	१२
नुशब्दस्य द्वित्वमिति	९७	१६
पूर्वत्रासिद्धीयमद्वित्वे०	९७	२१
उभयत आश्रयणे ना०	९७	२९
आत्थेत्यत्र झलीतिथत्व०	९८	८
ङिच्चपिन्नेत्यपित्वादि०	९८	२१
लावस्थायामिति	९८	२६
गुणायादेशयोः कृतयो०	९८	२८
अडागमे सत्यनेकाच्त्वा०	९८	२३
तनादित्वादेव सिद्धे इति	९८	३२
ख्याधातुः सार्वधातुक०	९९	२
चर्करीतं चेति	९९	१०
[जुहोत्यादिप्रकरणे]		
वचनसामर्थ्यादालोपस्य न०	९९	१६
ओविजीत्यस्यैव तत्र प्र०	९९	२१
ऐय इति	९९	२३
ननु सूधातेर्लिटि	९९	३०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयः	पृ०	पं०
[दिवादिप्रकरणे]		
ज्ञाजनोर्जा	१००	२
पुषाद्यङ्पवाद इति	१००	७
पुषाद्यङ्पवादो०	१००	९
योगविभागसामर्थ्या०	१००	१३
बभूथाततन्थेति	१००	१८
[स्वादिप्रकरणे]		
श्रन्थिग्रन्थिदम्भिस्व०	१००	२०
इदं कित्वं पिदपिद्धि०	१००	२४
[तुदादिप्रकरणे]		
स्थानषष्ठीनिर्देशा०	१०१	४
कितिरमागमं बाधित्वा	१०१	१२
द्विहल्ग्रहणस्यानेकहल्लुपल०	१०१	१७
म्रियतेर्लुङ्लिङोश्च	१०१	२४
स्पृशमृशेति	१०२	२
अन्तरङ्गत्वादियङिति ।	१०२	७
[रुधादिप्रकरणे]		
जश्त्वं ष्टुत्वमित्यादि०	१०२	१२
तनादिप्रकरणे		
संज्ञापूर्वको विधिरनित्यः	१०२	२१
पूर्वं धातुरित्ति ।	१०२	२५
सम्पूर्वस्य क्वचिदभूषणेऽपि	१०३	५
क्रयादिप्रकरणे		
अवष्टभ्नोति ।	१०३	९
दीर्घनिर्देशसामर्थ्यान्न०	१०३	१२
चुरादिप्रकरणे		
तेषामिह ग्रहणं प्रपञ्चार्थ०	१०३	२०
चिन्तेति पठितव्ये	१०३	२५
एतच्च ज्ञापकं सामान्यापेक्ष०	१०४	८
विशेषापेक्षमिति ।	१०४	१९
यत्तु इदित्करणाद्यन्त्रतीति	१०४	२३
दीर्घोच्चारणं णिचः पाक्षिकत्वे	१०४	२६
इररारामपवाद इति	१०४	२७
अल्लोपस्य स्थानिवत्त्वा०	१०४	३३
ओः पुयणर्जाति	१०५	९
यत्र द्विरुक्ताविति ।	१०५	२३
अदन्तत्वसामर्थ्याण्णिरिव	१०५	२७
परत्वाद्वृद्धौ सत्यां टिलोपः	१०५	३५
वृद्धेर्लोपो वलीयाम्	१०६	९
ण्यन्तप्रक्रियायाम्		
अचीचकासदिति ।	१०६	१४
नचाग्लोपित्वाद्वयोरप्य०	१०६	१८
सम्प्रसारणं तदाश्रयं च०	१०६	२७
वहिरङ्गोऽप्युपधाह्रस्वो०	१०७	२
उपदेशे दकारोपध इत्यादिं०	१०७	११
लि ई इति ईकारप्रश्ले०	१०७	१३
भयग्रहणं धात्वर्थोपल०	१०७	१५
विस्मापयन्विस्मितमा०	१०७	१८
ईर्ष्यतेस्तृतीयस्येतिं	१०७	२७
निवृत्तप्रेषणाद्धातोरिति	१०७	३२
सन्नन्तप्रक्रियायाम्		
कर्मणः किमिति	१०८	८
सनः षत्वस्यासिद्ध०	१०८	१४
कथमुदिर्धुरिंति	१०८	१९
एज्विषयाभावादिति	१०८	२२
हल्ग्रहणं जातिपरमिति	१०८	२९
इह नित्यमपि द्वित्वंगुणे०	१०८	३२
कृतदर्घस्य मिनोतेः	१०९	१८
ननु ऋधाः सनि	१०९	२३
च्छ्वोः शूडिति	१०९	३०
स्थादिष्वभ्यासेनेति	११०	७
यङन्तप्रक्रियायाम् ।		
धातोः किमिति	११०	१३
यस्येति संग्रहणमि०	११०	१६
यकारपरेफस्य न	११०	३०
दीर्घोऽकितः	११०	१९
कौटिल्य एवेति	११०	३४
अकित इत्युक्तेर्न दीर्घः	१११	८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयः	पृ०	पं०
(यङ्लुगन्ते)		
यङोऽचि च	१११	१६
अनैमित्तिकोऽयमन्तरङ्ग०	१११	१९
धातुत्वाल्लडादय इति	१११	२७
ङित्वस्य प्रत्ययाप्रत्यय०	१११	३०
अनुदात्तङित इत्यनुबन्ध	११२	५
अत एवेत्यादि	११२	९
बोभूतुतेतिक्ते	११२	१५
अत एवेति	११२	१८
अभ्यस्ताश्रयो जुसिति	११२	३२
नित्यत्वाद्वुगिति	११३	२
एकाज्ग्रहणेनोक्तत्वान्ने	११३	७
अनुनासिकलोपस्या	११३	९
अनुबन्धनिर्देशान्न श्लेर०	११३	१७
शितपाशपेति निषेधस्त्व०	११३	१९
शितपानिर्देशाज्जादेशोने०	११३	२७
वधादेशस्य द्वित्वं तु०	११३	३१
आङ्पूर्वकात्तु	११४	५
तपरत्वान्न गुण इति	११४	७
उतो वृद्धिरित्यत्र	११४	१२
लुका लुप्ते प्रत्ययल०	११४	१६
ननु अर्तेर्यङ्लुकि	११४	२२
ग्रहो लिटीति दीर्घस्तु	११४	२७
तद्भाष्यविरुद्ध०	११५	९
भाष्ये ध्वनितमिति	११५	१७
[नामधातौ]		
अपदान्तत्वादिति	११५	२८
सन्निपातपरिभाषया	११५	३२
लिङ्गविशिष्टपरिभाषयेति	११६	३
अभिव्यक्तत्वेन धातुपा०	११६	९
पथीनतीति	११६	१३
देवतीति माधव इति	११६	२३
यत्तु स्वामी	११७	२
युद्धे योऽयं ग्रामशब्द	११७	५
औकारीयदिति	११७	२६
अत्राच्वेरित्यनुवृत्त्येति	११७	३४
उष्ठवदित्यदेशादिति	११८	२
दरदनाचष्टे	११८	९
ओः पुयणजीतिसूत्रे	११८	१३
टेरित्यस्यैवेति	११८	२४
शुनयतीति	११८	२९
अन्येतु शुनयतीति	११८	३२
अङ्गवृत्तपरिभाषया	११९	२
विदावयतीत्यन्त इति	११९	४
उदीचयतीति	११९	६
तिरायति	११९	८
असिद्धवदत्रेति	११९	१०
(आत्मनेपदप्रक्रियायाम्)		
कर्तरि कर्मव्यतीहारे	११९	१५
नेर्विशः	११९	२०
हर्षादिष्विति किम्	११९	३१
णेरणाविति	११९	३३
यद्वेति	१२०	६
(परस्मैपदप्रक्रियायाम्)		
ननु अनुपराभ्यां कृञः	१२०	१३
[भावकर्मप्रक्रियायाम्]		
भावनेति	१२०	२७
सामानाधिकरण्याभा०	१२१	१३
तिङ्वाच्यभावनायाः	१२१	१५
औत्सर्गिकत्वेनेति	१२१	१९
आशीर्लिङि	१२२	८
अङ्गस्यैवातिदेशा०	१२२	१३
प्रकृतो मितां ह्रस्व एव	१२२	१७
दीर्घविधौ चि	१२२	१८
णाविति जातिपरो	१२२	२२
कर्मकर्तृप्रक्रियायाम्		
यदा सौकर्येति	१२२	२९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयः	पृ०	पं०
कार्यातिदेशोऽयम्	१२३	३
द्वितीया स्यादिति	१२३	६
ननु पचिभिदोरिति	१२३	१९
तुल्यत्वव्यवहार इति	१२३	२२
कर्मणेति किमिति	१२३	२४
गच्छति ग्राम इत्यादि	१२३	३१
सकर्मकाणां प्रतिषेध०	१२३	३३
अन्योऽन्यं०	१२३	३५
अजा ग्रामं	१२४	६
विध्यर्थमिदमिं०	१२४	१०
कृदन्तप्रकरणे ।		
धातोरिति	१२४	२३
आतृतीयसमाप्तेरिति	१२४	२७
भावे औत्सर्गिकमेकव०	१२५	९
वृत्तिकारस्तु	१२५	१३
विहितविशेषणं किम्	१२५	१९
नुम्ग्रहणमनुस्वारोपल०	१२५	२९
ण्यन्तभादिनामुपसं०	१२५	३३
कृशानः शस्य यो वे०	१२५	३६
अजग्रहणंयक्यम०	१२६	७
जनेर्यद्विधिः स्वार्थः	१२६	१४
नानुबन्धकृतमसा०	१२६	१७
योगविभागोऽप्येवम्	१२६	२२
नुमिकृतेऽङ्गुपधत्वभावा	१२६	२५
यमेर्नियमार्थमिति	१२६	३०
शतेन वर्या मम्य।	१२६	३३
वदः सुपि क्यप् च	१२७	८
कर्मणि प्रत्ययावित्येके	१२७	१४
वृइति वृञोग्रहणं नवृङः	१२७	१५
पुमःक्यवुक्तिः	१२७	१९
इचेति ह्रस्वः	१२७	२३
अथ कथं भार्यावधूरि०	१२८	२
यथोत्तरंमुनीनां	१२८	११
इह लोटावघेत्यारभ्य	१२८	१८
आगमस्य दीर्घत्व	१२८	२२
खशोऽन्यत्र नेष्यत	१२८	२९
ब्रह्मज्य इति	१२८	३५
आह्व इति	१२९	८
अच्वौ किम्	१२९	१२
भव्यावरोधादुपेक्ष्य०	१२९	२०
भाष्यकारवचनात्	१२९	२२
चतुर्विधोऽत्र नियम इति	१२९	३०
भावकर्मणोस्तु	१३०	१०
दृशिग्रहणादभ्यास	१३०	१६
केचिदविहिता	१३०	२०
अर्थग्रहणमस्तिनैव	१३०	१५
पर्यायोपादानम०	१३०	२८
अन्तर्भावित	१३०	३२
किश्राम इतित्व०	१३१	२
कथं प्रभावो राज्ञः	१३१	११
कथं राज्ञो नम इति	१३१	१५

इति विषयानुक्रमणिका समाप्ता ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

फक्किकारत्नमञ्जूषा ।

श्रीशैलराजतनयैकरदाङ्कितांङ्गं मन्दाकिनीसुतरलीकृतसज्जटालिम् ।
वालेन्दुरश्मिपरिशोभितभालदेशं श्रीविश्वनाथमनिशं समुपास्महे तम् ॥१॥
कारुण्यपूर्णहृदयां विधुखण्डभूपां देवीं सुरासुरसमर्चितपादपद्माम् ।
सृष्ट्युद्भवस्थितिलयैकनिदानभूतां दुर्गां श्रिया विलसितां जननीं नमामः ॥२॥
प्रणम्य गुरुपादाब्जं निधाय हृदये च तत् ।
फक्किकारत्नमञ्जूषाऽपरो भागो वितन्यते ॥ ३ ॥

अथ कारकप्रकरणम् ।

"स्वौजसमौडि"ति सूत्रेण विहितानां सुपामर्थविशेषे व्यवस्थाम्प्रदर्शयितुमाह-प्रातिपदिकार्थेति । (१)अस्यापि सूत्रस्य क्रियायोग एव प्रवृत्तिः । (२)अत एव (तिङ्समानाधिकरणे प्रथमे) ति वार्त्तिकं सङ्गच्छते । (३)नचैवं भूतले घट इत्यादौ प्रथमा न स्यात्क्रियायोगाऽभावादिति वाच्यम् । तत्राऽप्यन्ततोऽस्तिक्रियायाः सत्त्वात् । यत्र काचन क्रिया नास्ति; तत्राऽप्यस्तिभवतिविद्यतीनां सत्तेति भाष्योक्तेः । नच त्रयः काला इत्यादौ कल्या अपि क्रियाया असत्त्वादध्याहर्त्तुमशक्यत्वाच्च प्रथमा न स्यात् । न च सन्तीति क्रियामादाय तत्सिद्धिरिति वाच्यम् । कालत्रये वर्त्तमानत्वस्य बाधेनोक्तक्रियाऽध्याहारस्याऽसम्भवादिति वाच्यम् । वर्त्तमानकालवृत्तित्वविशिष्टज्ञाने कालत्रयविषयकत्वस्याऽक्षतत्वेन ज्ञायन्ते इति क्रियाऽध्याहारसम्भवात् । यद्वा, सन्तीत्येवाऽध्याहार्य्यः, प्रारब्धाऽपरिसमाप्तिक्रियाऽऽश्रयत्वस्य वर्त्तमानत्वेन कालत्रयस्य सृष्टिप्रारब्धापरिसमाप्तिक्रियाऽऽश्रयत्वरूपवर्त्तमानकालिकसत्तात्वविशिष्टत्वे बाधकाऽभावात् । आख्यातार्थकर्त्रादिनाऽभेदान्वयेन प्रथमान्तार्थस्य क्रियायोगो बोध्यः । एवञ्च प्रथमान्तार्थस्याऽपि क्रियाजनकत्वात् (४)अस्याः (५)कारकविभक्तित्वेन भाष्ये व्यवहारः ॥

---

(१) प्रथमाया न कारकविभक्तित्वमिति वादिमतं दूषयितुमाह—अस्यापीति ।

(२) एतत्सूत्रस्यापि क्रियायोग एव प्रवृत्तेरेवेत्यर्थः ।

(३) एतत्सूत्रस्य क्रियायोग एव प्रवृत्तावित्यर्थः ।

(४) प्रथमाया इत्यर्थः ।

(५) कारकत्वञ्च, क्रियानिष्ठविशेष्यतानिरूपितप्रकारतासमानाधिकरणविशेष्यतानिरूपिता ऽभेदसम्बन्धावच्छिन्नप्रकारताश्रयत्वम् । तादृशप्रकारताप्रयोजकपदोत्तरत्वं कारकविभक्तित्वम् । एवञ्च देवदत्तो गच्छतीत्यादौ देवदत्तस्य कारकत्वं तदुत्तरविभक्तेश्च कारकविभक्तित्वमुपपन्नम् , तथा हि गमनक्रियानिष्ठविशेष्यतानिरूपिता या प्रकारतासमानाधिकरणा विशेष्यता सा च तिङर्थकर्तृनिष्ठा तादृशविशेष्यतानिरूपिताऽभेदसम्बन्धावच्छिन्नप्रकारता देवदत्तनिष्ठा तदाश्रयः स एवेति तस्य तत्त्वमुपपन्नम् । उक्तसम्बन्धावच्छिन्नप्रकारताप्रयोजको देवदत्तस्त दुत्तरत्वं प्रथमाया इति तस्या अपि तत्त्वमुपपन्नमिति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु (१)स्वार्थद्रव्यलिङ्गसंख्याकारकेतिपञ्चविधः प्रातिपदिकार्थ इति पक्षे स्वार्थद्रव्यलिङ्गेतित्रिविधप्रातिपदिकार्थपक्षे च कृष्णादिशब्दे लिङ्गस्यापि प्रातिपदिकार्थत्वाल्लिङ्गग्रहणं व्यर्थमित्यत आह–नियतोपस्थितिकः प्रातिपदिकार्थ इति । निपूर्वकयमधातोर्व्यापकत्वमर्थः । तथा च नियता व्यापिका उपस्थितिर्यस्य, स नियतोपस्थितिकः, यस्मिन्प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स प्रातिपदिकार्थः । अर्थात् (२)नियतोपस्थितिकप्रातिपदिकार्थः । नियमेनेत्यस्य व्यापकत्वेनेत्यर्थः । तत्त्वञ्च तत्समानाधिकरणाऽत्यन्ताऽभावीयप्रतियोगिताऽनवच्छेदकधर्म्मवत्त्वम् । स्वविषयकश्रावणप्रत्यक्षसमवायित्व–स्वविषयकशक्तिज्ञानसमवायित्वरूपोऽधिकरणतानियामकः सम्बन्धो बोध्यः । (३)एवञ्चानियतलिङ्गकेभ्यस्तटादिशब्देभ्यो लिङ्गस्यानियतोपस्थितिकत्वाऽभावेन प्रातिपदिकार्थपदेनाऽग्रहणान्न ततः प्रथमोत्पत्तिरिति तदर्थमावश्यकं लिङ्गग्रहणमिति । तटः, तटी, तटमित्यादौ तटादिशब्दानां पुंस्त्व–स्त्रीत्व–क्लीवत्वबोधकतत्तत्प्रत्ययसमभिव्याहारात्सकललिङ्गबोधकत्वे ततः कस्यापि लिङ्गस्य नियतोपस्थितिकत्वाऽभावात्तद्बोध्यलिङ्गस्य प्रातिपदिकार्थपदेनाऽग्रहणात्प्रथमाऽनुत्पत्त्या तदर्थं लिङ्गग्रहणस्याऽऽवश्यकत्वमिति भावः । नच नीलरूपवत्परकस्य कृष्णशब्दस्य नियतलिङ्गत्वाऽभावात्ततः प्रथमा न स्यादिति वाच्यम् । वासुदेवार्थकस्य तस्य नियतलिङ्गत्वात् । कृष्णत्व–कृष्णसमवायपुंस्त्वादिर्नियतोपस्थितिक इति बोध्यम् । न च मञ्चाः क्रोशन्ति, सिंहो माणवक इत्यादौ मञ्चस्थकर्तृकाऽऽह्वानरूपार्थस्य सिंहादिसदृशरूपार्थस्य च लक्ष्यार्थस्य (४)शक्यार्थरूपप्रातिपदिकार्थेनाऽसङ्ग्रहात्प्रथमा न स्यादिति वाच्यम् । शक्यार्थे पदं साधुत्वेनान्वाख्याय पश्चात्पदान्तरसमभिव्याहारात्तात्पर्य्याऽनुपपत्त्या लक्षणाङ्गीकारेणाऽदोषात् । शक्यतावच्छेदकारोपस्यैव लक्षणात्वेन व्यवहाराच्च । लिङ्गमात्रे इति । लिङ्गस्यैवाधिक्येति तदर्थः । नच नीलो घटः, वीरः पुरुष इत्यादौ विशेष्यविशेषणभावस्याऽधिकस्य भानसत्त्वेन लिङ्गस्यैवाऽऽधिक्याऽभावात्प्रथमा न स्यादिति वाच्यम् । विशेष्यविशेषणभावस्य वाक्यार्थत्वेन बहिरङ्गत्वात्स्वार्थमात्रनिमित्तप्रथमप्रवृत्तप्रथमारूपसंस्कारस्य तेन बाधाऽयोगात् । नच तस्य वाक्यार्थत्वे किम्प्रमाणमिति वाच्यम् । (यत्राऽधिक्यं सवाक्यार्थः) इति प्रकृतसूत्रस्थभाष्योक्त-

---

(१) तदुक्तम्—

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।
नामार्था इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥

(२) तत्त्वञ्च, उच्चारितप्रातिपदिकसमानाधिकरणात्यन्ताभावाप्रतियोगिबोधनिरूपितविषयताश्रयत्वम् । लक्षणसमन्वयश्चेत्थम् । उच्चारितघटरूपप्रातिपदिकसमानाधिकरणो योऽत्यन्ताभावः स च न घटो नास्तीत्याकारकोऽपि तु पटो नास्ति मठो नास्तीत्याकारक इति तादृशाभावस्य न घटविषयको बोधः प्रतियोगी, अपि तु पटविषयको मठविषयकश्चैव तादृश इत्युक्ताभावाप्रतियोगिबोधो घटीयो बोधः (घट इत्याकारकः) तन्निरूपितविषयता घटे तदाश्रयत्वं तस्यैवेति प्रातिपदिकार्थत्वं तस्य सिद्धमिति भावः ।

(३) नियतोपस्थितिकरूपप्रातिपदिकार्थस्य ग्रहणे चेत्यर्थः ।

(४) शक्यार्थरूपेत्यादि । लक्ष्यार्थस्य नियतोपस्थितिकत्वाभावादिति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्यैव प्रमाणत्वात्। अयं विशेष्यविशेषणभावो द्विविधः, एकः—यत्र भेदः संसर्गत्वेन भासते तत्र तत्सम्बन्धावच्छिन्नः, द्वितीयो-यत्र समानविभक्तिकनामार्थयोरन्वयस्तत्रेतरसम्बन्धाऽनवच्छिन्नः। नच विशेष्यविशेषणभावस्य वाक्यार्थत्वेन बहिरङ्गत्वात्तेन प्रथमप्रवृत्तसंस्काराऽबाधेन घटम्पश्यतीत्यादावपि कर्म्मत्वस्य क्रियासापेक्षत्वेन वाक्यार्थत्वात्प्रथमाऽऽपत्तिरिति वाच्यम्। सत्येवं 'कर्म्मणि द्वितीया' इत्याद्यनुशासनवैयर्थ्यापत्तेः। एवञ्च द्वितीयादेर्देशस्य प्रथमयाऽवरुद्धत्वादस्यास्ताभिर्बाधेन न प्रथमाऽऽपत्तिशङ्काकलङ्ककणिकेति भावः॥

एवञ्च नियतोपस्थितिकत्वरूपप्रातिपदिकार्थत्वस्वीकारेण यत्फलितन्तदाह—**अलिङ्गा नियतलिङ्गाश्च प्रातिपदिकार्थमात्रस्योदाहरणमिति**। अलिंगा असत्त्वभूतत्वेन लिङ्गादियोगाऽभाववन्त उच्चैरित्याद्यव्ययशब्दा इत्यर्थः। वासुदेव-लक्ष्मी-ब्रह्माऽऽद्यर्थबोधकाः कृष्ण-श्री-ज्ञानादयः शब्दा नियमेन पुं-स्त्री-क्लीबानुपस्थापयन्तीति भावः॥

ननु द्रोणादीनाम्परिमाणमर्थ इति तेभ्यः प्रातिपदिकार्थमात्र एव प्रथमासिद्धौ परिमाणग्रहणं व्यर्थमिति चेत्, न। न मूलोक्तार्थलाभाय तस्याऽऽवश्यकत्वादित्यत आह—**परिमाणमात्रे द्रोणो व्रीहिरिति**। अयम्भावः—सूत्रे परिमाणग्रहणसत्त्वे तत्र द्रोणशब्दात्प्रथमाविधानेन परिमाणस्य प्रत्ययार्थत्वात्तत्र प्रकृत्यर्थस्य द्रोणस्याऽभेदेनाऽर्थादितरसम्बन्धानवच्छिन्नविशेषणविशेष्यभावसंसर्गेणाऽन्वयः, प्रत्ययार्थस्य परिमाणस्य परिच्छेद्यपरिच्छेदकभावेन व्रीहावन्वयः, तथाच द्रोणाऽभिन्नं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः फलितः, परिमाणग्रहणाऽभावे प्रातिपदिकार्थे प्रथमाविधानात्प्रातिपदिकार्थस्य प्रत्ययार्थत्वात्तत्र द्रोणस्याऽभेदाऽन्वयः प्रत्ययार्थस्य च तस्योक्तसम्बन्धेन व्रीहावन्वयस्तथा च द्रोणाऽभिन्नो व्रीहिरिति स्यात्परमेतद्बाधितं (नामार्थयोरभेदातिरिक्तः सम्बन्धोऽव्युत्पन्नः) इति व्युत्पत्तिविरोधात्। इति मूलोक्तार्थलाभार्थं परिमाणग्रहणमावश्यकमिति भावः। नचोक्तव्युत्पत्तौ किम्प्रमाणमिति वाच्यम्। भेदसंसर्गावच्छिन्ननामार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितिः कारणमिति कार्यकारणभावस्यैव प्रमाणत्वात्। अत एव राज्ञः पुरुष इत्यत्र भेदसम्बन्धावच्छिन्नराजनिष्ठप्रकारताकपुरुषपदार्थनिष्ठविशेष्यताकशाब्दबुद्धौ ङस्प्रत्ययजन्योपस्थितेः कारणत्वाद्भेदसंसर्गको बोधो भवति। न हि भवति राजा पुरुष इत्यत्र तादृशो बोधः, उक्तसंसर्गकबोधे ङस्प्रत्ययजन्योपस्थितेः कारणत्वात्तस्याऽत्राऽसत्त्वात्। वैयाकरणैर्नाऽभेदस्य संसर्गत्वमङ्गीक्रियते। तस्य संसर्गत्वे नीलो घट इत्यादौ षष्ठ्यापत्तिः। विशेष्यविशेषणभावे तु न तदापत्तिः। तस्य बोधसामान्यसामग्रीलभ्यत्वेनाऽनन्यलभ्यत्वात्। राहोः शिर इत्यादावौपाधिकभेदमादाय षष्ठ्युपपादनपरभाष्यप्रामाण्यात्तस्य संसर्गाऽभावत्वं कल्प्यत इति भावः॥

वचनं किं संख्येति। ननु पञ्चकं प्रातिपदिकार्थं इति नये संख्याया अपि प्रातिपदिकार्थत्वात्तत्रैवैकादिशब्देभ्योऽपि प्रथमासिद्धौ सूत्रे वचनग्रहणं व्यर्थमिति चेत्, न। 'उक्तार्थानामप्रयोग' इति न्यायविरोधेनैकादिशब्देभ्यः प्रातिपदिकार्थे प्रथमाऽप्राप्त्या तदर्थमिह वचनग्रहणस्याऽऽवश्यकत्वेन सार्थक्यात्। एकत्वाद्यर्थेषु विभक्तिर्विधेया ते चाऽर्थाः प्रकृत्यैव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपादिता इति तेषामभिधानाय पुनर्विभक्तिर्नावश्यिका। यथा घटोऽस्ति कलश इति न भवति, इत्यभिप्रायकोक्तन्यायविरोधो दुर्वार इति वचनग्रहणमावश्यकम्। न च वचनग्रहणसत्त्वेऽप्युक्तन्यायविरोधो दुर्वार इति वाच्यम्। सामर्थ्यादुक्तन्यायबाधेन विरोधपरिहारात्। नहि तद्ग्रहणमन्तरेष्टसिद्धिरिति भावः। नचैकत्वविशिष्टे एकत्वान्तराऽन्वयार्थमेकवचनमस्त्विति वाच्यम्। प्रातिपदिकप्रतिपादितसंख्याविशिष्टे संख्याऽन्तराऽभावेनैकवचनोत्पत्तेरसम्भवात्। न च तर्हि एकादिशब्देभ्यो द्विवचनादिकमुत्पद्यतामिति वाच्यम्। अनन्वितार्थकविभक्तिकल्पनाऽपेक्षयाऽन्वितार्थकविभक्तिकल्पनस्यैव न्याय्यत्वेन द्विवचनादेरनुत्पत्तेः। न च (अपदं न प्रयुञ्जीते) ति भाष्यसिद्धान्तादेकवचनादिसिद्धौ वचनग्रहणं व्यर्थमिति वाच्यम्। सत्येवं तस्याऽनावश्यकत्वात्। (नाऽसूया तत्र कर्त्तव्ये) ति भाष्यसिद्धान्ताद्व्याख्यानात्करणं वरमिति प्राचीनसिद्धान्ताच्च कर्त्तव्यमेव वचनग्रहणमिति केचिदिति दिक्॥

ननु हिमानीन्द्राणीत्यादिभ्यः प्रातिपदिकार्थमात्रे प्रथमा भवति, सा च न सम्भवति महत्त्वपुंयोगयोराधिक्यादिति चेत्, न। (१)(लिङ्गविशिष्ट), परिभाषया तदुपपत्तेः। प्रातिपदिकार्थमात्र इत्यत्र प्रातिपदिकपदस्य प्रातिपदिकप्रकृतिकलिङ्गबोधकप्रत्ययस्याऽपि बोधकत्वेन यस्माल्लिङ्गबोधकप्रत्ययान्तात्प्रथमोत्पत्तिरभिप्रेता तज्जन्यनियतोपस्थितिकोऽर्थो विवक्षितः; स च प्रकृतेऽस्तीति भावः॥

नागेशास्तु—प्रातिपदिकार्थशब्देन यस्माच्छब्दात्प्रथमाविधानं तच्छब्दप्रवृत्तिनिमित्तस्य तदाश्रयस्य च ग्रहणम्। तस्य च मुख्यस्येव आरोपिततदाश्रयस्यापि ग्रहणम्। प्रवृत्तिनिमित्तप्रकारकारोपविशेष्यस्यापीति तदर्थः। प्रातिपदिकार्थशब्देनाऽऽरोपिततदाश्रयस्य ग्रहणादेव गोपीत्यादौ गोपत्वप्रकारकारोपविशेष्यार्थबोधकत्वेऽपि प्रथमासिद्धिः। (२)अन्यथोक्तप्रयोगे गोपत्वरूपप्रवृत्तिनिमित्तस्य प्रातिपदिकार्थशब्देन ग्रहणात्तस्य तत्राऽसत्वात्सा न स्यात्। प्रातिपदिकार्थपदेन प्रवृत्तिनिमित्ततदाश्रययोरेव ग्रहणादेव सूत्रे लिङ्गग्रहणस्य सार्थक्यम्। अन्यथा 'स्वमोर्नपुंसकात्'इत्यादिशास्त्रप्रामाण्याल्लिङ्गस्यापि प्रातिपदिकजन्योपस्थितिविषयार्थत्वेन तस्य स्पष्टमेव वैयर्थ्यं स्यात्। लिङ्गस्य प्रातिपदिकजन्योपस्थितिविषयार्थत्वादेव 'स्त्रियामि'ति सूत्रे स्त्रीत्ये द्योत्ये इत्यर्थो भाष्ये सिद्धान्तितः। न च प्रवृत्तिनिमित्ततदाश्रययोः प्रातिपदिकार्थपदेन ग्रहणे हिमानी मृडानीत्यादौ प्रथमा न स्यान्महत्वपुंयोगयोराधिक्यादिति वाच्यम्। महत्वविशिष्टहिमत्वस्याऽऽरोपितमृडत्वस्य च प्रवृत्तिनिमित्तस्य तत्र सत्त्वादित्यलम्॥

इति कर्तृकारकप्रकरणम्।

---

(१) लिङ्गविशिष्टेति। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषास्वरूपम्।

(२) आरोपिततदाश्रयस्य प्रातिपदिकार्थपदेनाऽग्रहणे सतीत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ कर्मकारकप्रकरणम् ।

कारके । अत्र प्रथमाऽर्थे सौत्री सप्तमी; तेन कारकमिति तदर्थः । कारकत्वं क्रियाजनकत्वम् । करोति क्रियां निर्वर्त्तयतीतिव्युत्पत्तेर्भाष्ये दर्शनात् । ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्य न कारकत्वं तस्याऽन्यथासिद्धत्वेन क्रियाजनकत्वाऽभावात् । कारकाणां क्रियाजनकत्वादेव तेषां क्रियायामेवाऽन्वयः। क्रियाजनकमिति ज्ञाते का सा क्रियेत्याकाङ्क्षोदयेन क्रियाया जनकाकांक्षया च कारकाणां क्रियायामन्वयस्यैवौचित्यमिति तदाशयः । न च क्रियाशब्दस्य प्रधानक्रियायां मुख्यत्वेन कर्मादिकारकाणां प्रधानक्रियाऽनिर्वर्त्तकत्वात्कथं तेषां कारकत्वमिति वाच्यम् । सकलकारकाणां स्वस्वनिष्ठफलोत्पत्त्यनुकूलक्रियाद्वारा प्रधानक्रियानिष्पादकत्वेन तदुपपत्तेः । न च जनिष्यमाणपुत्राय गां दास्यामीत्यादौ सम्प्रदानत्वं न स्यात्तस्येदानीमसन्निहितत्वेन कारकत्वाऽभावादिति वाच्यम् ! असन्निहितसम्प्रदानस्यापि दातृबुद्धिस्थत्वावश्यकत्वात्स्वज्ञानस्य पूर्वकालवृत्तित्वेनैव क्रियाजनकत्वात् । यथा यागस्य साक्षात्स्वर्गाव्यवहितपूर्ववृत्तित्वाऽभावेऽपि परमाऽपूर्वद्वारा स्वर्गजनकत्वं तथाऽसन्निहितसम्प्रदानजन्यं यत्तद्विषयकं तज्ज्ञानक्रियायाऽव्यवहितपूर्वकालवृत्तित्वेन सम्प्रदानस्यापि क्रियाजनकत्वमिति भावः । एवं स्तोकम्पचतीत्यादौ फलस्यापि स्वज्ञानद्वारा व्यापारजनकत्वेन कारकत्वात्कर्मत्वमुपपन्नम् । अन्यथा क्रियाजनकस्य कारकत्वात्फलस्य तत्त्वाऽभावात्कर्मत्वं न स्यादिति भावः ॥

क्रियाऽन्वयित्वं कारकत्वमिति नाऽभ्युपगन्तव्यं ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ पुत्रद्वारा ब्राह्मणस्य क्रियाऽन्वयित्वेन कारकत्वाऽपत्तेः । न च साक्षात्क्रियाऽन्वयित्वमिति तल्लक्षणस्वीकारे ब्राह्मणस्य साक्षात्क्रियाऽन्वयित्वाऽभावादुक्ताऽऽपत्त्यभावादिदमेव तल्लक्षणमस्त्विति वाच्यम् । तथा सति मातुः स्मरतीत्यादौ मातुः स्मरणक्रियायां साक्षादन्वयेन कारकत्वाऽऽपत्तेः । अतः पूर्वोक्तलक्षणमेव साधु, एवञ्च मातुः क्रियाजनकत्वेनाऽन्वयित्वाऽविवक्षणेन नोक्ताऽऽपत्तिलेशोऽपीति भावः ॥

कर्तुरीप्सिततमं कर्म । कर्तृरिति 'क्तस्य च वर्त्तमाने' इति कर्तरि षष्ठी । ईप्सिततममिति आप्नोतेः सनि द्वित्वे 'आपज्ञप्यृधामीत्' इत्याकारस्येत्वे 'अत्र लोपोऽभ्यासस्य' त्यभ्यासलोपे 'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्त्तमाने क्ते ततः 'अतिशायने तमबिष्ठनावि'ति तमबि सिद्धम् । अत्र सूत्रे मतिरिच्छा न बुद्धिः, पुनर्बुद्धिग्रहणात् । अत्रेप्सितशब्दो नाऽभिप्रेतपरः; किन्तु क्रियापरः 'वारणार्थानामि'ति सूत्रभाष्यकैयटयोस्तथैव दर्शनात् । एवञ्च कर्त्राप्तुमिष्यमाणं कर्मेति तदर्थः । आप्तिश्चात्र सम्बन्धो न तु व्याप्त्यर्थकः । स च सम्बन्ध उपस्थितत्वात् कर्तृपदार्थाऽविशेषणीभूतव्यापारद्वारक एव गृह्यते । उपस्थितपरित्यागेऽनुपस्थितकल्पने मानाऽभावात् । एवञ्च कर्त्रा स्वनिष्ठव्यापारप्रयोज्यफलेन सम्बन्धुमिष्यमाणमित्यर्थः । यथा तण्डुलं पचतीत्यादौ(१)(व्यपदेशिवद्भावेन) फलस्यापि स्वसम्बन्धित्वात्कर्मत्वसिद्धिः । अत्र क्तप्रत्ययोपात्तवर्त्तमानत्वं न विवक्ष्यते; तथा सति कटं कृत-

---

(१) व्यपदेशिवद्भावेनेति । 'व्यपदेशिवदेकस्मिन्नि'ति परिभाषास्वरूपम् । यथा ससहाये मुख्यव्यवहारो भवति तथैकस्मिन्नसहायेऽपि भवतीत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वान् करिष्यतीत्यादौ कर्मत्वाऽनुपपत्तेः । नचाऽत्र वर्त्तमानत्वस्याऽविवक्षणात्कथं षष्ठीति वाच्यम् । एतत्सूत्रशाब्दबोधे तदविवक्षेति तदाशयादित्यलम् ॥

कर्त्तुः किम् । माषेष्वश्वं बध्नाति । ननु कारकाधिकाराद्व्यापारलाभात्तेन कर्त्तुराक्षेपात् कर्तृवृत्तिव्यापारप्रयोज्यफलवत्त्वप्रकारिकेच्छानिरूपितविषयताऽऽश्रयः कर्मेत्यर्थे देवदत्तो ग्रामं गच्छतीत्यादौ देवदत्तकर्तृवृत्तिव्यापारः उत्तरदेशसंयोगानुकूलरूपः तत्प्रयोज्यफलाऽऽश्रयो ग्रामो भवत्वित्याकारिका तादृशेच्छानिरूपितविषयता ग्रामनिष्ठा तादृशविषयता ग्रामनिष्ठा तादृशविषयताऽऽश्रयस्य ग्रामस्य कर्मत्वे सिद्धे कर्त्तुर्ग्रहणं व्यर्थमिति चेत्, न । तस्य प्रकृतधातूपात्तव्यापाराश्रयकर्तृग्रहणेन सार्थक्यात् । अन्यथा माषेषु प्रसक्तमश्वं माषनाशो मा भूदित्यन्यत्र बध्नातीत्यर्थके माषेष्वश्वं बध्नातीतिप्रयोगे माषभक्षणकर्त्तुरश्वस्य मद्वृत्तिव्यापारप्रयोज्यगलबिलाधःसंयोगरूपफलाश्रयतया माषा भवन्त्वितीच्छायास्सत्त्वादधिकरणसंज्ञाम्बाधित्वा माषाणां कर्म्मत्वापत्तेः । प्रकृतधातूपात्तव्यापाराऽश्रयकर्तुर्ग्रहणे तु नोक्तदोषः, अश्वस्य प्रकृतधातूपात्तव्यापाराऽश्रयत्वाऽभावेनाऽग्रहणात् । न च तादृशकर्तुर्ग्रहणेऽपि पुष्ट्यर्थं माषक्षेत्रेऽश्वबन्धनस्थले तादृशकर्तुर्देवदत्तस्यैव मद्वृत्तिव्यापारप्रयोज्य बन्धनाश्रयोऽश्वो भवतु, अश्वस्य गलबिलाधःसंयोगाश्रया माषा भवन्त्वितीच्छायाः सत्त्वान्माषाणां कर्मत्वं दुर्वारमेवेति वाच्यम् । प्रत्यासत्त्या प्रकृतधातुवाच्यफलस्यैव ग्रहणेनाऽदोषात् । यत्तु स्वारसिकार्थके माषेष्वश्वं बध्नातीति प्रयोग एव दोषस्य सम्भवान्माषेषु प्रसक्तमित्याद्यर्थे लक्षणा नावश्यिकेति केचित्, तन्न, कर्मण ईप्सिता माषा न तु कर्तुरितिग्रन्थसंगत्यर्थं तदावश्यकत्वात् ॥

वस्तुतस्तु—प्रकृतधातूपात्तव्यापाराश्रयकर्तृग्रहणेऽपि पुष्ट्यर्थं माषक्षेत्रेऽश्वबन्धनस्थले माषाणां कर्मत्वव्यावृत्तये प्रकृतधातूपात्तफलस्य ग्रहणमावश्यकमिति तेनैव माषेषु प्रसक्तमित्याद्यर्थके माषेष्वश्वं बध्नातीति प्रयोगेऽप्युक्तदोषव्यावृत्तौ कर्तृग्रहणफलमन्वेषणीयमिति दिक् ॥

तमब्ग्रहणं किमिति—अवयवद्वारा समुदायस्य प्रश्नः । अर्थादीप्सिततमब्ग्रहणं किमर्थं (कर्तुरुद्देश्यं कर्म) त्येवास्तु सूत्रमिति प्रष्टुराकूतम् ॥

समाधत्ते—पयसौदनम्भुङ्क्ते इति–यदा कृतभोजनोऽपि देवदत्तः पुनरोदनभोजने प्रवर्त्तते तदेदं प्रत्युदाहरणं बोध्यम् । अयम्भावः—कर्त्तुरुद्देश्यं कर्मेति सूत्रकरणे उक्तस्थले भोजनक्रियाकर्त्तुः पयस उद्देश्यत्वात्तस्य कर्मत्वापत्तिः । ईप्सिततमब्ग्रहणसत्त्वे तु पयसः कर्तृवृत्तिव्यापारप्रयोज्यगलबिलाधःसंयोगरूपफलाश्रयत्वाभावान्नोक्तापत्तिः । नच पयसा ओदनम्भुङ्क्ते इत्यादौ पयसः कर्मत्वव्यावृत्त्यर्थमीप्सितग्रहणमेवाऽस्तु तमब्ग्रहणं व्यर्थमेवेतिवाच्यम् । अग्नेर्माणवकं वारयतीत्यादावग्नेः कर्मत्वव्यावृत्त्यर्थत्वेन तस्य सार्थक्यात् । नचाऽग्नेः कर्मत्वे 'वारणार्थानामि'ति सूत्रं वैयर्थ्यमापद्येतेतिवाच्यम् । तस्य सामर्थ्यात्कर्मसंज्ञाम्बाधित्वा माणवकस्यापादानसंज्ञाविधानेन साफल्यात् । नचाऽग्नौ 'वारणार्थानामि' त्यस्य चरितार्थत्वे कथमपवादत्वमिति वाच्यम् । माणवकस्यापि वारिधातूपस्थाप्यसंयोगरूपफलाश्रयत्वात् । संयोगाद्यनुकूलव्यापाराभावानुकूलव्यापारस्यैव वारिधात्वर्थत्वात् । नच संयोगस्य वारिधात्वर्थकर्तृव्यापारजन्यत्वाभावात्संयोगाश्रयेऽग्नौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कर्मत्वाऽप्राप्त्या तत्र चरितार्थस्योक्तसूत्रस्य कथमपवादत्वमिति वाच्यम् । असति तमब्ग्रहणे कर्तृवृत्तिव्यापारवाचकधातूपात्तफलाश्रयत्वमित्यर्थस्यैव तेन लाभेन तत्र कर्मत्वस्य दुर्वारत्वात् । असति तमब्ग्रहणे कर्तृवृत्तिव्यापारवाचकधातूपात्तफलाश्रयस्य कर्मत्वमित्यर्थेऽग्नेर्देवदत्तकर्तृवृत्युत्तरदेशसंयोगानुकूलव्यापाराऽभावानुकूलव्यापारवाचकवारिधातूपात्तोत्तरदेशसंयोगाश्रयत्वेन कर्मत्वं दुर्वारं स्यात् । ईप्सिततमब्ग्रहणसत्त्वे तु प्रयोज्यत्वलाभः । (१)तत्त्वञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम् । तथाच प्रकृतधात्वर्थप्रधानीभूतव्यापारः उत्तरदेशसंयोगानुकूलव्यापाराऽभावाऽनुकूलव्यापारस्तत्प्रयोज्यं फलमुत्तरदेशसंयोगाऽनुकूलव्यापारस्तदाश्रयत्वं माणवकस्येति तस्यैव कर्मत्वम्, अग्नेस्तादृशफलाश्रयत्वाऽभावान्न तत्त्वमिति भावः ॥

ईप्सिततमत्वलक्षणे—फलव्यापारयोः प्रकृतधात्वर्थत्वे तुष्ट्यर्थं मापभक्षणाय मापक्षेत्रेऽश्वबन्धनस्थलेऽपि मापाणां न कर्मत्वं बन्धनप्रयोज्यभक्षणफलाश्रयत्वेऽपि भक्षणस्य बध्नात्यर्थत्वाऽभावात् । प्रयोज्यत्वनिवेशफलं गां दोग्धि पयो देवदत्त इत्यादौ विभागानुकूलव्यापाराऽनुकूलव्यापारार्थकदुहियोगे पयसः कर्मत्वसिद्धिः । जन्यत्वनिवेशे तु न तस्य कर्मत्वं पयोनिष्ठविभागस्य प्रधानीभूतव्यापारप्रयोज्यत्वेऽपि उक्तव्यापाराऽजन्यत्वात् । प्रयोज्यत्वञ्च साक्षात्परम्परासाधारणमिति न तस्य कर्मत्वाऽनुपपत्तिरिति भावः ॥

अत्रेयं विचारणा—ननु 'कर्त्तुरीप्सिततमं' 'तथा युक्तम्'इति सूत्रद्वयाकरणरूपलाघवात् कर्तृनिष्ठव्यापारप्रयोज्यफलसम्बन्धाश्रयः कर्मेत्यर्थकं 'कर्त्तुराप्यतमं कर्मे'त्येवास्तु सूत्रम् । अग्नेर्माणवकं वारयति कूपादन्धं वारयतीत्यादौ नाग्निकूपयोः कर्मत्वाऽऽपत्तिः, अग्निकूपनिष्ठफलसम्बन्धस्य कर्तृव्यापारप्रयोज्यत्वाऽभावादिति चेत्; न । काशीं गच्छन् पथि मृत इत्यादौ काश्याः संयोगरूपफलाश्रयत्वाऽप्राप्त्या तदर्थमीप्सिततममित्यस्य, अनीप्सितस्य संग्रहार्थं तथा युक्तमित्यस्य चाऽऽवश्यकत्वेनोक्तसूत्रस्य कर्तुमशक्यत्वात् । तण्डुलं पिपक्षन्मृत इत्यत्र तण्डुलस्य फलसम्बन्धाऽऽश्रयत्वाऽभावात्कर्मत्वाऽनुपपत्तेश्च । ईप्सिततममित्युक्तौ तु फलसम्बन्धप्रकारेच्छाविषयत्वात्कर्मत्वसिद्धिरिति भावः ॥

पुनरत्र विचार्यते—ननु (२)यथोक्तसूत्राऽभ्युपगमे कर्तृवृत्तिव्यापारप्रयोज्यफलवत्त्वप्रकारिकेच्छानिरूपितविषयताऽऽश्रयः कर्मेत्यर्थं काशीं न गच्छतीत्यादौ काश्याः संयोगप्रकारेच्छाविषयत्वाऽभावात्कर्मत्वं न स्यादिति चेन्न । नञ्समभिव्याहारे संयोगाऽभावाऽनुकूलव्यापारस्यैव गम्धात्वर्थत्वेन संयोगाऽभावरूपफलाश्रयत्वेन कर्मत्वोपपत्तेः । नचैवमग्नेर्माणवकं वारयतीत्यत्रोत्तरदेशसंयोगानुकूलव्यापाराऽनुकूलव्यापारस्य नञ्समभिव्याहारे वारिधात्वर्थत्वाद्दुहियोगे पयस इवाऽग्नेरपि प्रधानीभूतव्यापारप्रयोज्यसंयोगरूपफलाश्रयत्वापत्तिरिति वाच्यम् । कर्मत्वलक्षणे प्रधानीभूतव्यापारजन्यत्वस्यैव निवेशेनाऽदोषात् । नचैवं गां पयो दोग्धीत्यादौ पयोनिष्ठविभागस्य गोपवृत्तिव्यापाराऽजन्यत्वात्पयसः कर्मत्वं न स्यादिति वाच्यम् । (३)तस्य गोवृत्तिव्यापारजन्यत्वेऽपि गोपवृत्तिव्यापारजन्य-

---

(१) ईप्सिततमत्वञ्चेत्यर्थः ।

(२) कर्त्तुरीप्सिततमं कर्मेतिसूत्राङ्गीकार इत्यर्थः ।

(३) पयस इत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वस्याऽपि सत्त्वेन कर्मत्वोपपत्तेः । नचैवं घटं जानाति घटमिच्छतीत्यादौ स्वविषयीभवनाऽनुकूलव्यापारस्य ज्ञानादिरूपस्य धात्वर्थत्वेन ज्ञानादिसमकालोत्पत्तिकस्य स्वविषयीभवनस्य ज्ञानाद्यजन्यत्वात्तदाश्रयस्य घटस्य, माणवकनिष्ठस्योत्तरदेशसंयोगानुकूलव्यापाराभावस्य प्रागभावरूपस्याऽनादित्वात्प्रधानीभूतव्यापाराजन्यत्वेन माणवकस्य च कर्मत्वं न स्यादिति वाच्यम् । कर्मत्वलक्षणे प्रयोज्यत्वनिवेशेन तत्र तदुपपत्तेः । तथाहि—स्वविषयीभवनादेरप्यनुभवबलेन स्वप्रयोज्यत्वस्याङ्गीकारात् घटस्य, कण्टकापसरणाद्दुःखाभाव इत्याद्यनुरोधेन प्रागभावस्य प्रयोज्यत्वाङ्गीकारेण माणवकस्य च कर्मत्वमुपपन्नमिति भावः॥

अग्नेर्माणवकं न वारयतीत्यत्र तु नञ्समभिव्याहारे उत्तरदेशसंयोगानुकूलव्यापारस्य गच्छन्तं माणवकं दृष्ट्वा तूष्णीं स्थितिरूपस्य माणवकव्यापारेणाऽन्यथा सिद्धाऽग्निसंयोगप्रयोजकत्वाऽभावादग्निसंयोगरूपफलस्योक्तव्यापाराऽप्रयोज्यत्वेन तदाश्रयस्य माणवकस्य कर्मत्वं न स्यादिति वाच्यम् । कारणत्वस्येव प्रयोजकत्वस्याऽप्यन्यथासिद्धेरङ्गीकारात्तदुपपत्तेः । यथा कारणमन्यथासिद्धं तथा प्रयोजकत्वमप्यन्यथासिद्धमिति भावः ।

ननु एतत्प्राग्वर्त्तिनः 'अधिशीङ्स्थासां कर्म'इति सूत्रात्कर्मपदाऽनुवृत्त्या कर्मसंज्ञेत्यर्थलाभे 'कर्तुरीप्सिततमम्'इति सूत्रे कर्मपदं व्यर्थमित्याशङ्क्य समाधत्ते–कर्मेत्यनुवृत्ताविति । (एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः) इति परिभाषया एकयोगनिर्दिष्टस्याऽऽधारपदस्याऽप्यनुवृत्तावाधारस्यैव कर्मत्वं स्यान्नतु फलाश्रयस्येति तद्व्यावृत्त्यर्थमत्र सूत्रे कर्मग्रहणमावश्यकमिति । अयम्भावः—आधारोऽधिकरणमिति सूत्रे कस्याऽऽधारस्याधिकरणसंज्ञेत्याकांक्षायां कारकाऽधिकारात्क्रियाया एवाधारस्येति लाभे तत्रेप्सितस्वतन्त्रपदाभ्यां साक्षात्क्रियाऽधारयोः कर्तृकर्मसंज्ञाभ्यां बाधात्परम्पराऽऽधारस्य ग्रहणात्परम्परा च कर्तृकर्मद्वारैव । एवञ्च कर्त्रा स्वनिष्ठव्यापारेणाप्तुमिष्यमाणस्तन्निष्ठक्रियायास्तद्वदाधारः कर्मत्वं प्रतिपद्येत, तथाच विषयतासम्बन्धेन यद्धातुफलं विषये, समवायेन कर्तर्यपि, तद्योगे कर्मत्वमित्याह–गेहं प्रविशतीति । अत्रोक्तसम्बन्धद्वयेन गेहचैत्रयोः फलं तिष्ठतीति भावः ॥

अनभिहिते । अत्र प्रकृतसूत्रस्य कर्त्तव्यत्वाकर्त्तव्यत्वयोर्विचारः प्रस्तूयते–ननु स्वार्थ–द्रव्य–लिङ्ग–संख्या–कारकेति पञ्चविधप्रातिपदिकार्थपक्षे (अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति) इत्यभियुक्तोक्त्या 'स्वादि' सूत्रेण कर्मादौ संख्यायाञ्चार्थे स्वादिविभक्तीनां सिद्धौ 'कर्मणि द्वितीया' इत्यादेः 'द्व्येकयोर्द्विवचनैकवचने' इत्यादिसूत्राणां नियमार्थत्वं तत्र कर्मणि द्वितीयेत्यादेर्द्व्येकयोर्द्विवचनैकवचने' इत्यादेश्चैकवाक्यत्वे एकस्मिन्कर्मणि द्वितीयैकवचनमिति सूत्रजन्यबोधे (सूत्रस्यार्थे) कर्माद्यर्थस्य प्राधान्यादनभिहिते इतिसूत्रमनावश्यकम् । नच तदभावे देवदत्तेन ग्रामो गम्यते, यज्ञदत्तेन तण्डुलः पच्यते इत्यादावुक्तकर्मण्यपि द्वितीयापत्तिरिति वाच्यम् । (उक्तार्थानामप्रयोगः) इत्यनेनोक्तकर्मणि तदप्राप्तेः । कर्मत्वबोधनमेव द्वितीयाविधानफलं तच्च तिङैव बोध्यते चेदलं तद्विधानेनेति तदाशयः । नच कर्मणि द्वितीयेत्यादिसूत्रस्यं संख्यावाक्येन द्व्येकयोर्द्विवचनैकवचने इत्यादिना सहैकवाक्यत्वेन कर्मगतैकत्वे द्वितीयैकवचनमित्यर्थे संख्यायाः प्राधान्यादुक्तन्यायाऽप्रवृत्तावुक्तकर्मण्यपि द्वितीयाऽऽपत्त्या तद्व्यावृत्तयेऽनभिहिताऽधिकार आवश्यक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवेति वाच्यम् । उक्तरीत्योक्तसूत्रजबोधे संख्यायाः प्राधान्यात्तदावश्यकत्वेऽपि एकत्वविशिष्टे कर्मणि द्वितीयकवचनमित्यर्थे दर्शितदिशा तदनावश्यकत्वात् । न च (द्विर्बद्धं सुबद्धमि) ति न्यायेन व्यतिलुनीते इत्यत्र क्रियाविनिमयद्योतकव्यतीत्युभयोपसर्गप्रयोगवदुक्तकर्मण्यपि द्वितीया दुर्वारैवेति वाच्यम् । लक्ष्यानुसारा'दुक्तार्थानामि'ति न्यायानुसरणस्यैवौचित्यादित्यलम् ।

प्रातिपदिकविषये 'स्वार्थद्रव्ये'त्यादिपञ्चकपक्षाङ्गीकारवद्धातुविषयेऽपि पञ्चकपक्षोऽङ्गीकार्य्यः, तथा च धातोरपि क्रियात्व-क्रिया-काल-कारक-संख्यारूपं पञ्चकमर्थः, उभयत्र पञ्चकपक्षाङ्गीकारादेव-धातुविषयेऽपि 'द्व्येकयोरित्यादेः' 'भावकर्मणोः'इत्यादेश्च भाष्यसम्मतं नियमत्वं सङ्गच्छते । तत्तत्पञ्चकस्य प्रातिपदिकधातुवाच्यत्वादेव दधि-अजर्घा-अवेदित्यादौ प्रातिपदिकधातुभ्यामेव सर्वबोधः । क्रियात्वक्रियेत्यादिपञ्चकस्य धातुवाच्यत्वादेव 'भावकर्मणो'रित्यस्य भावकर्मवाचकाद्धातोरित्यर्थः 'स्नुक्रमोः'इति सूत्रभाष्ये उक्तः । प्रातिपदिकस्थले धातुस्थले च द्योत्यत्वादेव प्रत्ययार्थस्य विशेषणत्वमेवेति दिक् ॥

ननु 'अनभिहिते' इत्यस्य 'कर्मणि द्वितीया' इत्यतः प्रागप्यधिकारात्प्रातिपदिकार्थसूत्रेऽपि तस्याऽधिकारेणाऽनभिहिते प्रातिपदिकार्थे एव प्रथमा स्यादुक्ते तस्मिन् सा न स्यादित्याशङ्क्य समाधत्ते—**अभिहिते तु प्रातिपदिकार्थमात्रे प्रथमैवेति** । अनभिहिताऽधिकारे सत्यपि प्रातिपदिकार्थस्य प्रादिपदिकेन तिङादिना वोक्तत्वेऽपि सूत्रारम्भसामर्थ्यात्प्रथमैव नान्या विभक्तिः । अत एव (अभिहिते प्रथमैवे) ति वार्त्तिकं सङ्गतम् । अन्यथोक्तरीत्या प्रातिपदिकार्थस्योक्तत्वेन प्रथमाऽप्राप्तौ स्पष्टैव वार्त्तिकाऽसंगतिरिति भावः ।

ननु अभिहिते प्रातिपदिकार्थमात्रे प्रथमैवेत्युक्ते तत्र कियद्भिरभिधानमित्याकांक्षायामाह-**अभिधानं तु प्रायेण तिङ्कृत्तद्धितसमासैरिति** । तिङ उदाहरणम्, देवदत्तेन हरिः सेव्यते । अत्र कर्मणि तङा कर्मणो हरेरुक्तत्वात्ततः प्रथमा । कृत उदाहरणम्, लक्ष्म्या सेवितो हरिः, अत्र कर्मणि क्तेन हरेः कर्मण उक्तत्वेन ततः प्रथमा । तद्धितस्योदाहरणम्, शतेन क्रीतः शत्योऽश्वः, अत्र शतशब्दात् 'शताच्च ठन्यतौ'इत्यनेन तेन क्रीतमित्यर्थे यति तेनाऽश्वरूपकर्मण उक्तत्वात्प्रथमा । समासस्योदाहरणम्, प्राप्त आनन्दो यं स प्राप्ताऽनन्द इति बोध्यम् । तिङ्कृदित्यादिपरिगणनादेव कटं भीष्मं कुर्वित्यादौ विशेष्यवाचककटपदोत्तरद्वितीया विशेषणवाचकभीष्मपदगतकर्मत्वस्योक्तत्वेऽपि भीष्मपदाद्द्वितीया । परिगणनाऽभावे तु येन केनाऽप्यभिधाने उक्तरीत्या विशेषणवाचकाद्द्वितीयोत्पत्तिर्न स्यात् । **वस्तुतस्तु** परिगणनं भगवता भाष्यकृता प्रत्याख्यातम्, तथाहि—प्रक्रियादशायां कटोऽपि कर्म भीष्मादयोऽपीति स्वीकारेण कटपदोत्तरद्वितीयया कटत्वविशिष्टकटगतकर्मत्वस्योक्तत्वेऽपि भीष्मत्वविशिष्टभीष्मनिष्ठकर्मत्वबोधार्थं विशेषणवाचकादपि द्वितीयाया आवश्यकत्वात् । कटभीष्मयोः परस्परमन्वयबोधस्तु विशेष्यविशेषणभावेनैवेति बोध्यम् । (नच सर्वाणि कारकाणि भावनायामेवाऽन्वियन्ति) इति व्युत्पत्तिविरोध इति वाच्यम् । साक्षात्स्वाश्रयद्वारा (परम्परया) वाऽन्वयविषयिणी सा व्युत्पत्तिरितिस्वीकारेणादोषादिति । तिङा कृता च स्वप्रकृत्यर्थं प्रति यस्य कर्मत्वं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्य सर्वस्यापि कर्मत्वाभिधानान्न कृतः कटः सुन्दर इत्यादौ कुत्रापि द्वितीयोत्पत्तिरित्यलम् ॥

अथ मूलोक्तपरिगणनोदाहरणस्य शत्य इत्यादेः खण्डनप्रकारः । तथाहि-यथा कर्मकरणादिपदे विभक्तिवाच्यतावच्छेदकरूपेण (उद्भूतकर्मत्वादिशक्तिमत्त्वेन) कर्मादिरभानात् न ततो द्वितीयोत्पत्तिस्तथा प्रकृते शत्य इत्यत्राऽप्युक्तरूपेण कर्मणो भानाऽभावात् (अप्रतीयमानत्वात्) द्वितीयोत्पत्त्यसम्भवेन तद्धितस्योदाहरणमेतन्निष्फलमेव, अर्थादनभिहिताधिकारस्य नैतत्प्रत्युदाहणं युक्तम् । तस्मात् (१)औपगवः, चित्रगुरित्येतत्प्रत्युदाहरणं युक्तम् । तत्र च येन रूपेण सम्बन्धस्य षष्ठ्या भानं भवति तेनैव रूपेण तद्धितान्तादिभिः समुदायशक्त्या सम्बन्धस्य भानं भवति । (२)घट इत्यादौ षष्ठ्यवाच्यत्वेन दृष्टानामेव प्रातिपदिकार्थपदेन ग्रहणं प्रातिपदिकार्थभिन्नस्यैव षष्ठीविधायके 'षष्ठी शेषे' इति सूत्रे शेषपदेन ग्रहणम् । औपगवादौ सम्बन्धस्य षष्ठीवाच्यत्वेन दृष्टत्वात्षष्ठ्यापत्तिः । उक्ताधिकार आवश्यकः । सति च तस्मिन् अनभिहिते सम्बन्धे षष्ठीति सूत्राऽर्थान्नोक्तापत्तिलेशोऽपीति भावः । **वस्तुतस्तु** औपगवश्चित्रगुरित्यपि न प्रत्युदाहरणं योग्यम्, कटं भीष्ममितिपरिगणनफलमुक्त्वाऽशेषत्वान्नात्र शेषलक्षणा षष्ठी, अन्याऽनभिहितकर्मादिग्रामसत्त्वाच्च नान्या काचिद्विभक्तिरित्याशङ्क्य 'न केवला प्रकृतिः प्रयोक्तव्या नाऽपि केवलः प्रत्ययः' इति समाधानं कृतम् । नहि काचिदन्या विभक्तिरेतस्या अभिसम्बद्धं वक्तुमुत्सहते इति कृत्वा द्वितीयेति भाष्ये उक्तम् । तत्राऽशेषत्वाच्चात्र शेषलक्षणा षष्ठीत्युक्त्यैव, औपगवादौ षष्ठीवारणात् । शेषपदेन प्रातिपदिकार्थभिन्नस्यैव ग्रहणादिहाऽतथात्वेनाऽदोषादिति तदाशयः । 'अनेकमन्यपदार्थे' इत्यत्र भाष्येऽपि ध्वनितमेतत् । यत्र हि चित्रगुरित्यादौ षष्ठ्यर्थस्य सम्बन्धस्य नियमेन भानात्षष्ठी प्राप्नोतीत्याशङ्क्य, अनभिहितः सोऽर्थः (चित्रागोस्वामित्वरूपः) अन्तर्भूतः प्रातिपदिकार्थः सम्पन्न इति प्रथमेत्युक्तम् । अनेनाऽशेषत्वरूपः षष्ठ्यप्राप्तिहेतुरुक्तः । अन्तर्भूत इत्यनेन चित्रगवादौ सम्बन्धस्यैव प्रवृत्तिनिमित्तत्वात्प्रातिपदिकार्थपदेन ग्रहणयोग्यत्वमुक्तमिति प्राञ्चः ॥

नागेशास्तु—शत्य इत्यत्र क्रयणादिक्रियायाः कारकान्वययोग्यतावच्छेदकसाध्यत्वेन रूपेणाऽभानान्न द्वितीयाऽतिप्रसङ्गः । उक्तरूपेण क्रियाभानाऽभावेन तत्रेतरकारकांगाम्यन्वयो न भवति, देवदत्तेन शत्योऽश्व इति प्रयोगो नेष्टः, । नच शतेन क्रीत इत्यर्थे 'शताच्च ठन्यतावि' त्यनेन यति निष्पन्नस्य शत्यशब्दस्य शतकरणकक्रयणकर्मबोधकत्वादुक्तापत्तेर्दुर्वारैवेति वाच्यम् । प्रत्ययान्तसमुदायेनोपस्थितायास्तस्याः क्रियायाः साध्यत्वेनाप्रतीयमानत्वात् । कारकान्वययोग्यक्रियाया धातोरेवोपस्थितिर्भवति ; न तु तद्धितशक्त्येति नोक्ताऽऽपत्तिलेशोऽपीति भावः । एवं प्रासानन्द इत्यादौ यत्कर्मकप्रासिकर्त्तानन्द इति विग्रहत आनन्दकर्तृकप्रासिकर्मेति समासतश्च बोधः, उभयत्र बोधे विशेष्यविशेषणभावव्य-

---

(१) औपगव इत्यत्र तत्सम्बन्ध्यपत्यमित्यर्थे प्रत्ययविधानात् चित्रगुरित्यत्र षष्ठ्यर्थे बहुव्रीहिविधानादितिभावः ।

(२) औपगवादौ समुदायात्षष्ठ्यापादनं तदा सम्भवति यदा प्रातिपदिकार्थे विधीयमानया प्रथमया बाधो न स्यादित्याशङ्कां वारयितुमाह—घट इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्यासेनैकार्थीभावकल्पना, वृत्तिविग्रहयोरसमर्थत्वापत्तिश्च । किञ्चैकधर्मिबोधकत्वरूपसामानाधिकरण्यस्य बहुव्रीह्युपजीव्यस्य हानिः । किञ्च पूर्वोत्तरपदयोरेकविशेष्यकप्रतीतिजनकत्वरूपसामानाधिकरण्याऽभावात्प्राप्ता भार्या यं स प्राप्तभार्य इत्यादौ पुँस्त्वानापत्तिरतो वृत्तिविग्रहयोः समानार्थत्वनिर्वाहाय 'कालाः परिमाणिना' इतिसूत्रस्थभाष्योक्तरीत्योभयत्र प्राप्तिकर्त्रानन्दकर्मत्येव बोधः । नच कर्मत्वस्य क्रियानिरूपितत्वाद्द्रव्याऽऽनन्दनिरूपितत्वाऽभावेन प्राप्तिकर्त्रानन्दकर्म्मेति बोधः कथमिति वाच्यम् । विशेष्ये आनन्दे कर्मत्वनिरूपकत्वस्य बाधेन विशेषणीभूतप्राप्तौ कर्मत्वनिरूपकत्वस्य पर्यवसानात् । स्वर्गे ध्वस्ते यथा स्वर्गी ध्वस्त इति भवति तथैवेति भावः । एवञ्च प्राप्तानन्दशब्दाद्विभक्तिवाच्यतावच्छेदकोद्भूतकर्मत्वशक्तिमत्वेन क्रियाजनकत्वेन च कर्मादेरभानान्न विभक्तिप्रसक्तिः । अत एव 'गतिकारकोपपदात्' इति सूत्रे गतिकारकोपपदादिति किमर्थम् ? परमं कारकं परमकारकमिति प्रतीकमुपादाय यथा सम्प्रदानादयः शब्दा न कारकरूपतां प्रतिपादयन्ति तथा कारकशब्दोऽपीति छृदन्ता हि क्रियायोग्यताविशिष्टद्रव्यवाचिनो न तद्भूतां कारकशक्तिं प्रतिपादयन्तीतिकैयटेनोक्तम् । अत एव न तस्य कर्मत्वस्य क्रियान्वयनियमः । अन्यथा कारकशक्तेः क्रियाविशेषणत्वनियमान्न कर्मादिः प्राधान्यं स्यात् । एवं कर्मादिपदं यथा विभक्तिवाच्यतावच्छेदकरूपेण कर्मादिभाननियामकं न तथा पक्वादि पदमपीति बोध्यम् । नचोक्तरीत्या परिगणनोदाहरणाऽन्यथोपपत्त्या तल्लेखनञ्चानुपपन्नमिति वाच्यम् । तिङ्कृत्तद्धितसमासैरभिधानं अर्थादुद्भूतकर्मत्वादिशक्त्याऽऽवेशेन न भानमिति न विभक्तप्रसक्तिरत्रैव तात्पर्य्यग्राहकत्वेन तदुपपत्तेः । इष्टः पुत्र, इष्यते पुत्र इत्यर्थे क्यच् कुतो नेत्याशङ्क्य स्वशब्देनोक्तत्वान्न क्यजिति समाहितं इष्टशब्दसामानाधिकरण्यात्पुत्रार्थे कर्मत्वस्यावगतावपि पुत्र इति सुबन्तस्य कर्मवाचकत्वाऽभावान्न तस्मात्क्यजिति तद्भावः । स्वं कर्मत्वं तद्वाचकशब्देन पुत्रगतकर्मत्वस्योक्तत्वान्न तत्रार्थे पुत्रशब्दस्य शक्तिरित्यक्षरार्थः । 'सुप आत्मनः' इत्यस्य कर्मत्वविशिष्टबोधकसुबन्तात्क्यजित्यर्थ इति तदाशयः । वस्तुतस्तु कर्मत्वविशिष्टबोधकात्सुबन्तात्क्यजित्यर्थे इह भवन्त इत्यादिना समाध्यन्तरमुक्तं, वाक्ये फलस्य विशेष्यत्वाद्वृत्तौ व्यापारस्येति समानाश्रयत्वाभावेन तत्रार्थे न वृत्तिरित्याहुः ॥

प्राचीनाऽनुसारेणोक्तस्याऽभिधानं तु प्रायेण तिङ्कृत्तद्धितसमासैरित्यत्र प्रायेणेत्यस्य फलमाह—क्वचिन्निपातेनाऽभिधानमिति । अयम्भावः—

'विषवृक्षोऽपि सम्वर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्'

इति श्लोके निपातेनाऽपिना विषवृक्षरूपकर्मण उक्तत्वात्ततः प्रथमा निपातेनाऽभिधानस्याऽनभ्युपगमेऽपिनोक्तकर्मण उक्तत्वेनापि विषवृक्षशब्दाद्द्वितीया दुर्वारैवेत्यवसेयम् । एवं 'क्रमादमुं नारद इत्यबोधि सः' इत्यादावितिशब्देन निपातेन नारदरूपकर्मण उक्तत्वान्न ततो द्वितीया ; किन्तु प्रथमैव । अत एव अपिना निपातेनाऽधिकरणस्योक्तत्वात्सप्तम्यप्राप्तौ वचनसामर्थ्यात्सप्तमी, विभक्त्यर्थेऽव्ययीभावसमासविधायकवचनसामर्थ्यादिति तदर्थ इति प्राञ्चः ।

वस्तुतस्तु—विषवृक्षोऽपीति पद्ये तुमुन उपपत्त्यर्थमिष्यते इति क्रियान्तराऽध्याहारस्यावश्यकत्वम्, अन्यथा क्रियार्थकक्रियोपपदत्वस्य शकादियोगस्य चाऽसत्वात्तुमुन् न

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्यात् । उक्तक्रियाध्याहारे तु 'इच्छार्थेषु तुमुन्' इत्यनेन सुलभ एव तुमुन्निति भावः । एवञ्च तिङैव कर्मण उक्तत्वात्ततो द्वितीयाऽप्रसक्त्या निपातेनाऽभिधानाऽभ्युपगमो निष्फल एव । विषवृक्षोऽपि सम्वद्र्ध्य स्वयं छेत्तुमिष्यते यत्तदसाम्प्रतमन्याय्यं न युज्यते इति पद्यार्थः । छेदनस्याऽन्याय्यत्वादिच्छाया अन्याय्यत्वं बोध्यम् । क्रमादमुमित्यत्राऽपि अयञ्चारद इति श्रीकृष्णीयज्ञानाऽऽकारस्याऽनुकरणम् । नारद इत्येतच्छब्दाऽभिलप्यमानाकारो बोधः । तथा च नारद इत्यस्य प्रथमान्तत्वेनाऽप्रथमान्तत्वेनाऽप्रातिपदिकत्वात्ततो न द्वितीयेति निष्फलैव निपाताऽभिधानाऽभ्युपगतिः । विभक्त्यर्थेऽव्ययीभावसमासविधायकवचनसामर्थ्यात्तिङ्कृत्तद्धितसमासैरेवाऽभिधानं नत्वेतदतिरिक्तैरितिपरिगणनकल्पकस्यैव युक्तत्वान्निपातेनाऽभिधानेऽप्यधिकरणे सप्तम्युत्पत्तौ बाधकाऽभावेन निपाताभिधानं नैव स्वीकार्यमित्याहुः ॥

तथा युक्तञ्चानीप्सितम् । तथा क्रियायुक्तस्येप्सिततमस्य कर्मत्वमिति तदर्थः । सूत्रेऽनीप्सितपदस्यानुद्देश्यमित्यर्थः । अनुद्देश्यञ्च द्विविधं द्वेष्यमुदासीनञ्च । आद्यस्योदाहरणम्—ओदनं भुञ्जानो विषं भुङ्क्ते । द्वितीयस्योदाहरणम्—ग्रामं गच्छंस्तृणं स्पृशतीति । वस्तुतस्तु न पूर्वप्रदर्शितं द्वेष्योदाहरणम्, समभिव्याहृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यतद्धात्वर्थफलाश्रयत्वस्य तथायुक्तपदार्थत्वात्पराधीनतया विषं भुञ्जानेऽपि विषस्य भुजिक्रियानिरूपितफलाश्रयत्वेनोद्देश्यत्वात्कर्तुरित्यनेनैव कर्मत्वसिद्धेः । तदुक्तं भगवता भाष्यकृता (आतश्च विषमीप्सितं यत्तद्भक्षयति)इति, तस्माच्चौरान्पश्यतीति द्वेष्यस्योदाहरणम्, विषयेन्द्रियसम्बन्धेन दृश्यमाना अपि चौरा न दर्शनोद्देश्या अपित्वनिष्टदर्शना एवेति । एवं च पूर्वसूत्रेण कर्मत्वाऽप्राप्तावनेन कर्मत्वमिति । नचोदासीनोदाहरणे तृणादेरीप्सिततमत्वाऽभावेन कर्मत्वं न स्यादिति वाच्यम् । स्पृश्यमानस्य गङ्गादेः स्पर्शादिजन्यसंयोगादिफलाधारत्वात्कर्मत्वोपपत्तेः । न च (तथा युक्तमित्येवा)स्तु सूत्रं; मास्तु च तत्राऽनीप्सितग्रहणमिति वाच्यम् । तदभावे प्रकर्षहीनस्यापीप्सितस्यानेन कर्मसंज्ञाया (वारणार्थानामि) त्यस्याऽनवकाशत्वेनाऽपादानत्वापत्तेः । एवञ्च यवेभ्यो गवां वारणाय यदा दण्डोद्यमनादिकं कृतं तेनैव व्यापारेण तत्र सञ्चरन्त्यो महिष्योऽपि वारिता भवन्ति तादृशस्थले महिषीर्वारयति इति प्रयोगो न स्यादनीप्सितमहिष्या अप्यपादनत्वप्रसक्तेः । अत अनीप्सितमित्युपात्तम् । तथा युक्तमित्यस्याऽभावे विषेणौदनं भुङ्क्ते इत्यादौ करणत्वमात्रविवक्षायां विषस्य, प्रयागात्काशीं गच्छतीत्यादौ प्रयागस्य च कर्मत्वापत्तिर्दुर्वारेति तदावश्यकम् । सति च तस्मिन् प्रकृतधात्वर्थफलाश्रयत्वरूपतथायुक्तत्वाऽभावान्नोक्ताऽऽपत्तिरित्यलम् ॥

अकथितञ्च । अपादानानीत्यत्राऽपादानादिशब्दस्य भावप्रधाननिर्देशेनाऽपादानत्वादिपरत्वादिविशेषैरविवक्षितस्याऽपादानत्वादिरूपेणा (भासमानस्या) (प्रतीयमानस्य) कारकस्य कर्मत्वमित्यर्थः । अपादानादिशब्दस्य धर्मपरत्वाऽभावे प्रसक्तिपूर्विकाऽपादानत्वाद्यविवक्षायामेवाऽनेन कर्मत्वं स्यात्सर्वथा पूर्वविधेरप्रसक्तौ न स्यादित्युक्तशब्दस्य धर्मपरत्वमावश्यकम् । अपादानत्वादिविवक्षायां तु गोःपयो दोग्धीत्यादौ पञ्चम्यादय एव भवन्ति । अपादानत्वाद्यविवक्षायामन्वयितावच्छेदककर्मत्वमन्वयितावच्छेदककर्मत्वादिरूपेण विवक्षाया-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मनेन कर्मत्वमिति बोध्यम् । नचोक्तरूपेण विवक्षायां किं बीजमिति वाच्यम् । कारकत्वव्याप्यकर्मादिसंज्ञानां स्वबोध्यार्थे कर्मादौ कर्मत्वादिशक्तिमत्त्वबोधकत्वस्यैव तत्र बीजत्वात् । बोधोऽपि कर्मत्वादिशक्तिमत्त्वेनैवेति । एतत्सूत्रविहितकर्मणि विहिताया द्वितीयायाः सम्बन्धार्थकत्वं प्राचीनोक्तं खण्डयति । तथाहि—'कर्मणि द्वितीया' इत्यादिशास्त्राऽभावे सर्वत्र षष्ठ्याः प्राप्तिरिति सर्वासां द्वितीयादीनां षष्ठ्यपवादत्वं तदपवादत्वमात्रेणोक्तरूपाया द्वितीयायाः सम्बन्धाऽर्थकत्वन्न समुचितम्, तथा सति 'कर्मणि द्वितीया' इत्यस्य वैरूप्यापत्तेः । कर्तुरित्येतद्विहितकर्मणि या द्वितीया तस्याः कर्मत्वबोधकत्वं एतत्सूत्रविषये सम्बन्धबोधकत्वमिति स्पष्टमेव वैरूप्यं स्यादिति भावः । एतत्सूत्रविषयेऽपि कर्मत्वशक्तिमत्त्वेन द्वितीयाया बोधकत्वादेव, अत्र सूत्रेण कर्मत्वे सिद्धे कर्तुरिति तथायुक्तमिति च सूत्रद्वयं व्यर्थमित्याशङ्क्य, उक्तसूत्राऽभावेऽनीप्सितमात्रस्यापि कर्मसंज्ञापत्तौ वारणार्थानामित्यस्याऽनवकाशत्वादग्नेर्माणवकं वारयतीत्यत्र माणवकादपि पञ्चम्यापत्तिरित्युक्तसूत्रद्वयमवश्यं कार्य्यमित्युत्तरितं, द्वितीयायाः सम्बन्धार्थकत्वे शङ्कासमाधानयोर्भाष्यकृत्कृतोः स्पष्टैवाऽसङ्गतिरिति । दुहादिधातूनां व्यापारद्वयार्थकत्वेन कर्तुरिति कर्मत्वे सिद्धे कर्मत्वेनाऽविवक्षायामप्यनेन कर्मत्वमिति परास्तमेतेनेति दिक् ॥

ननु नटस्य गाथां शृणोतीत्यादौ नटस्य गीतद्वारा क्रियाजनकत्वेन कारकत्वादकथितञ्चेत्यनेन कर्मत्वाक्षतिः । न च तस्याऽपादानत्वविवक्षणान्नोक्तापत्तिरिति वाच्यम् । 'आख्यातोपयोगे' इत्यत्रोपयोगग्रहणादनुपयोगे नियमपूर्वकविद्यास्वीकारभिन्ने आख्यातुरपादानत्वाविवक्षाबोधनात् । न च दुहादिधातुकर्मयुक्ताभावान्न दोष इति वाच्यम् । तदंशस्यापि परिगणनलभ्यत्वादित्यत आह—दुह्याजिति ।

> दुह्याच्पच्दण्डरुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।
> कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥ १ ॥

इति षोडशधातुपरिगणनम् । अत्र श्रुधातोरसत्त्वात्परिगणितधातुकर्मयुक्ताभावेन न नटस्य कर्मत्वमिति भावः । परिगणनमिदं प्राचामनुरोधेनैव, भाष्ये तु दुहियाचिरुधिप्रच्छिभिक्षिचिब्रूञ्शासय इत्येव पठिताः । कर्मयुक्त्वं नाम कर्मसम्बद्धत्वं तच्च न सर्वत्रैकरूपं किन्तु क्वचिद्धात्वर्थव्यापारात्प्राक् । क्वचिच्च धात्वर्थव्यापाराऽनन्तरमिति प्रकारद्वयम् तत्रोक्तप्रकारद्वये ब्रुविशासिभिन्नधातुविषये धात्वर्थव्यापारात्प्रागेव कर्मसम्बद्धत्वं ब्रूशास्धातुविषये तु धात्वर्थव्यापाराऽनन्तरं कर्मसम्बद्धत्वम् । ब्रुविशासिभिन्नेऽपि, सति सम्भवे धात्वर्थव्यापारात्प्रागेव कर्मसम्बद्धत्वं ग्राह्यम् । अत एव गां पयो दोग्धि स्थाल्यामित्यादौ गोपव्यापाराऽनन्तरं स्थाल्यादेः पयः सम्बद्धत्वेऽप्यधिकरणत्वाऽविवक्षायामनेन कर्मत्वं न । तथाच तत्राऽपादानादीत्यत्रादिशब्देनाऽपादानसम्प्रदानाऽधिकरणानामेव ग्रहणं, करणस्य तु न हस्तादेः करणस्य पय आदिकर्मयोगाऽभावात् ॥

गां दोग्धि पय इति—अन्तःस्थितद्रवद्रव्यनिष्ठविभागानुकूलव्यापारो दुहेरर्थः । न च 'अकथितञ्च' इत्यस्येदमुदाहरणं व्यर्थम्, गौः पयस्त्यजति गवा पयस्त्याजयतीत्यर्थे पूर्वसूत्रेणैव कर्मत्वसिद्धेरिति वाच्यम् । व्यापारद्वयस्य धात्वर्थत्वे पूर्वसूत्रेण कर्मत्वसिद्धावप्येकव्यापारार्थकत्वे एतत्सूत्रोदाहरणस्य साफल्यात् । तत्र गोरपादानत्वाविवक्षायामनेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कर्मत्वम् , अपादानत्वविवक्षायां तु पञ्चम्येव, पयसि गोरन्वये षष्ठी, द्विकर्मकेषु गवादीनां कर्मत्वाऽविवक्षया क्रियायामन्वये न षष्ठी, अनभिधानात् षष्ठ्यन्तस्य स्वान्वययोग्यानाम-समभिव्याहारे एवान्वयस्योत्सर्गतो व्युत्पत्तेश्च । देवदत्तकर्तृकं पयःकर्मकं गोसम्बन्धि दोहनमिति बोधे पञ्चमी । देवदत्तकर्तृकं गोसम्बन्धि पयःकर्मकं दोहनमिति बोधे गोशब्दा-त्षष्ठीति बोध्यम् ।

बलिं याचते वसुधामिति—स्वीकाराऽनुकूलव्यापारः परस्वत्वनिवृत्तिस्वस्वत्वो-त्पत्त्युभयाऽनुकूलव्यापारो वा याचतेरर्थः । स्वत्वे बलेर्निरूपकत्वसम्बन्धेनान्वयेऽनेन कर्म-त्वम् । पूर्वविषयस्य कस्याऽप्यभावेनाऽप्राप्तिपूर्विकाऽविवक्षा बोध्या । नचाऽपादानत्वस्य प्रसक्त्या कथमप्राप्तिपूर्विकाऽविवक्षेति वाच्यम् । विभागस्योक्तधात्वर्थत्वाऽभावेनाऽपादा-नत्वाऽप्रसक्तेः । उक्तं हि भाष्ये–(न हि याचनादेवाऽपायो भवति याचितोऽसौ यदि ददाति तदाऽपायेन युज्यते) इति । असंकीर्तितपर्य्यायस्याऽकथितशब्दस्य ग्रहणे गां दोग्धि गोर्दोग्धि इति च याचिपृच्छिभिक्षयोगे कर्मसंज्ञैवेत्येषां व्यवस्थेति सिद्धान्ते कैयटोक्तिश्च । बलेर्वसुधानिष्ठस्वनिरूपितस्वामित्वात्मकसम्बन्धात्कर्मयुक्तत्वादनेन कर्मत्वमिति भावः ॥

अविनीतं विनयं याचत इति–इदमवश्यं करिष्यामीति शब्दप्रयोगजनकविशेष-रूपस्वीकाराऽनुकूलव्यापारोऽत्र याचेरर्थः । फलतावच्छेदकसम्बन्धश्चात्र विषयतेति अवि-नीतस्य विनयेन सह स्वविषयकज्ञानवत्त्वसम्बन्धेन कर्मयुक्तत्वात्कर्मत्वम् ॥

तण्डुलानोदनं पचतीति—विक्लित्त्यनुकूलव्यापारो हि पच्धात्वर्थः । वस्तुतस्तु (द्व्यर्थः पचिरि)ति भाष्याद्विक्लेदनं निर्वर्त्तनं च धातोरर्थः तण्डुलान्विक्लेदयन्नोदनं निर्व-र्त्तयतीति वाक्यार्थः । तण्डुलकर्मकविक्लित्तिपूर्वकौदनकर्मकं निर्वर्त्तनमिति बोधः । तथा च पच्धात्वर्थस्योक्तरूपत्वाकर्त्तुरित्यनेनैव कर्मत्वसिद्धावस्यैतत्सूत्रोदाहरणत्वं चिन्त्यम् ॥

गर्गान् शतं दण्डयतीति—बलात्कारपूर्वकपरस्वत्वनिवृत्तिपूर्वकस्वस्वत्वोत्पत्त्य-नुकूलव्यापारो दण्डयतेरर्थः । वस्तुतस्तु स्वसम्प्रदानानुकूलव्यापाराऽनुकूलशासनरूपो धा-त्वर्थः । तथा च व्यापारद्वयार्थकदण्डयादिधातुयोगेऽपि पूर्वसूत्रेणैव कर्मत्वसिद्धाविदमप्ये-तत्सूत्रोदाहरणं चिन्त्यमेव । एवं व्यापारद्वयार्थकत्वेन सति प्रयोगे बहूनां धातूनां द्विक-र्मकत्वं बोद्धयम् ॥

व्रजमवरुणद्धि गामिति—निर्गमप्रतिबन्धपूर्वकयत्किञ्चिदधिकरणकचिरस्थित्य-नुकूलव्यापारोऽवरुधेरर्थः । व्रजे गौस्तिष्ठति तत्र तां निर्गमप्रतिबन्धपूर्वकं चिरं स्थापय-तीति प्रतीतेः । तथाचैकाश्रयको गोवृत्तिनिर्गमप्रतिबन्धानुकूलो व्रजसम्बन्धीति बोधः । अधिकरणत्वाऽविवक्षायामनेनात्र कर्मत्वम् । व्यापारद्वयस्य धात्वर्थत्वे पूर्वसूत्रेणैव कर्मत्वम् ॥

माणवकं पन्थानं पृच्छतीति—जिज्ञासाविषयीभूतार्थज्ञानानुकूलः केन पथा गन्तव्यमित्यभिलापादिरूपो व्यापारः पृच्छतेरर्थः । ज्ञानविषयत्वात्पथः कर्मत्वं माणवकेन च पथः स्वज्ञानाश्रयत्वरूपः सम्बन्धः । (नहि प्रश्नादेवाऽपायो भवति पृष्टोऽसौ यदा व्या-चष्टे तदापायेन युज्यत) इति भाष्योक्त्या नात्राऽपादानत्वविवक्षेति बोध्यम् । न च सम्प्र-दानत्वस्यैव विवक्षाऽस्त्विति वाच्यम् । कर्मसम्बन्धवत्त्वेनेच्छाविषयत्वाऽभावेन तद्विव-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षाया असम्भवात् । अत्रापि व्यापारद्वयार्थकत्वे कर्त्तुरिति सूत्रेण कर्मत्वं बोद्धयम् । पथविषयकजिज्ञासाविषयकमाणवकवृत्तिज्ञानाऽनुकूलो देवदत्तकर्तृको व्यापार इति बोधः ।

वृक्षमवचिनोति फलानीति—अत्र ग्रहणाऽनुकूलव्यापारोऽवचिनोतेरर्थः । तथा च फलवृत्तिग्रहणाऽनुकूलव्यापारो देवदत्तवृत्तिरिति बोधः । शेखरकारस्तु—वृक्षात्फलान्यादत्ते इत्यर्थाद्विभागपूर्वकदानस्य धात्वर्थत्वमभ्युपगच्छति । अपादानत्वाऽविवक्षायामनेन कर्मत्वम् ।

माणवकं धर्मं ब्रूते इति—ज्ञानाऽनुकूलः शब्दप्रयोगरूपो व्यापारो ब्रूधात्वर्थः । एवञ्च देवदत्तवृत्तिः शिष्यसम्बन्धी धर्मविषयकज्ञानजनको व्यापार इति बोधः । केचित्तु—वदिवचिब्रुवि-उपदिशि-याचतीनां प्रतिपत्त्यवच्छिन्नव्यापारोऽर्थः । शिष्यनिष्ठप्रतिपत्तौ शिष्यस्याधेयत्वसम्बन्धेनाऽन्वयः । तत्रैव धर्मस्य विषयतासम्बन्धेनान्वयः । तथा च धर्मविषयिणी या शिष्यनिष्ठा प्रतिपत्तिस्तदनुकूलो देवदत्तवृत्तिर्व्यापार इति बोध इत्याहुः ॥

माणवकं धर्मं शास्तीति—प्रवृत्तिपर्यवसायी ज्ञानाऽनुकूलः शब्दप्रयोगरूपो व्यापार एव शास्धात्वर्थः । एवं च शिष्यसम्बन्धी प्रवृत्तिपर्य्यवसायी धर्मप्रतिपादकशब्दकर्मकोच्चारणानुकूलो देवदत्तवृत्तिर्व्यापार इति बोधः । प्रवृत्तिपर्य्यवसायी च धर्मं कुरु इत्यादिविधिघटितोपदेशरूपो बोध्यः । फलतावच्छेदकः सम्बन्धश्चात्र विषयता । माणवकस्य वचनादिकर्मणा धर्मेणेच्छाविषयीभूतत्वात्सम्प्रदानत्वं तस्याविवक्षणेऽनेन कर्मत्वं बोध्यम् । कर्त्तुव्यापारोत्तरं माणवकस्य धर्मेण स्वविषयकज्ञानाश्रयत्वरूपः सम्बन्ध इति ॥

शतं जयति देवदत्तमिति—अनेकव्याजपूर्वकोऽन्यस्वत्वनिवृत्तिपूर्वकः स्वस्वत्वोत्पत्त्यनुकूलो व्यापारो जिधात्वर्थः ॥

सुधां क्षीरनिधिं मथ्नातीति—दण्डग्रहणपूर्वकोऽन्तर्गतसारभागोत्थानाऽनुकूलव्यापारो मन्थेरर्थः । उत्थानञ्चात्रोर्ध्वदेशसंयोगः ॥

देवदत्तं शतं मुष्णातीति—धनस्वाम्यज्ञानपूर्वकग्रहणाऽनुकूलव्यापारोमुष्धात्वर्थः । अत एव विभागस्य धात्वर्थान्तर्भावे देवदत्तस्याऽपादानत्वं तदविवक्षायामनेन कर्मत्वम् ॥

ग्राममजां नयति हरति कर्षति वहति वेति—उत्तरदेशसंयोगानुकूलव्यापारानुकूलव्यापारो णिधात्वर्थः । स्कन्धग्रहणपूर्वक उक्तधात्वर्थ एव वहधात्वर्थः । गत्यनुकूलव्यापारविशेषः कृषतेरर्थः । बलाद्ग्रहणपूर्वकं देशान्तरप्रापणं हृधात्वर्थः । एषामुक्तार्थे कर्त्तुरित्येव कर्मत्वम् । एवञ्च ग्रामसम्बन्धी अजानिष्ठोत्तरदेशसंयोगाऽनुकूलव्यापारो देवदत्तवृत्तिरिति बोधः । एवं भारं वहतीत्यादावपि बोध्यः ॥

अर्थनिबन्धनेयं संज्ञेति—अकथितञ्चेत्यनेन या संज्ञा साऽर्थनिबन्धनाऽर्थनिमित्तिका, न तु स्वरूपाऽऽश्रया स्वरूपनिमित्तिकेति तदर्थः । नचैतत्सूत्रविहितकर्मसंज्ञाया अर्थनिमित्तकत्वे किम्प्रमाणमिति वाच्यम् । तद्राजसूत्रस्थभाष्यकैयटयोरेव प्रमाणत्वात् । तत्र हि, (अहमपीदमचोद्यं चोद्ये) इत्युक्तम् । असौ अस्मान्मामचोद्यं चोदयतीति तदर्थः । तत्र पृच्छिपर्य्यायस्य चुदेरपि द्विकर्मकत्वं दृश्यते उक्तसंज्ञायाः स्वरूपनिमित्तकत्वे उक्तभाष्यकैयटौ व्याकुप्येयाताम् । चोद्ये इत्यत्र कर्मणि प्रत्यये अस्मच्छब्दात्प्रथमा इदम्शब्दाद्द्वितीया, अत एव 'मारीचमुच्चैर्वचनं महार्थम्' इति भट्टिकाव्यप्रयोगोपपत्तिरिति प्राञ्चः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शेखरकृतस्तु—परिगणिताऽतिरिक्तानां परिगणितधातुसमानार्थकानां येषां धातूनां द्विकर्मकत्वमिष्टं तेषां व्यापारद्वयार्थकत्वात्कर्त्तुरित्येव कर्मत्वसिद्धौ सञ्ज्ञाया अर्थनिमित्तकत्वमनादेयम्। अत एव, न 'आख्यातोपयोगे' इति सूत्रस्थभाष्यपरिगणनभङ्गापत्तिः। तस्या अर्थनिमित्तकत्वे तु भाष्योक्तपरिगणनस्य स्पष्टैवाऽसङ्गतिः, तत्समानार्थकानामन्येषामपि द्विकर्मकत्वात्। किञ्चोभयार्थकयाचिग्रहणेनैव बलिं भिक्षते वसुधामित्यादावपि कर्मत्वसिद्धौ परिगणने भिक्षधातुग्रहणस्य वैयर्थ्यापत्तेश्चेत्याहुः॥

अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यमिति—वार्त्तिकम्। सत्यकर्मकधातुयोगे देशकालभावगन्तव्याध्ववाचकशब्दानां कर्मसंज्ञा वक्तव्येति तदर्थः। अकर्मकधातूनां स्वार्थकरणकव्यापने शक्तिस्तथा च स्वार्थकरणकव्याप्त्यनुकूलव्यापार इत्यर्थे मासमास्ते इत्यादौ व्याप्तिरूपफलाश्रयत्वान्माणवकस्य कर्त्तुरिति कर्मत्वम्। देवदत्तकर्तृकासनकरणकमाससम्बन्धिव्याप्त्यनुकूलव्यापार इति बोधः। अत्र देशपदेन देशत्वाऽवान्तरधर्मवान् कुरुपञ्चालादिरेवगृह्यते न तु सामान्यतो देशः, नवा ग्रामत्वादिना ग्रामः। अत एव कुरून् स्वपिति तिष्ठति वेति प्रयोगो भवति, न भवति देशं ग्रामं वा स्वपिति तिष्ठति वेति प्रयोगः। कालपदेन च कालत्वाऽवान्तरधर्मवान् माससम्वत्सरादिरेव गृह्यते न तु सामान्यतः कालः। एवञ्च मासं सम्वत्सरं वाऽऽस्ते इति प्रयोगो भवति न कालमास्त इति। भावपदेन च गोदोहनादिरेव न तु तदतिरिक्तः, तेन गोदोहमास्ते इति प्रयोगः। न च गोदोहादिशब्दस्य कालार्थकत्वात्कालग्रहणेनैवोक्तप्रयोगोपपत्तौ भावग्रहणं व्यर्थमिति वाच्यम्। घञन्तेन प्रतिपाद्यमानस्यापि कालस्य कर्मत्वं भवतीति प्रपञ्चार्थत्वेन भावग्रहणस्य साफल्यात्। अध्वपदेनाध्वत्वाऽवान्तरधर्मवतः क्रोशयोजनादेरेव ग्रहणं न तु सामान्यतोऽध्वनः। तेन क्रोशं योजनं वाऽऽस्ते देवदत्त इति भवति नतु अध्वानमास्ते इति।

प्राचीनोक्तं प्रकृतवार्तिकस्य कर्मसंज्ञाविधायकत्वं खण्डयति। भाष्ये कर्मसञ्ज्ञाविधायकत्वेनादृष्टत्वान्नास्य कर्मसंज्ञाविधायकत्वम्। नचास्य वचनस्यैवोक्तसंज्ञाविधायकत्वमस्तीति वाच्यम्। अकर्मकधातुप्रकृतिकण्यन्ताः कथं द्विकर्मका इति पूर्वपक्षे जाते।

"कालभावाऽध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्"।

देशश्चे, त्येवाकथितसूत्रे भाष्ये उक्तत्वात्। तत्र प्रसिद्धार्थकहिशब्दप्रयोगात्कालादिं कर्मं प्रसिद्धमेव पूर्वसूत्रबोधितमेवेति बोध्यते। नच हिशब्दस्य वाक्यालंकारार्थत्वादुक्ताऽभिप्रायकत्वाऽभावेनास्य विधायकत्वे न किमपि प्रतिबन्धकमिति वाच्यम्। कालाऽध्ववाचकयोः कर्त्तुरित्येव कर्मत्वसिद्धौ कालाध्वानौ कर्मवदिति वार्त्तिकं व्यर्थमितिरीत्यास्य वार्त्तिकस्य प्रत्याख्याने घटं करोतीत्यादाविव प्राकृतमेवैतत्कर्मं पूर्वसूत्रबोधितमेवेति 'कालाध्वनोः' इतिसूत्रस्थभाष्योक्तैरेव प्रतिबन्धकत्वात्। अस्याऽविधायकत्वादेव, समायां समायां विजायत इति विग्रहकथनपरस्य 'समां समां विजायते' इति सूत्रस्थभाष्यस्य सङ्गतिः। अन्यथाऽनेन द्वितीयाया एव साधुत्वात्तदसङ्गतिः। तस्मादुक्तप्रकारेणाऽकर्मकधातूनां कालादिकर्मत्वाद्द्विकर्मकत्वमित्येव तत्तात्पर्य्यमित्यलम्॥

गतिबुद्धिप्रत्यवसानार्थेति—गत्यर्थकबुद्ध्यर्थकप्रत्यवसानार्थकशब्दकर्मकाऽक-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्मकधातूनामनुत्पन्ने णिचि तस्य कर्तुरुत्पन्ने णिचि कर्मत्वमिति तदर्थः । शब्दकर्मकेत्यत्र कर्मपदं कर्मकारकपरं न तु 'कर्तरि कर्मव्यतीहारे' इत्यत्रेव क्रियापरं व्याख्यानात् । अत एव शब्दार्थकह्वायिक्रन्दिधात्वोरण्यन्तावस्थकर्तुर्ण्यन्तावस्थायां न कर्मत्वम् । णिच्पदं चात्र हेतुमण्णिच एव बोधकं न तु स्वार्थणिचः । सूत्रघटकणिच्पदस्य हेतुमणिज्बोधकत्वादेव (भक्षेरहिंसार्थस्य न) इति निषेधश्चरितार्थः । अन्यथा नित्यण्यन्तस्य चौरादिकस्य भक्षेरण्यन्ताऽवस्थाऽसम्भवात्तत्कर्तुः कर्मत्वाऽप्राप्त्या निषेधो व्यर्थ एव स्यादिति भावः । ननु णिच्प्रकृतिकधात्वर्थव्यापारप्रयोज्यफलाश्रयस्येव णिजर्थव्यापारप्रयोज्यफलाश्रयस्यापि कर्तुरित्येव कर्मत्वसिद्धौ गतिबुद्धीति सूत्रं व्यर्थमिति चेन्न । णिजर्थव्यापारप्रयोज्यफलाश्रयाणां कर्मत्वं चेत्तर्हि गत्यर्थादिप्रकृतिकानामेवेति नियमार्थत्वेन तस्य सार्थक्यात् । तेन पाचयत्योदनं देवदत्तेनेत्यादौ न देवदत्तस्य कर्मत्वम् । पूर्वसूत्रे णिजर्थव्यापारप्रयोज्यफलाश्रयातिरिक्तत्वेन संकोचेन सूत्रस्य स्वांशे चारितार्थ्यमिति । गतीत्यादि किमित्यादिना तदेवाऽनूद्यते इति बोध्यम् ॥

अण्यन्तानां किमिति । अयम्भावः, सूत्रेऽणीत्यस्याऽभावेन कर्तुः कर्मत्वमित्यर्थे गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्र इत्यादौ देवदत्तस्यापि कर्मत्वं दुर्वारम् , तत्सत्त्वे तु देवदत्तस्याऽण्यन्तावस्थायां कर्तृत्वाऽभावेन नोक्तापत्तिरिति । उक्तस्थले बोधस्तु यज्ञदत्तकर्मकगमनाऽनुकूलदेवदत्तकर्तृकव्यापारानुकूलविष्णुमित्रकर्तृको व्यापार इति दिक् ॥

नियन्तृकर्तृकस्येति । ननु वहधातोर्वाहकर्तृकत्वान्नियन्तृकर्तृकत्वाऽभावेन निषेधप्रतिषेधोऽनुपपन्न इति चेन्न । नियन्तृकर्तृकण्यन्तप्रकृतिभूतस्य वहेरित्यर्थे तदुपपत्तेः । न च प्रापणार्थकस्य वहेर्गत्यर्थत्वाभावात्कर्मत्वाऽप्राप्त्या तन्निषेधवार्त्तिकारम्भो व्यर्थ इति वाच्यम् । ग्रामं प्राप्त इत्यादौ गतिं विना ग्रामप्राप्त्यसम्भवादाक्षिप्तगत्याऽपि गत्यर्थत्वमित्यभिमानेन तदारम्भस्य सार्थक्यादिति ॥

ननु (गतिबुद्धी) तिसूत्रे बुद्धिपदेन ज्ञानस्य ग्रहणाच्चक्षुरादीन्द्रियजन्यज्ञानार्थकानां धातूनां बुद्ध्यर्थत्वात्सूत्रेणैव (दृशेश्चेति) वार्त्तिकोदाहरणस्यापि गतार्थत्वाद्वार्त्तिकं व्यर्थमेवेत्याशङ्क्य समाधत्ते—**सूत्रे ज्ञानसामान्यार्थानामेवेति** । उक्तवार्त्तिकं व्यर्थं सज्ज्ञापयति गतिबुद्धीतिसूत्रे बुद्ध्यर्थपदेन ज्ञानसामान्यार्थानामेव ग्रहणं न तु ज्ञानविशेषार्थानामिति । एवञ्च सूत्रेण वार्त्तिकोदाहरणस्यागतार्थत्वात्तदावश्यकमिति स्वांशे चारितार्थ्यं जातं, फलञ्च ज्ञापनस्य स्मारयति घ्रापयति देवदत्तेनेत्यादौ देवदत्तस्य कर्मत्वाऽभावरूपमिति भावः ॥

ननु शब्दं करोतीत्यर्थे 'शब्दवैरकलहे'ति क्यङि तदन्ताण्णिचि शब्दायिधातोर्धात्वर्थेनोपसंगृहीतस्य शब्दरूपकर्मणो धात्वर्थकुक्षिप्रविष्टत्वेनाऽकर्मत्वाद्गतिबुद्धीति सूत्रेण कर्मसंज्ञा दुर्वारेत्यत आह-**शब्दायतेर्नेति** । शब्दायधातोरणि कर्तुः णौ कर्मत्वं नेति तदर्थे शब्दाययति देवदत्तेन यज्ञदत्त इत्यादौ न देवदत्तस्य कर्मत्वापत्तिरिति दीक्षिताऽऽशयः ॥

नागेशास्तु—शब्दकर्मेत्यत्र कर्मपदस्य क्रियापरत्वे शब्दक्रियाणामित्यर्थेऽकर्मकत्वात्प्राप्तगतिसंज्ञावारणाय ह्वाययति शब्दाययति क्रन्दयतीनां कर्मत्वप्रतिषेधस्य भाष्यकृतोक्तत्वाच्छब्दकर्मकाणामित्यर्थे तदुक्त्याऽस्य धातोः शब्दरूपकर्मणो धात्वर्थेनोपसंगृहीत-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वेऽपि ह्यतेरिव बहिर्भूतपुत्रादिकर्मणः सम्भवेन तदभावे विनिगमकाऽभावादकर्मकत्वाऽभावेन कर्मत्वाऽप्राप्त्या तन्निषेधार्थं वार्त्तिकमिदं व्यर्थमेवेत्याहुः॥

ननु गतिबुद्धीति सूत्रेऽकर्मकपदस्य न विद्यते कर्म येषामित्यर्थे सकर्मकाणामपि कर्मणोऽविवक्षयाऽकर्मत्वाद्देवदत्तेन पाचयतीत्यादौ देवदत्तस्यापि कर्मत्वापत्तिरित्यत आह—येषां देशकालादिभिन्नं कर्म न सम्भवतीत्यादि। अयम्भावः—नियमस्य सजातीयाऽपेक्षत्वात् गतिबुद्धीति सूत्रस्य सकर्मकधातुप्रकृतिकणिजर्थव्यापारप्रयोज्यफलाश्रयाणां कर्मत्वं चेत्तर्हि गत्यर्थादीनामेवेति नियमार्थत्वेनाऽऽसयत्सलिले पृथ्वीमित्यादौ पूर्वसूत्रेणैव कर्मत्वसिद्धौ सूत्रेऽकर्मकपदेन सामर्थ्याद्देशकालादिभिन्नकर्माऽभाववतो ग्रहणादवतरणद्लोकप्रयोगस्थधातोर्देशकालाद्यतिरिक्तस्यौदनादिरूपकर्मणः सत्त्वेन तदविवक्षणेऽप्यकर्मकपदेनाऽग्रहणान्नोक्तापत्तिशङ्काकलङ्कणिकेति प्राञ्चः॥

शेखरकृतस्तु—अविवक्षितकर्मकेभ्यो धातुभ्यः कृतपूर्वीकटमित्यादौ भाष्यकृता कैयटेन च भावे क्तादीनामङ्गीकारादत्र सूत्रे अर्मकपदेनाऽविवक्षितकर्मकाणामपि ग्रहणम्। 'णेरणावि'ति सूत्रे कैयटेन निवृत्तव्यापाराल्लुधातोर्णिचि (१)लावयति केदारं देवदत्त इत्यादौ कर्मद्वितीयान्तकेदारस्य प्रयोगाच्चोक्तविधानामप्यकर्मकपदेन ग्रहणम्। नचाऽर्थान्तरे शक्त्या तस्याऽकर्मकत्वं न त्वविवक्षयेति वाच्यम्। (२)तत्त्वप्रत्यभिज्ञयाऽर्थान्तरत्वाभावेन तत्र शक्तेर्वक्तुमशक्यत्वात्। अर्थान्तरे वृत्तेरित्यस्योदाहरणन्तु नदी स्यन्दते इत्याद्यर्थकं नदी वहतीत्यादीत्याकरे स्पष्टम्। कर्मणः शेषत्वविवक्षयाऽकर्मकत्वेन मातुः स्मर्य्यत इत्यादौ भावे लस्य 'अधीगर्थे'ति सूत्रे भाष्ये उदाहृतत्वेनाऽविवक्षितकर्मकाणामप्यकर्मकाणामप्यकर्मकपदेन ग्रहणमित्याहुरित्यलम्॥

ननु (एष्वर्थेष्वभिनिविष्टानामि)ति समर्थसूत्रस्थभाष्यप्रयोगात् 'अभिनिविशश्चे'त्यत्र 'परिक्रयणे सम्प्रदानमि'तिसूत्रादन्यतरस्यांग्रहणाऽनुवृत्तिरित्याह—परिक्रयणे सम्प्रदानमित्यादि। सूत्रेऽविकृतरूपश्रवणादविकृताया अभिनिविशित्यानुपूर्व्या यत्र श्रवणं तत्रैव 'अभिनिविशश्चे'त्यस्य प्रवृत्तिरिति कल्पनेनोक्तभाष्यप्रयोगे पापेऽभिनिवेश इत्यत्र चाऽऽपत्तिपरिहारादन्यतरस्यां ग्रहणाऽनुवृत्तौ व्यवस्थितविभाषाऽऽश्रयणे च प्रमाणाऽभावान्मूलोक्तमयुक्तमेवेति।

नच—

निविशते यदि शूकशिखापदे सृजति सा कियतीमिव न व्यथाम्।

इति नैषधीयपद्ये का गतिरिति वाच्यम्। अभिनिविशितिसंघातस्य विवक्षणेन तादृशसंघातपूर्वस्यैव विशतेराधारस्य कर्मत्वविधानेन तत्रोक्ताऽऽपत्तेरयोगादिति नागेशा इति दिक्॥

ननु मशकार्थो धूम इत्यर्थ इव भाष्योक्तस्याश्यर्थस्य नेत्यस्याऽशिनिवृत्यर्थस्य नेत्य-

(१) द्विधाभवनाऽनुकूलव्यापारो हि लुनातेरर्थः। तत्र व्यापारत्यागे लूयते केदारः स्वयमेव, पुनस्तस्यैव केदारस्य प्रयोज्यत्वविवक्षया लावयति केदारं देवदत्त इति भवति। अत्र सूत्रेऽकर्मकपदेनाऽविवक्षितकर्मकस्याग्रहणे स्पष्टैव तादृशप्रयोगाऽनुपपत्तिरिति भावः॥

(२) फले पूर्वकालज्ञातफलाभेदस्य तदेवेदमिति तत्वप्रत्यभिज्ञयेत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्थस्तत्फलितमाह—अभुक्त्यर्थस्य नेति । भाष्ये तु एतस्योदाहरणस्य वने उपविश्य त्रिरात्रमुपवसतीत्यर्थाश्रयणादिदं प्रत्याख्यातम् । नचैवमुपोष्य रजनीमेकामित्यादौ का गतिरिति वाच्यम् । 'कालाध्वनोरि'त्यनेनैव तत्र द्वितीयोपपत्तेरित्यलम् ॥

उपपदविभक्तिमाह—उभसर्वतसाविति । उभसर्वयोस्तसौ उभसर्वतसौ उभांशे उभयशब्दनिष्ठप्रकृतिकत्वस्योभशब्दे आरोपादुभयशब्दप्रकृतिकत्वं षष्ठ्यर्थः । उपपदविभक्तीनां सम्बन्धोऽर्थ इति बोध्यम् । उभयशब्दसर्वशब्दप्रकृतिकतसन्तयोगे द्वितीयेति कारिकार्थः । धिगिति—धिक्शब्दयोगेऽपि द्वितीया कार्य्येति तदर्थः । धिक् कृष्णाऽभक्तमित्यस्य कृष्णाऽभक्तसम्बन्धिनिन्देत्यर्थः । आम्रेडितान्तेष्विति—कृतद्विर्वचनेष्वित्यर्थः । इदमुपर्य्यादिष्वित्यस्य विशेषणं तेन—

उपर्युपरिबुद्धीनां चरन्तीश्वरबुद्धयः ।

इत्यत्र न द्वितीयाप्रसक्तिः । उपरिबुद्धीनामुपरीत्यर्थेन तस्याम्रेडितान्तत्वाऽभावात् । ततोऽन्यत्राऽपीति—अन्यशब्दयोगेऽपि द्वितीयेति तदर्थः । तेन

फलति पुरुषाऽऽराधनमृते, आषाढीं यावच्छुद्धः,
आरभ्य तस्यां दशमीं तु यावत्प्रपूजयेत्पर्वतराजपुत्र्याः ।

इत्यादिषु ऋते शब्दयोगे यावच्छब्दयोगे च द्वितीयासिद्धिरिति दिक् ॥

(१)जपमनुप्रावर्षदिति—लक्षणत्वञ्च ज्ञानजनकज्ञानविषयत्वम् । ज्ञानजन्यज्ञानविषयत्वं लक्ष्यत्वम् , तथा च जपस्य वर्षाज्ञानजनकज्ञानविषयीभूतत्वाल्लक्षणत्वेन तस्मिन्ननुद्योत्ये सति अनोः कर्मप्रवचनीयत्वेन तद्योगे लक्षणवाचकाज्जपशब्दाद्द्वितीया । जपाऽभिन्नहेतुज्ञानजन्यज्ञानविषयो वर्षणमिति बोधः ॥

ननु हेतुतृतीयायाश्च सावकाशत्वात्स्वस्वांशे लब्धाऽवकाशरूपतुल्यबलविरोधस्य सत्त्वाद्विप्रतिषेधसूत्रप्रवृत्त्या परत्वात्तृतीयाऽऽपत्त्या नदीमन्ववसितेति द्वितीयाघटितरूपं न स्यादित्याशंक्य समाधत्ते—परापि हेताविति तृतीय ऽनेन बाध्यत इति—लक्षणेत्थंभूताख्यानेति सूत्रेणैव सञ्ज्ञासिद्धावनुर्लक्षणे इत्यनेन पुनः संज्ञाविधानसामर्थ्यात्परस्या अपि तृतीयाया बाधेनोक्तप्रयोगोपपत्तौ न कापि बाधा दृष्टिगोचरीभूता भवतीति भावः । न च लक्षणेत्थम्भूताऽऽख्यानेति सिद्धसंज्ञाया जपमनुसिञ्चतीत्यत्र षत्वाऽभावसाधकत्वेन चारितार्थ्याद्द्वितीया विधायकत्वे मानाऽभावेन तदर्थमनुर्लक्षणे इत्यस्यावश्यकत्वात्पुनः संज्ञाविधानसामर्थ्यादिति कथनमनुपपन्नमिति वाच्यम् । लक्षणेत्थमिति सूत्रस्योपसर्गसंज्ञाबाधनेन चारितार्थ्येऽपि कर्मप्रवचनीयेति सूत्रे तदुपस्थित्या द्वितीयाप्राप्तेः सुलभत्वेन अनुर्लक्षणे इत्येतद्विहितसंज्ञाया निरवकाशत्वस्य स्पष्टत्वादिति दिक् ।

नदीमन्ववसितेति—नद्या सह सम्बद्धेत्यर्थः । तत्र तृतीयार्थोऽनुद्योत्यं साहित्यं तच्च प्रकृतेऽनुयोगित्वलक्षणमेव तथा च नद्यनुयोगिकसम्बन्धप्रतियोगित्ववती सेनेति बोधः॥

अपिः पदार्थेति—पदस्याऽप्रयुज्यमानपदान्तरस्याऽर्थः पदार्थः तद्द्योतकोऽपिः कर्मप्रवचनीयसंज्ञको भवतीत्यर्थः । सर्पिषोऽपीति—अत्राऽप्रयुज्यमानस्य बिन्दुरित्यादेः पदस्याऽर्थोऽपिद्योत्यः । सम्भावनायां लिङिति—'उपसंवादाऽऽशङ्कयोश्चे'ति सूत्रस्थभा-

(१) कदा वृष्ट इति कस्यचित्प्रश्ने इदमुत्तरमिति बोध्यम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्यपठितेन (उपसंवादाशङ्कयोर्लिङ्) इति वार्त्तिकेनेति भावः । तत्राऽऽशङ्कोत्प्रेक्षा, सम्भावनापि उत्कटकोटिकाऽऽशंकैव । अपेः कर्मप्रवचनीयत्वात्तद्द्योत्यसम्बन्धमाह, **तस्या एवेति**—सम्भावनाया एवेत्यर्थः । **विषयीभूते भवने इति** । प्रकृतार्थभवने इत्यर्थः । **कर्तुर्दौर्लभ्यमिति**—अत्र कर्तुर्दौर्लभ्यमिति षष्ठीतत्पुरुषो बोध्यः । स्वदौर्लभ्यप्रयुक्तदौर्लभ्यवत्त्वरूपसम्बन्धोऽपिद्योत्यः । बिन्दुना कर्तृत्वादुक्तसम्बन्धेन स्यात्पदवाच्यक्रियायामन्वीयते इत्यर्थः । तदाह—**अपिशब्दबलेनेत्यादि**—एवञ्च सर्पिरवयवबिन्दुदौर्लभ्यप्रयुक्तदौर्लभ्यवती तत्कर्तृका सम्भावनेति बोधः । नन्वेवं कर्मप्रवचनीयसंज्ञकापिद्योत्येऽर्थे सर्पिषोन्वयेन तस्य कर्मप्रवचनीययुक्तत्वाद्द्वितीया स्यादित्याशङ्क्य समाधत्ते—**द्वितीया तु नेह प्रवर्त्तत इति** । सर्पिषो बिन्दुना योगो, नत्वपिना । न च परम्परया तेनाऽपि योग एवेति वाच्यम् । कर्मप्रवचनीयद्योत्योक्तसम्बन्धेनाऽपिशब्देऽन्वयाऽभावात् । एवञ्च न द्वितीयाऽऽपत्तिः । कर्मप्रवचनीयद्योत्यसम्बन्धप्रतियोगिवाचकाद्द्वितीयेत्यर्थे प्रकृतेऽपिद्योत्यस्योक्तसम्बन्धस्य विन्दुः प्रतियोगी न ततो द्वितीया, स्पष्टप्रतिपत्त्यर्थमपिद्योत्यबिन्दोः प्रयोगेऽपि (उपपदविभक्तेरि)ति न्यायेन द्वितीयां बाधित्वा प्रथमैवेति । अपेः कर्मप्रवचनीयत्वे फलमाह—**अनुपसर्गत्वादिति**—अपेः कर्मप्रवचनीयत्वेनोपसर्गत्वाऽभावात् स्यादित्यत्र न षत्वमिति दिक् ॥

कालाध्वनोः—अत्यन्तसंयोगो निरन्तरं सम्बन्धः । स च गुणक्रियाद्रव्यैरभावेन च । तेन मासं भोजनाऽभाव इत्यादि सिद्धम् । गुणादिभिः कालाध्वनोरत्यन्तसंयोगे सति प्रत्यासत्त्या कालाऽध्ववृत्तिभ्यां द्वितीयेत्यर्थः । उदाहरणन्तु, मासमधीत इत्यादि । बुद्धिस्थयावदवयवसम्बन्धरूपा व्याप्तिर्द्वितीयार्थः । नचैकादश्यां रात्रौ जागृयादित्यादावपि द्वितीया दुर्वारेति वाच्यम् । अधिकरणत्वविवक्षणाद्द्वितीयाया अप्राप्तेः ॥

इति द्वितीया ॥

अथ करणकारकप्रकरणम् ।

स्वतन्त्रः कर्त्ता—स्वातन्त्र्यञ्च, कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वम् । नचोक्तस्वातन्त्र्यलक्षणे कर्तृप्रत्ययसमभिव्याहार इति विशेषणं व्यर्थं तद्रहितलक्षणेनैवाऽभीष्टसिद्धेरिति वाच्यम् । कर्मप्रत्ययस्थले पक्वस्तण्डुलो देवदत्तेनेत्यादौ धात्वर्थस्य फलस्य प्राधान्यात्तदाश्रयस्य तण्डुलस्य कर्तृत्वापत्तेर्दुर्वारतया देवदत्तस्य तदनापत्त्या तदर्थमुक्तविशेषणस्य सार्थक्यात् । एवञ्च धात्वर्थव्यापाराश्रयत्वं स्वतन्त्रत्वमिति तल्लक्षणं फलितम् । नचैवं देवदत्तेन पाचयति यज्ञदत्त इत्यादौ णिजर्थव्यापाराश्रयस्य धात्वर्थव्यापाराऽऽश्रयत्वाऽभावात्कर्तृत्वं न स्यादिति वाच्यम् । णिचो द्योतकत्वेन द्वितीयव्यापारस्यापि धात्वर्थत्वात्तदाश्रयस्य यज्ञदत्तस्य कर्तृत्वे बाधकाऽभावात् । अथवा व्यापाराश्रयस्य भाव्योक्तस्याऽन्यानधीनस्य वा स्वतन्त्रत्वाच्च । नचाऽन्यानधीनस्य स्वतन्त्रत्वे णिजन्तस्थप्रयोज्यकर्तुः प्रयोजकाऽधीनत्वात्कर्तृत्वं न स्यादिति वाच्यम् । सर्वेषां स्वव्यापारे स्वतन्त्रत्वस्य निर्विवादत्वात् । नचैवं प्रयोज्यप्रयोजकव्यवहारो न स्यादिति वाच्यम् । उत्तरव्यापाराधीनत्वेनोक्तव्यवहारोपपत्तेरिति दिक् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

साधकतमं करणम्-साधतमकमित्यस्य प्रकृष्टमित्यर्थः, तच्च यद्व्यापाराऽव्यवधानेन कार्य्यनिष्पत्तिस्तत् । उक्तञ्च-

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥

अथवा कारकान्तरनिष्ठव्यापारसम्बन्धावच्छिन्नक्रियाहेतुत्वाऽभावत्वे सति क्रियाहेतुत्वरूपम् । अथवा व्यापारत्वे सति कारणत्वं तत्त्वमिति ॥

ननु क्रियते येनेति व्युत्पत्त्या करणल्युडन्तकरणेतिमहासंज्ञया करणपदादेव साधकत्वे लब्धे साधकपदस्यैव साधकतमार्थपरत्वादिष्टसिद्धौ तमब्ग्रहणं व्यर्थमित्याशङ्कते—तमब्ग्रहणं किमिति । उत्तरयति—गङ्गायां घोष इति । अयम्भावः, व्यर्थं तमब्ग्रहणं ज्ञापयति इति, इह कारकप्रकरणे शब्दसामर्थ्यगम्यप्रकर्षाऽऽश्रयणं न भवतीति । अत एव प्रत्युदाहरणीभूतोक्तप्रयोगे सप्तमीसिद्धिः । अन्यथाऽधिक्रियतेऽस्मिन्निति व्युत्पत्त्याऽधिकरणपदादाधारलाभे अधारपदस्य प्रकृष्टाधारपरत्वे तिलेपु तैलं दधिन सर्पिरित्यादावेवाऽधिकरणसंज्ञया सप्तमी स्यान्नतु गङ्गायां घोप इत्यादावपीति । घोपाऽऽधारत्वस्य तीरधर्मस्य तीरे लक्षणया तथा प्रयोग इति बोध्यम् । न च महासंज्ञयोक्तार्थलाभासमर्थान्प्रत्याधारादिपदस्य चरितार्थत्वेन शब्दसामर्थ्यगम्यप्रकर्षेत्याद्युक्तज्ञापनासम्भवात्प्रत्युदाहरणस्य का गतिरिति वाच्यम् । आधारपदे स्वरितत्वप्रतिज्ञया गौणाधारग्रहणस्य सुलभत्वादित्यलम् ॥

रामेण बाणेन हतो वालीति—कर्तृत्वशक्तिमान्कर्तृक्रियाभावसम्बन्धश्च कर्तृतृतीयार्थः । करणत्वशक्तिमान् क्रियाकरणभावसम्बन्धश्च करणतृतीयार्थः । रामकर्तृकबाणकरणकप्राणवियोगाश्रयो वालीति बोधः ॥

प्रकृत्यादिभ्य उपसंख्यानम्—एतद्विहिततृतीयाऽर्थोऽभेदोऽन्योऽपि । उक्तञ्च—

प्रकृत्यादिगणाज्जाता तृतीया तु तदात्मताम् ।
अवच्छेदकतावृत्ति प्रकारत्वादि शंसति ॥ इति ।

प्रकृत्या चारुरित्यादितः स्वाश्रयाधिकरणयावत्कालवृत्तिचारुत्ववान् । प्रकृत्यभिन्नचारुत्ववानीति वा बोधः ॥

दिवः कर्म च-ननु पूर्वसूत्रात्करणपदाऽनुवृत्त्यैव कर्मकरणयोर्विधानसिद्धौ चकारो व्यर्थ इति चेन्न । तस्य संज्ञाद्वयसमावेशार्थेन सार्थक्यात् । अत एव, अक्षैर्देवयते इत्यत्र परत्वात्तृतीया कर्मत्वाच्चाऽकर्मकत्वप्रयुक्तपरस्मैपदाऽभावश्च सिद्धयति । विप्रतिषेधशास्त्रबलात्तृतीयैवाऽत्र कर्मत्वकरणत्वेतिशक्तिद्वयं बोधयतीति बोद्धयम् । नचोभयसंज्ञाविधानं तृतीयान्तघटितप्रयोगस्य द्वितीयान्तघटितप्रयोगस्य च साधुत्वार्थमेव तत्रोक्तशास्त्रबलेन तृतीयैव चेद्द्वितीयान्तघटितप्रयोगस्याऽसाधुत्वमेव स्यादिति वाच्यम् । अक्षाणां फलाश्रयत्वसमानाऽधिकरणकर्मत्वविवक्षायामक्षान्दीव्यतीति द्वितीयान्तघटितप्रयोगस्य साधुत्वात् । न च दिवः साधकतमस्योभयसंज्ञाविधानेनाऽक्षाणां देवितेत्यादौ तृतीयाऽऽपत्तिरिति वाच्यम् । तृतीयातः परत्वात्कृद्योगलक्षणषष्ठ्या एव प्राप्तेः । नचैवं मनसा देव इत्यादावपि षष्ठ्या-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पत्तिरिति वाच्यम् । कर्तरि कर्मण्येव कृद्योगषष्ठीविधानाद्धेतौ तदविधानेन तत्राऽदोषात् । तत्र हेतुतृतीयान्तेन मनसेत्यनेन पचाद्यजन्तस्य देवशब्दस्य समासः (मनसः संज्ञायामि)-त्यनेन तृतीयाया अलुक् । न च दिवः साधकतमे कर्मत्वकरणत्वोभयशक्त्यङ्गीकारे कर्मणि प्रत्यये कृते करणत्वशक्तेरनुक्तत्वात्तृतीयाऽऽपत्त्याऽक्षान्दीव्यन्तामित्यादिप्रयोगो नैवोपपद्येतेति वाच्यम् । (अपादानमुत्तराणि कारकाणि बाधन्ते) इत्यस्योदाहरणभूते गां दोग्धीति प्रयोगे कर्मणि प्रत्यये कर्मत्वशक्तेरुक्तत्वेऽप्यपादानत्वशक्तेरनुक्तत्वेन प्राप्तपञ्चमीनिवृत्त्यर्थं द्रव्यगताऽनेकशक्तिमध्ये एकस्या अभिहितत्वेऽपरस्या अप्यभिहितवद्वबोध इति न तत्र पञ्चमी इति भाष्योक्त्यैव तत्रत्यापत्तेरपि परिहारादित्यलम् ॥

अपवर्गे तृतीया—अपवर्ग इत्यस्य फलप्राप्तावित्यर्थः । सत्यां फलप्राप्तौ प्रयोजनाऽभावादेव क्रियायामप्रवृत्तिरिति फलप्राप्तिशब्देन फलप्राप्तिपूर्वकस्त्याग उच्यते । तथा च-फलप्राप्तिपूर्वके क्रियात्यागे द्योत्ये सति कालाऽध्वनोरत्यन्तसंयोगे प्रत्यासत्त्या कालाऽध्ववाचकाभ्यां तृतीयेत्यर्थः ॥

सहयुक्तेऽप्रधाने—ननु सहेनाऽप्रधाने इत्येव सिद्धे युक्तग्रहणं व्यर्थमिति चेन्न । तस्य सहशब्दयोग एव न, किन्तु तदर्थयोगेऽपि तृतीया भवतीत्यर्थकल्पनेन सार्थक्यादित्याशयेनाऽऽह **मूले-सहार्थेनेति**—अर्थयोगेऽपि तृतीयाविधानादेव शब्दयोगं विनाऽपि क्वचित्तृतीया भवतीत्याह—**विनाऽपि तद्योगमिति**—प्रमाणञ्चात्र (वृद्धो यूने) त्यादिनिर्देश एवेति । सहार्थः साहित्यं तच्च स्वसमभिव्याहृतक्रियादिसमानकालिकसमभिव्याहृतक्रियादिमत्स्वरूपम् । क्वचित्समानदेशक्रियावत्त्वमपि तत् । एतद्रूपसाहित्यस्य विवक्षणादेव तिलवापोत्तरं तत्रैव क्षेत्रे मापवापे तिलैः सह मापान्वपतीति सिद्ध्यति । पुत्रेण सहागतः पितेति नैतत्सूत्रोदाहरणं युक्तम्, पुत्रस्याऽऽगमनक्रियाकर्तृत्वादेव ततस्तृतीयासिद्धेः । एवञ्च पुत्रेण सह स्थूल इति मुख्यमुदाहरणं बोध्यम् । पुत्रकर्तृकागमनक्रियासमानकालिकागमनक्रियावान्पितेतिप्रथमवाक्याद्बोधः । पुत्रसम्बन्धिस्थौल्यसमानकालिकस्थौल्यवान्पितेति द्वितीयतो बोधः । एवम्—

सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ।

इत्यादितोऽपि पुत्रसम्बन्धिभारवहनसमानकालिकं गर्दभीकर्तृकं वहनमित्यादिक्रमेण बोधः । पुत्रेण सहागतः पितेत्यत्र प्रधानीभूतात्पितृशब्दात्तृतीयाव्यावृत्त्यर्थमेव सूत्रेऽप्रधानग्रहणं तत्राऽन्तरङ्गत्वात्प्रातिपदिकार्थमात्रे प्रथमैव चेदलमप्रधानग्रहणेन । न च पुत्रेण सह पितुरागमनमित्यादौ प्रथमाया अविषये पितुस्तदापत्तिस्तदवस्थैवेति वाच्यम् । (उपपदविभक्तेः कारकविभक्तिर्बलीयसी) तिन्यायेन (कर्तृकर्मणोः कृति) इत्यनेन तत्र षष्ठ्या एव विधानादिति दिक् ॥

येनाङ्गविकारः—अङ्गमस्यास्तीत्यङ्ग अर्श आदित्वादच् । अङ्गस्य विकारोऽङ्गविकारः । अङ्गिनो विकार इति तदर्थः । प्रयोज्यत्वं षष्ठ्यर्थः । येनेति सर्वनाम्ना प्रकृत्यर्थभूतोऽवयवो लक्ष्यते । तत्राऽभेदस्तृतीयार्थः, तथा च, यदभिन्नाङ्गवृत्तिविकारप्रयोज्याङ्गिनो विकारो लक्ष्यते ततस्तृतीयेति सूत्रार्थः । **अङ्गविकारः किमिति**—अर्श आद्यजन्ताङ्गग्रहणं किमर्थमिति प्रश्नः । समाधत्ते—**अक्षिकाणमस्येति**—अयम्भावः—अर्श आद्यजन्ताङ्गस्या-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऽग्रहणे यदभिन्नाङ्गवृत्तिविकारो लक्ष्यते ततस्तृतीयेत्यर्थे प्रत्युदाहरणभूतोक्तप्रयोगे प्रथमां बाधित्वा तृतीयाऽऽपत्तिः, तद्ग्रहणसत्त्वे तु पूर्वोक्तार्थं नोक्तापत्तिः । अङ्गिनो विकारस्येहाऽलक्ष्यत्वात् । अक्ष्णा काण इत्यत्र तु तृतीया न स्यादङ्गवृत्तिविकारस्याऽलक्ष्यत्वात् । यद्यपि अक्ष्येव काणं तथापि, अवयवधर्मस्य काणत्वस्य समुदाये आरोपेण शरीरे शरीरावच्छिन्ने चात्मनि काणत्वव्यवहार इति बोध्यम् । नचाऽक्षिगतविकारवाचकस्यैव काणशब्दत्वेन प्रसिद्धत्वादर्थादेवाऽक्ष्णो लाभे तस्योक्तार्थानामिति न्यायेन प्रयोगाप्राप्त्याऽक्ष्णा काण इत्यस्य साधुत्वं न स्यादिति वाच्यम् । द्वौ विप्राविति वदुक्तप्रयोगसाधुत्वात् । अनेन प्रकारेणेदृशप्रयोगसाधुत्वे एतत्सूत्रमेव प्रमाणमित्यलम् ॥

इत्थम्भूतलक्षणे—इत्थंशब्दोऽत्र प्रकारमात्रपरः । प्राप्त्यर्थकाद्भूधातोः कर्तरि क्ते भूतशब्दो निष्पन्नः कर्मविभक्त्यन्तेनेत्थं शब्देन भूतशब्दस्य समासः । लक्षणशब्दोऽत्र करणसाधनः । लक्ष्यते येन तल्लक्षणमिति विग्रहः । कर्मषष्ठ्यन्तेनेत्थंभूतशब्देन लक्षणशब्दस्य समासः । तथा च कञ्चित्प्रकारं प्राप्तस्य लक्षणे द्योत्ये प्रत्यासत्त्या लक्षणवाचकात्तृतीयेत्यर्थः । **जटाभिस्तापस** इति—तापसत्वज्ञानजनकज्ञानं जटाज्ञानं तद्विषयत्वं जटाया इति तस्य लक्षणवाचकत्वेन ततस्तृतीयेति भावः । न च जटाभिस्तापसो ज्ञात इत्यर्थे ज्ञानक्रियायां जटानां करणत्वादेव तत उक्तविभक्त्युपपत्तावलमेतत्सूत्रेणेति वाच्यम् । करणत्वस्याऽविवक्षायां लक्ष्यलक्षणभावमात्रविवक्षायां तृतीयाविधानार्थमस्याऽऽवश्यकत्वात् । इत्थंभूतस्य यत्र लक्षणवाचकात्पृथगेवोपस्थितिर्भवति तत्रैवाऽनेन तृतीया विधीयते । अत एव कमण्डलुपदात्तृतीया न भवति । न च (सुपो धातुप्रातिपदिकयोरि)त्यनेन कमण्डलुपदादुत्पन्नायास्तृतीयाया लुकि न दोष इति वाच्यम् । समासे कृते तृतीयोत्पत्तिरिति तस्याः समासरूपप्रातिपदिकाऽनवयवत्वेन लुगनापत्त्या दोषस्य तादवस्थ्यादिति कैयटः ।

शेखरकृतस्तु—कमण्डलुः पाणौ यस्येति बहुव्रीहिः, कमण्डलुयुक्तपाणिरूपस्य कमण्डलुपाणित्वस्यैव लक्षणत्वेन (१)तस्यैव लक्षणवाचकत्वेन (२)तत एव तृतीयाऽऽपत्तिः । 'अनुर्लक्षणे' इति सूत्रे भाष्येऽप्युक्तमेतत् । तत्र हि, (सकृदसौ कमण्डलुपाणिश्छात्रो दृष्टस्तस्य तदेव लक्षणम्भवती)त्युक्तम् । तत्र तदेवेत्यस्य कमण्डलुपाणित्वमेवेत्यर्थः । कमण्डलोर्लक्षणत्वे तु कमण्डलुपाणिरेव लक्षणमित्यर्थकः स एव लक्षणमिति वदेत् । (३)कैयटमतेऽपि—तत्प्रदर्शितं तृतीयालुगनापत्तिरूपदूषणं तु न युक्तम् । कमण्डलुशब्दात्तृतीयाविधानेऽपि (तन्मध्यपतित)न्यायेन तस्याः समासरूपप्रातिपदिकत्वस्याऽक्षतत्वेन लुको दुर्वारत्वात् । (४)अत एव नरम्मन्य इत्यादौ (सुपोधात्वि)ति अमः कुतो न लुगित्याशंक्याऽभिधानसामर्थ्यान्न लुगिति समाहितम्भाष्ये । कैयटमते तु अमः समासरूपप्रातिपदिकाऽनवयवत्वेन लुकोऽप्राप्त्या भाष्यकृत्कृतस्य शंकासमाधानस्य स्पष्टैवाऽसङ्गतिस्तस्मान्मदुक्तमेव ज्याय इत्याहुः ॥

ननु शास्त्रीयहेतोः कर्तृत्वाल्लौकिकहेतोश्च करणत्वात् तृतीयासिद्धौ (हेताबि)ति सूत्रं

---

(१) कमण्डलुपाणेरेवेत्यर्थः । (२) कमण्डलुपाणिशब्दादेवेत्यर्थः ।

(३) कैयटमतं खण्डयितुमाह—कैयटमतेऽपीति ।

(४) उक्तन्यायेन तृतीयाया उक्तरूपप्रातिपदिकावयवत्वादेवेत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्यर्थमित्याशङ्क्य हेतुत्वकरणत्वयोर्भेदप्रदर्शनेन समाधत्ते—**द्रव्यादिसाधारणमिति**—आदिपदेन गुणक्रिययोर्ग्रहणं तथा च द्रव्यगुणक्रियाऽन्यतमत्वे सति नियतव्यापाररहितत्वं हेतुत्वम्। द्रव्याद्यन्यतमत्वे सति नियतव्यापारसहितत्वं करणत्वमिति लक्षणं पर्य्यवसितम्। हेतोरुदाहरणं दण्डेन घटः दण्डहेतुको घट इत्यर्थः। अत्र दण्डस्य व्यापारवत्त्वेऽपि क्रियाजनकत्वाभावान्न करणत्वम्। करणस्योदाहरणं पुण्येन दृष्टो हरिः। पुण्यकरणकं हरिदर्शनमित्यर्थः। अत्र पुण्यस्य क्रियाजनकत्वेऽपि व्यापाररहितत्वमिति हेतुकरणयोर्भेदेन करणतृतीयया हेतुतृतीयाया अगतार्थत्वाद्धेताविति सूत्रमावश्यकमिति भावः॥

ननु अलं श्रमेणेत्यादौ क्रियावाचकपदाऽसत्त्वेन क्रियाया अप्रतीत्या करणत्वाऽभावात्तृतीया न स्यादित्याशङ्क्य समाधत्ते—**गम्यमानापि क्रियेत्यादि**—श्रमेणेत्यादिपदजन्यबोधविषयाऽपीति तदर्थः। नतूच्चार्य्यमाणक्रियावाचकपदजन्यबोधविषयैवेति तदाशयः। अलं शब्दस्य निषेधोऽर्थः। श्रमेण साध्यं नास्तीत्यर्थः। वाक्यैकदेशस्य प्रयोगेण साधनक्रियाम्प्रति श्रमस्य करणत्वात्तृतीयेति। न च साध्यमित्यर्थज्ञानेऽपि साध्यमित्यस्य श्रमेणेति सुबन्तार्थत्वेन क्रियात्वाऽभावात् कथं श्रमस्य करणत्वमिति वाच्यम्। साध्यमित्यत्र प्रकृतिभूतधात्वर्थं प्रति श्रमस्य करणत्वाक्षतेरिति दिक्॥

अशिष्टव्यवहारेति—अशिष्टानां सङ्कीर्णाचाराणां यो व्यवहारः क्रिया तद्वाचकप्रयोगे प्रत्यासत्त्या यत्सम्बन्धेन व्यवहारस्य सङ्कीर्णाचारत्वं तद्वाचकात्प्रतिपदिकाच्चतुर्थ्यर्थे तृतीयेत्यर्थः। दास्या सम्प्रयच्छत इति। दासीसम्प्रदानकं रतिफलकं दानमिति बोधः।

इति तृतीया।

अथ सम्प्रदानकारकप्रकरणम्।

कर्मणा यमभिप्रैति स सम्प्रदानम्—कर्त्रा दाधात्वर्थक्रियाकर्मणा सम्बन्धेच्छाविषयीभूतो यः स सम्प्रदानमिति सूत्रार्थः। सम्यक् प्रदीयते अस्मै तत्सम्प्रदानमित्यन्वर्थसंज्ञाबलेन दानार्थकधातुयोग एवैतत्सूत्रप्रवृत्तिः। दाधात्वर्थश्च स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्त्यनुकूलव्यापाररूपः। अत एव रजकस्य वस्त्रं ददातीत्यत्र न चतुर्थी। अत्र दाधातुर्भाक्तः अधीनीकरणरूपेऽर्थे इति तदर्थः। दाधातुप्रयोग एव चतुर्थीविधानादेव, अजां ग्रामं नयति, हस्तं निदधाति वृक्षे इत्यादौ न चतुर्थी, इति वृत्तिकारमतम्। भाष्ये तु दानस्येति क्रियामात्रस्योपलक्षणम्, कर्त्रा क्रियामात्रकर्मणा सम्बद्धुमिष्यमाणस्य सम्प्रदानत्वमित्यर्थः। अत एव खण्डिकोपाध्यायः शिष्याय चपेटां ददातीति प्रयोगः सङ्गच्छते, अत एव च 'दाशगोघ्नौ सम्प्रदाने' इत्याद्यपि चरितार्थम्। अजाया ग्रामसम्बन्धो जायतामित्येवेच्छा न तु ग्रामोऽजासम्बद्धो जायतामित्याकारेच्छेति ग्रामस्याऽजारूपकर्मणा सम्बद्धमिष्यमाणत्वाऽभावान्न अजां ग्राममित्यादौ सम्प्रदानत्वाऽतिप्रसङ्गः। विप्राय गां ददातीत्यादौ सम्प्रदानत्वशक्तिमान् क्रियाकारकभावसम्बन्धश्च सम्प्रदानचतुर्थ्यर्थः कर्मणा सम्बन्धश्च स्वत्वादिरूपो बोध्यः। देवदत्तकर्तृवृत्तिविप्रोद्देश्यकगोनिष्ठत्यागानुकूलव्यापार इति बोधः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कर्मणेति किम्—अयम्भावः-सूत्रे कर्मणेत्यनुपादाने कर्त्रा क्रियया सम्बद्धुमिष्यमाणस्य सम्प्रदानत्वमित्यर्थे विप्राय गां ददातीत्यादौ गोरूपकर्मणोऽप्युद्देश्यत्वात् अर्थाद्देवदत्तकर्तृकवृत्तिदानक्रियया सम्बन्धेच्छाविषयीभूतत्वात्सम्प्रदानत्वापत्तिः । न च कर्मसंज्ञाया अनवकाशत्वाद् गोः कर्मसंज्ञैव स्यान्न सम्प्रदानसञ्ज्ञेति वाच्यम् । सम्प्रदानसंज्ञायाः कर्मसंज्ञया सह पर्यायतया विधानेन कर्मसंज्ञायाः सावकाशत्वात्तया सम्प्रदानसंज्ञाया अबाधेन दोषस्य तादवस्थ्यात् ! अतः कर्मणेत्यस्योपादानमावश्यकं, सति तस्मिन् गोरूपोद्देश्यत्वाऽभावात्तेनैव सम्बद्धुमिष्यमाणस्य सम्प्रदानत्वेन न तस्याऽऽपत्तिलेपोऽपीति दिक् ॥

यं स ग्रहणं किमिति—सूत्रेऽनयोरनुपादाने क्रियाकर्मणा योऽभिप्रैति ब्राह्मणादिः तस्यैव सम्प्रदानत्वापत्तिः । न च कर्तृसंज्ञाया निरवकाशत्वेन तयोक्तसंज्ञाबाधेन नाऽऽपत्तिरिति वाच्यम् । अकर्मकधातुविषये कर्तृसंज्ञायाः सावकाशत्वेन तया सम्प्रदानसंज्ञाबाधानापत्त्या पूर्वोक्ताऽऽपत्तेस्तादवस्थ्यात् । न च कर्त्तुः कर्तृत्वाऽभावेन गोः कर्मत्वमेव न स्यादिति वाच्यम् । कर्मसंज्ञायां कर्तृग्रहणस्य स्वतन्त्रोपलक्षणत्वेनादोषात् ।. अत एव सार्थाद्धीयते इत्यत्र कर्तुरपादानत्वेऽपि कर्मणि लकारसिद्धिः । एवञ्च यं स ग्रहणमावश्यकमिति भावः ॥

ननु सूत्रे कर्मणेत्युक्तावकर्मकक्रियोद्देश्यस्य सम्प्रदानत्वं न स्यादित्यत आह—क्रियया यमभिप्रैति सोऽपि सम्प्रदानमिति—कर्मरहितक्रिययेति तदर्थः । सकर्मकेषु कर्मसंज्ञा सम्प्रदानसंज्ञाया बाधिका स्यादित्याह-पत्ये शेत इति—उद्देश्यत्वं चतुर्थ्यर्थः । पत्युद्देश्यकशयनकर्त्री पत्नीति बोधः । न च तादर्थ्यमुपकार्य्योपकारकभावरूपः सम्बन्धः । दानादयोऽपि सम्प्रदानत्वेनाऽभिप्रेतविप्राद्यर्था एवेति तादर्थ्यचतुर्थ्यैव सिद्धौ 'चतुर्थी सम्प्रदाने' इदं सूत्रं व्यर्थमेवेति वाच्यम् । 'दाशगोघ्नौ सम्प्रदाने' इत्येतदर्थन्तस्याऽऽवश्यकत्वात् । सम्प्रदाने कारके दाशगोघ्नाविति निपात्येते इति सूत्रार्थः । चतुर्थी सम्प्रदाने इत्यस्यासत्त्वे दाशगोघ्नाविति सूत्रे सम्प्रदानपदेन कारकग्रहणं न स्यादित्येतदर्थं तदावश्यकमिति भावः । अत एव मूले दाशन्ति तस्मै दाशः । गां हन्ति तस्मै गोघ्नोऽतिथिरिति तयोरर्थः प्रतिपादितः । न च दाशगोघ्नावित्यत्र सम्प्रदानशब्दस्य सम्यक् प्रदीयते यस्मै तत्सम्प्रदानमित्यर्थकल्पनया नैतत्सूत्राऽनुपपत्तिरिति वाच्यम् । उक्तरीत्योक्तसूत्राऽनुपपत्तिपरिहारेण तदनावश्यकत्वेऽपि तत्सम्प्रदानकं दानमिति बोधार्थं 'चतुर्थी सम्प्रदाने' इत्यस्यावश्यकत्वात् । सम्प्रदानसञ्ज्ञासत्वे विप्रसंप्रदानकं गोकर्मकं दानमिति बोधः । तादर्थ्यचतुर्थ्यां विप्रार्थं गोकर्मकं दानमिति बोध इत्येवमनयोर्भेदो बोध्यः ।

ननु अभिलषते रुचधातुसमानार्थकतया हरये रोचते भक्तिरित्यत्रेव हरिर्भक्तिमभिलष्यतीत्यत्राप्यर्थग्रहणसामर्थ्यात्परामपि कर्मसञ्ज्ञां बाधित्वा सम्प्रदानसञ्ज्ञा कुतो नेत्याशङ्क्य समाधत्ते—अन्यकर्तृकोऽभिलाषो रुचिरिति । अभिलषतिकर्त्रपेक्षया यदन्यदभिलषतिकर्म तत्कर्तृका रुचिरिति तदर्थः । यत्किञ्चिन्निष्ठप्रीत्यनुकूलप्रीतिव्यधिकरणव्यापारो रुचधात्वर्थ इति फलितम् । यत्कञ्चिद्विषयकप्रीत्यनुकूलप्रीतिसमानाधिकारणव्यापारोऽभिलषतेरर्थः । तथाच हरये रोचते भक्तिरित्यत्र हरिनिष्ठप्रीत्यनुकूलप्रीतिव्यधिकरणव्यापारो भक्तिनिष्ठ इति सम्प्रदानसंज्ञा जाता । हरिर्भक्तिमभिलष्यतीत्यत्र तु भक्तिविषयकप्री-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तिसमानाधिकरणव्यापारो हरिनिष्ठ इत्युभयोः समानार्थकत्वाऽभावान्नाऽभिलपतियोगे सम्प्रदानसञ्ज्ञेति समाधातुराशयः । एवं समवायसम्बन्धावच्छिन्नप्रीत्यनुकूलप्रीतिव्यधिकरणव्यापारार्थकप्रीधातुयोगे हरिं प्रीणयति भक्तिरित्यत्रापि न सम्प्रदानसंज्ञा । रुचधातुसमानार्थत्वाभावात् प्रीयमाण इति निर्देशेन प्रीधातुयोगे तदभावकल्पनाच्चेत्यलम् ॥

प्रीयमाणः किम् । देवदत्ताय रोचते मोदकः पथीति—ननु प्रीयमाणपदाऽभावे क्रियाजनकत्वमात्रविवक्षायां सूत्रस्य चारितार्थ्यात्सम्प्रदानसंज्ञायां मन्दं प्रवृत्तस्य तस्य परत्वादधिकरणसंज्ञया बाधेन प्रत्युदाहरणेन काचिदनुपपत्तिरिति चेन्न । देवदत्तं रोचते मोदकः पथीत्यस्यापत्तिरिति प्रत्युदाहरणस्याशयात् । प्रीयमाणपदसत्त्वे तु कर्मसंज्ञाया अस्यापवादत्वेन न दोष इति भावः ॥

श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः—एषां धातूनां प्रयोगे बोधनेच्छाविषयीभूतः सम्प्रदानसंज्ञको भवतीत्यर्थः । बोधविषया स्तुतिः श्लाघतेरर्थः । **गोपी स्मरात्कृष्णाय श्लाघते इति** । स्मरादिति हेतौ पञ्चमी, तथाच-गोपीकर्तृका स्मरहेतुका कृष्णसम्प्रदानिकाऽर्थात्कृष्णबोधवृत्तिविषया स्तुतिरिति बोधः । बोधविषयमितरादर्शनयोग्यदेशस्थापनं ह्नुतेरर्थः । आत्मानमित्यध्याहारः । तथा च-गोपीकर्तृका स्मरहेतुका कृष्णवृत्तिबोधविषया आत्मकर्मिका इतरादर्शनयोग्यदेशस्थापनाऽनुकूला क्रियेति बोधः । **तिष्ठत इति** । गोपीकर्तृका स्मरहेतुका कृष्णसम्प्रदानिका स्वाभिप्रायबोधाऽनुकूला स्थितिक्रियेति बोधः । **शपत इति** । गोपीकर्तृका स्मरहेतुका कृष्णसम्प्रदानिका स्वाऽभिप्रायबोधाऽनुकूला शपथक्रियेति बोधः ।

शेखरकृतस्तु—स्तुत्यादिना बोधनं श्लाघादेरर्थः । तथाच स्तुत्या आत्मानुरागं कृष्णं बोधयतीत्यर्थः । एवं ह्नुत्या स्थित्या शपथेन च आत्मानुरागं कृष्णं बोधयतीत्यर्थः । यद्वा स्तुत्या ह्नुत्या च कृष्णं स्वसखीजनं बोधयतीत्यर्थः । एतत्सूत्रघटकज्ञीप्स्यमानपदे ण्यर्थकर्मणः प्रकृत्यर्थकर्मणश्च ग्रहणम् । श्लाघादेः स्तुत्यादिमात्रार्थकत्वे कृष्णं श्लाघते ह्नुत इत्येव, ज्ञीप्स्यमान इति ज्ञापनवचनाज्ज्ञपेः सन्नन्तात्कर्मणि शानजित्याहुः ॥

धारेरुत्तमर्णः—धारयतेः प्रयोगे उत्तमर्णः सम्प्रदानसंज्ञको भवतीत्यर्थः । (अत्र सूत्रे धारेरिति धृङ् अवस्थाने इति ण्यन्तस्य ग्रहणम्, नतु ण्यन्तस्य धृञः तथा सति मोक्षस्य धृङ्धात्वर्थकर्तृत्वानापत्तेः, धृञः सकर्मकत्वेन मोक्षस्य कर्मत्वानापत्तेश्च, धृङो ग्रहणे तु तस्याऽकर्मकत्वादण्यन्तकर्तुर्मोक्षस्य 'णौ गतिबुद्धि' सूत्रेण कर्मत्वमुपपद्यते । **भक्ताय धारयति मोक्षं हरिरिति** । स्थापनानुकूलव्यापारोऽत्र धारिधात्वर्थः । तथा च भक्तसम्प्रदानको हरिकर्तृको मोक्षकर्मकाऽवस्थापनानुकूलव्यापार इति बोधः । ननु भक्तस्य कारकत्वाऽभावात्सम्प्रदानसंज्ञा न स्यादिति चेन्न । भक्ताऽसत्त्वे प्रेरणाया अभावात्प्रेरणाजनकत्वेन भक्तस्य कारकत्वाक्षतेः । ननु मोक्षस्य ऋणत्वे सत्येव भक्तस्य तत्स्वामित्वादुत्तमर्णत्वेन संप्रदानत्वं स्यात्परं मोक्षस्य ऋणत्वमेव न, ऋणं हि नाम यत्र सजातीयदानमङ्गीकृत्य परदत्तद्रव्यादानानन्तरं तदुत्तरकालिकगृहीतद्रव्यसजातीयद्रव्यदाननाश्योऽदृष्टविशेषः, प्रकृते मोक्षस्यैवंविधऋणत्वाऽभावेन भक्तस्योत्तमर्णत्वाऽसम्भवादिति चेन्न । अवश्यदेयत्वमात्रेण मोक्षेऽपि ऋणत्वव्यवहारस्य सुलभत्वात् । अत्र सूत्रे उत्तमर्णग्रहणाभावे देवद-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्ताय शतं धारयति ग्रामे अत्र ग्रामस्याऽपि सम्प्रदानत्वापत्तिः । न च परत्वादधिकरण-संज्ञैव स्यादिति वाच्यम् । सत्येवमुत्तमर्णेऽपि हेतुसंज्ञापत्तेर्दुर्वारत्वात् । तस्मादुत्तमर्णग्र-हणाऽभावे हेतुसंज्ञाया इवाऽधिकरणसंज्ञाया अप्यपवादभूतेयं सम्प्रदानसंज्ञा स्यादिति त-द्व्यावृत्त्यर्थमुत्तमर्णग्रहणमिति दिक् ॥

स्पृहेरीप्सितः—अत्र सूत्रे ईप्सितपदमिच्छाविषयपरं तथा च स्पृहयतेः प्रयोगे इच्छाविषयः सम्प्रदानसंज्ञको भवतीत्यर्थः । पुष्पेभ्यः स्पृहयति । स्पृहयतिरिच्छामात्र-वाची, फलावच्छिन्नेच्छावाची च । आद्ये सम्प्रदानत्वं तत्प्रागेवोदाहृतम् । अन्त्ये कर्मत्वं पुष्पाणि स्पृहयतीति यथा, इत्येवाह मूले—**प्रकर्षविवक्षायां तु परत्वात्कर्मसंज्ञेति** । फलाश्रयत्वेन विवक्षायामित्यर्थः । अस्य सूत्रस्य क्रियाजनकत्वमात्रविवक्षायां चारितार्थ्येन परत्वात्कर्मसंज्ञेति तद्भावः । पुष्पसम्प्रदानकेच्छेति चतुर्थीसमभिव्याहारे पुष्पकर्मकेच्छेति द्वितीयासमभिव्याहारे च बोधः । ननु स्पृहयतेः प्रयोगे सम्प्रदानत्वविधानात्—

कुमार्यं इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च ।

इत्यनुपपन्नमिति चेन्न । क्रियासम्बन्धित्वमात्रविवक्षायां षष्ठ्या तदुपपत्तेः ॥

क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रतिकोपः—एषामर्थ इवाऽर्थौ येषां ते तथोक्तास्ते-षाम् । विषयतया क्रुधाद्यर्थानां धातूनां प्रयोगे तन्मूलभूतकोपसम्बन्धिनः सम्प्रदानसंज्ञेति तदर्थः । तेषु क्रुधद्रुहोरकर्मकत्वात्षष्ठ्यां प्राप्तायामितरयोः कर्मसंज्ञायां प्राप्तायां वचनमिदम् । क्रोधश्चाऽमर्षरूपो मनसो वृत्तिविशेषः उत्कर्षविरोधिधर्मारोपाऽनुकूलव्यापारात्मकः । द्रोह-श्चाऽपकाररूपः । स च तदीयगुणे दोषत्वारोपाऽनुकूलव्यापाररूपः । इति क्रोधद्रोहयोर्भेदः । ईर्ष्या अक्षमा, सा च परकीयपाण्डित्यादिगुणानामसहनं तच्च गुणादिज्ञानजन्यद्वेषात्मकम् । असूया च गुणेषु दोषतादात्म्यारोपः । इति द्रोहादस्य भेदः । हरये क्रुध्यतीत्यादि । हरिसम्प्रदानकः क्रोधः । हरिसम्प्रदानको द्रोहः । हरिसम्प्रदानिका ईर्ष्या । हरिसम्प्रदा-निका असूयेति बोधः । ननु कुपक्रोधे इत्यनुशासनात्कोपस्यैव क्रोधपदार्थत्वात्क्रोधस्य कोपप्रभवत्वमनुपपन्नमिति चेन्न । वाक्चक्षुरादिविकारानुमेयप्ररूढकोपस्यैवाऽत्र क्रोधपदा-र्थत्वेन तस्य कोपप्रभवत्वोपपत्तेः । एवञ्च कोपक्रोधयोर्भेदान्न कुपधातुयोगे सम्प्रदानत्वम् । अत एव कुप्यति कस्मैचिदित्याद्यसाध्वेवेत्यलम् ॥

तादर्थ्ये चतुर्थी—तादर्थ्यमुपकार्योपकारकभावरूपः सम्बन्धः । तस्मिन् गम्यमाने उपकार्योपकारकवाचका च्चतुर्थीति तदर्थः । मुक्तये हरिं भजतीत्यादितो मुक्तिरूपोपकार्यो-पकारकं हरिकर्मकं भजनमित्यादिक्रमेण बोधः । उक्तरूपः सम्बन्धोऽनेकविधो नतु कार्य्य-कारणभावरूप एव । अत एव ब्राह्मणाय दधीत्यादयोऽपि प्रयोगा उपपद्यन्ते । उक्तरूपता-दर्थ्यस्य सम्बन्धत्वेन विवक्षायां षष्ठ्येव । स्पष्टमिदं गुरोरिदं गुर्वर्थमित्यत्र भाष्ये ॥

क्लृपि सम्पद्यमाने च—क्लृपीति सप्तमी नत्विका निर्देशः । अत्राऽर्थग्रहणं स-म्पूर्वकस्य पद्यतेरुत्पत्त्यर्थः, तथाच क्लृप्त्यर्थकधातुयोगे उत्पद्यमानेऽर्थेवर्त्तमानाद्विकृतिवा-चकात्प्रातिपदिकाच्चतुर्थीति वार्तिकार्थः । भक्तिर्ज्ञानाय कल्पते ज्ञानरूपेण परिणमते इत्यर्थः । अत एव प्रकृतिविकृत्योर्भेदविवक्षायां विकृतिवाचकाच्चतुर्थी तयोरभेदविवक्षायां तु परत्वात्प्रथमैव, भक्तिर्ज्ञानं कल्पते इत्यलम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रियार्थोपपदस्य च कर्मणि स्थानिनः—क्रिया अर्थः फलं यस्य तत्क्रियार्थं तेन स्ववाचकं लक्ष्यते क्रियाफलार्थवाचकमुपपदं यस्य स तथोक्तस्तस्य क्रियार्थोपपदस्य, अर्थश्च प्रत्यासत्त्या क्रियारूप एव गृह्यते स्थानिन्शब्दस्याऽप्रयुज्यमानवाचित्वमिति व्याकरणशास्त्रे प्रसिद्धं तथा च यत्फलितन्तदाह—क्रियार्था क्रिया उपपदं यस्येत्यादि। फलेभ्यो यातीत्यादितः फलकर्मकाऽऽहरणफलकं यानमित्यादिक्रमेण बोधः। यथा वाक्यार्थे वाक्यैकदेशप्रयोगस्थले प्रविश पिण्डीमित्यादौ तस्यैव पदस्य सकलवाक्यार्थशक्तत्वं तथा प्रकृतेऽस्य समुदायस्याऽऽहरणघटितोक्तार्थे शक्तिरेतच्छास्त्रबलादिति बोध्यम्। सूत्रे स्थानिन इत्युक्त्या तुमुनः प्रयोगे न चतुर्थी। पिण्डीमित्यादावप्रयुज्यमानभक्षणक्रियाकर्मणि चतुर्थीवारणाय क्रियार्थोपपदस्येति पदमिति दिक्॥

ननु 'नमः स्वस्ती'त्यनेन नमःशब्दयोगे चतुर्थीविधानान्नमस्करोति देवानित्यादौ नमः शब्दयोगे चतुर्थी कुतो नेत्याशङ्क्य समाधत्ते-**उपपदविभक्तेरिति**। सहयुक्तेऽप्रधाने इति सूत्रस्थभाष्ये प्रधाने प्रथमां साधितुमप्रधानग्रहणं प्रत्याख्यातुञ्च वचनरूपेण पठितेयम्। नमः स्वस्तीत्यत्रत्ययोगग्रहणेन ज्ञापितेयमित्याहुः केचित्। क्रियाकारकयोः सम्बन्धोऽन्तरङ्गस्तन्निमित्तिका विभक्तिरन्तरङ्गा, उपपदार्थेन तु यत्किञ्चित्क्रियाकारकभावमूलकः सम्बन्ध इति तन्निमित्तिका विभक्तिरपि बहिरंगेत्येतन्मूलिकेयमित्याहुः—कैयटादयस्तन्न। नमस्करोति देवानित्यादौ क्रियाकारकभावेनैवान्वये परत्वाच्चतुर्थीमाशंक्याऽनया वारणस्य भाष्योक्तस्याऽसङ्गत्यापत्तेः। कारकविभक्तित्वञ्च क्रियाजनकत्वसमानाऽधिकरणकर्त्रादिषट्काऽन्यतमत्वम् (अभिहिते प्रथमे) ति वार्त्तिकस्वारस्यादन्याऽभिहिताऽनुद्भूतकर्त्राद्यन्यतमार्थत्वं प्रथमाया अपीति तस्या अपि कारकविभक्तित्वमित्यवसेयम्। यथा द्वावित्यादौ द्विशब्दादौविभक्तेश्चैकस्यैव द्वित्वस्य बोधस्तथैव देवदत्तः पचतीत्यादौ उभाभ्यां कर्तृभ्यामेकस्यैव कर्तृत्वस्य बोधो नतु कर्तृत्वबोधाऽऽवृत्तिरिति बोध्यम्—वस्तुतस्तु सूत्रेऽर्थवन्नमःशब्दस्य ग्रहणात्प्रकृतेऽर्थवन्नमःशब्दयोगाऽभावान्न चतुर्थीशङ्काकलङ्ककणिकावसर इति दिक्॥

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु—अप्राणिष्वित्यस्य प्राणिवर्जेत्यर्थः। तच्च मन्यकर्मविशेषणं, तथाच प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात्तिरस्कारे इति तदर्थः। तत्राऽनादर इत्यस्य तिरस्कारोऽर्थः। तथाहि-अनादरो नाऽऽदराऽभावमात्रमपि तु अधर्मादाविव नञो विरुद्धवाचित्वात्तिरस्कार इति। तत्राऽनादर इति मन्यकर्मविशेषणम्। तेनाऽनादरद्योतके मन्यतेः कर्मणीत्यर्थः फलितः। तिरस्कारश्च व्याख्यानादपकृष्टनिरूपितोपमेयत्वस्याप्यभावरूप उपमेयेऽत्र गृह्य तेनत्वपकृष्टसादृश्यरूपः; तत्प्रतीतिश्च नञ्समभिव्याहार एवेत्यलम्।

इति चतुर्थी।

अथापादानकारकप्रकरणम्।

ध्रुवमपायेऽपादानम्—ध्रुगतिस्थैर्ययोरित्यस्मात्कुटादेः पचाद्यचि, ध्रुव स्थैर्ये इति पाठे तु इगुपधलक्षणे के वा निष्पन्नस्य ध्रुवशब्दस्य स्थैर्यार्थकत्वम्। विभागजनक-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्यापारोऽपायशब्दार्थः । तथा च–विभागजनकव्यापारे ध्रुवं स्थिरम्, उक्तव्यापाराऽनाश्रयमिति यावत् । यत्तदपादानसंज्ञकं भवतीति सूत्रार्थः । भाष्ये–माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यादौ बुद्धिपरिकल्पितमपादानमाश्रित्यैव पञ्चमीसाधनेन बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिपरिकल्पितोऽपि विभागो गृह्यते न केवलो वास्तवसम्बन्धपूर्वको वास्तव एवेति बोध्यम् । तथा च प्रकृतधातूपात्तविभागजनकव्यापाराऽनाश्रयत्वे सति प्रकृतधात्वर्थविभागाश्रयत्वमपादानत्वमिति फलितम् । सूत्रे ध्रुवग्रहणाऽभावे पचत्यादियोगे कर्तृसंज्ञायाश्चारितार्थ्येन, अपायविषये यत्कारकं तदपादानमित्यर्थसम्भवेनापादानसंज्ञायाः कर्तृसंज्ञापवादत्वेन कर्तुरपादानत्वाऽऽपत्तिरिति तद्व्यावृत्त्यर्थं ध्रुवग्रहणमित्यवसेयम् ।

उक्तञ्च हरिणा—

अपाये यदुदासीनं चलं वा यदि वाऽचलम् ।
ध्रुवमेवाऽतदावेशात्तदपादानमुच्यते ॥

इति कैयटादयः

शेखरकृतस्तु—उक्तरीत्या ध्रुवपदस्य निश्चलार्थकत्वेन त्रस्तादश्वात्पतति (१)धावतोऽश्वात्पततीत्यादौ त्रासधावनाऽऽश्रयत्वेनाऽनिश्चलत्वाद्ध्रुवत्वाऽभावेनाऽश्वस्याऽपादानत्वं न स्यादिति पूर्वपक्षं विधायाऽत्राऽध्रौव्यमविवक्षितं यतः सतोऽप्यविवक्षा भवतीति समाहितम्भाष्ये । अत्र पतधात्वर्थव्यापाराऽऽश्रयत्वरूपत्वदुक्ताऽध्रुवत्वस्याऽसत्त्वेन सतोऽध्रौव्यस्याऽविवक्षेति भाष्योक्तिरसङ्गतिमापद्येत । सिद्धान्तेऽपि त्वदुक्तध्रुवपदार्थकथनस्यैवौचित्येन भाष्योक्तस्याऽसङ्गतिः । लोकसिद्धनिश्चलाऽतिरिक्तेऽर्थे ध्रुवपदस्य शक्तिकल्पने गौरवञ्च । नचाऽन्यविधध्रुवत्वाऽभ्युपगमे अतदावेशादिति हरिकारिकाया असङ्गतिरिति वाच्यम् । तत्रातदावेशादित्यस्य तदावेशाऽविवक्षणादित्यर्थेन तत्सङ्गतेः । अतोऽपाये गतिविशेषे सति यत् ध्रुवमवधिभावोपगमाश्रयत्वे सति अवधिभावोपगमातिरिक्तस्याऽवधित्वोपयोगिव्यापारस्याऽनाऽऽश्रयं तदपादानमिति सूत्रार्थः । त्रासादेरवधित्वोपयोगित्वाऽऽश्रयणादश्वस्याऽपादानत्वं न स्यादिति पूर्वपक्षः । वृक्षात्पर्णं पततीत्यादौ त्रासादेरसत्त्वान्न तस्याऽवधित्वोपयोगित्वमिति समाधानम् । वृक्षस्य पर्णं पततीत्यादौ वृक्षस्य पर्णद्वारा पातजनकत्वेन प्राप्ताऽपादानत्वव्यावृत्त्यर्थं ध्रुवमपाये इति । सत्येवं अपायपदं कारके इत्यस्य क्रियाजनकत्वेन विवक्षित इत्यर्थे तात्पर्यग्राहकं बोध्यम् । ननु मेषपदोपात्तयोरेव परस्परशब्दार्थत्वात्तयोरवधिभावोपगमातिरिक्तव्यापाराऽनाश्रयत्वाऽभावेन परस्परान्मेषावपसरत इत्यत्राऽपादानत्वाऽनुपपत्तिरिति चेन्न । वाचकशब्दरूपोपाधिगतभेदस्य वाच्याऽर्थे आरोपात्तयोरप्यर्थयोर्भेदेन तदुपपत्तेः । त्रासाऽऽश्रयाऽभिन्नाऽश्वाऽपादानिका देवदत्तकर्तृवृत्तिपतनक्रियेति प्रथमवाक्याद्बोधः । धावनकर्त्रभिन्नाश्वापादानिका देवदत्तकर्तृवृत्तिः पतनक्रियेति बोधः । कुड्यापादानकपातकर्त्रभिन्नाऽश्वाऽपादानिका देवदत्तकर्तृवृत्तिपातक्रियेति तृतीयतो बोधः । अन्यतरमेषाऽपादानिकान्यतरमेषकर्तृकाऽपरसणक्रियेति चतुर्थतो बोधः । ननु विभागाश्रयस्याऽपादानत्वविधानाद्व्यधधात्वर्थे विभागस्य प्रवेशात्तद्योगे धनुषा विध्यतीत्यत्राऽपादानत्वं दुर्वारमिति चेन्न । व्यधधातोर्निःसरच्छरजन्यवेधार्थत्वेन तद्योगे-

(१) आदिपदेन कुड्यात्पततोऽश्वात्पततीत्यपि बोध्यम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऽपादानत्वकरणत्वयोः प्राप्तौ परत्वात्करणत्वस्यैव प्रवृत्तेः। ननु विभागाऽनुकूलव्यापारस्य त्यजधात्वर्थत्वेन तद्योगे ऽप्यपादानत्वप्रसक्तेर्दुर्वारत्वाद्वृक्षं त्यजति खग इति प्रयोगो न स्यादिति चेन्न। तत्र व्यापारव्यधिकरणविभागस्यैव धात्वर्थत्वात्कर्मसंज्ञयाऽपादानत्वस्य बाधेन तथा प्रयोगोपपत्तेः। विभागाऽनुकूलव्यापारस्य स्पन्दधात्वर्थत्वेन तद्योगेऽपादानत्वं नाशङ्क्यम्। उक्तधातोर्विभागार्थत्वाऽनङ्गीकारादिति वृक्षे स्पन्दते इत्येव भवति। चलधातोर्विभागार्थत्वात्तद्योगेऽपादानत्वस्य सौलभ्येनाऽऽसनाचलित इति प्रयोगो भवत्येव। ननु सार्थस्य धात्वर्थप्रधानव्यापाराश्रयत्वादपादानत्वप्रसक्त्या सार्थाद्धीयते इति प्रयोगो नोपपद्येतेति चेन्न। (अपादाने चाहीयरुहोरिति)ति ज्ञापकात्कर्मप्रत्ययान्तहाधातुप्रयोगेऽऽपादानत्वस्य ज्ञापनेन तदुपपत्तेः। कर्मसंज्ञायां कर्तृपदस्य स्वतन्त्रोपलक्षणत्वेन कर्मणि लकारे सार्थेन त्यज्यते देवदत्त इत्यर्थ इत्याहुरिति दिक्॥

ननु विभागस्य संयोगपूर्वकविश्लेपरूपत्वेन तस्याऽत्राऽसत्त्वाद्बुद्धिकृतस्य विभागस्य गौणत्वेनाऽग्रहणाच्च सूत्रेणाऽप्राप्त्या वार्त्तिकमिदमावश्यकमित्याह—जुगुप्साविरामेति। जुगुप्सा—निन्दा, विरामो—विरतिः, प्रमादोऽनवधानता, जुगुप्साद्यर्थकधातूनां प्रयोगे जुगुप्सादीनां यद्विषयकत्वेन विवक्षा तदपादानमिति तदर्थः। तस्यैवं विषयस्य क्रियाजनकत्वरूपकारकत्वेनाऽविवक्षायां सम्बन्धित्वेन च विवक्षायां पापस्य जुगुप्सते इति भवत्येव। एषां धातूनां स्वार्थविशिष्टबौद्धविश्लेषजनकनिवृत्तौ लक्षणया अपादाने पञ्चमीत्येव सिद्धौ वार्त्तिकमिदमुत्तरसूत्राणि च नावश्यकानीत्युक्तं भाष्ये॥

भीत्रार्थानां भयहेतुः—भयं भीस्त्राणं त्राः, क्विबन्तावेतौ, धातुनिर्देशे तु व्यधिकरणबहुव्रीहिराश्रयणीयः स्यात्। भीश्च त्राश्च भीत्रौ तावर्थौ येषान्ते भीत्रार्थास्तेषां भीत्रार्थानामित्येतत्फलितमाह—भयार्थानामिति। हेतुतृतीयाऽपवादभूतोऽयं योगः। ननु भयार्थकधातुयोगे भयहेतोरपादानत्वविधानात्॥

कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे।

इति रामायणीयपद्ये कस्येति भयहेतोरपादानत्वप्रसक्त्या ततः कथं षष्ठ्युपपत्तिरिति चेन्न। कस्येत्यस्य संयुगेनाऽन्वयात्तस्य भयहेतुत्वाऽभावेनाऽपादानत्वाऽप्रसक्त्या तदुपपत्तेः। न च संयुगस्याऽपादानत्वाऽऽपत्तिरिति वाच्यम्। अधिकरणसंज्ञयाऽपादानसंज्ञाया बाधेनोक्तापत्तेरयोगात्। अधिकरणत्वाऽविवक्षायामिष्टाऽऽपत्तिरेव पञ्चम्या इति बोद्धव्यम्। सूत्रे भीत्रार्थेत्यस्याऽसत्त्वे व्याघ्रं पश्यतीत्यादावपादानत्वाऽऽपत्तिः। न च कर्मसंज्ञयाऽपादानत्वबाधेन नोक्ताऽऽपत्तिरिति वाच्यम्। कर्मत्वाऽविवक्षणे शेषषष्ठीं बाधित्वा पञ्चम्यापत्तेर्दुर्वारत्वादित्यलम्॥

वारणार्थानामीप्सितः—वारणं प्रवृत्तिविघातः सोऽर्थो येषां ते तथोक्तानाम्। ईप्सितशब्दस्य वारणार्थधात्वर्थफलाश्रयोऽर्थः। यथा च—प्रवृत्तिक्रियाप्रतिषेधाऽनुकूलव्यापाररूपवारणार्थकधातुयोगे जन्यफलभागित्वेन तत्क्रियाकर्तुरीप्सितस्याऽपादानत्वमिति सूत्रार्थः। यवेभ्यो गां वारयतीत्यादौ वारिधात्वर्थव्यापारजन्यसंयोगादिरूपफलाश्रयत्वाद्यवादीनामपादानत्वात्तेभ्यः पञ्चमी। देवदत्तकर्तृवृत्तियवप्रतियोगिकविनाशाऽनुकूलभक्षणरूपव्यापाराऽभावाऽनुकूलो व्यापार इति बोधः। एवं पुष्पेभ्य आतपं नाशयति, परस्वेभ्यः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाणिम्वारयति, कूपादन्धं वारयतीत्यादितः, देवदत्तकर्तृवृत्तिरातपनिष्ठपुष्पवृत्तिशुष्कीभावाऽनुकूलव्यापाराऽभावाऽनुकूलव्यापार इति बोधः । पाणिनिष्ठपरस्ववृत्तिसंयोगाऽनुकूलव्यापाराऽभावाऽनुकूलव्यापारो देवदत्तवृत्तिः । अन्धवृत्तिर्यः कूपवृत्त्यधःप्रदेशाऽवच्छिन्नसंयोगाऽनुकूलक्रियारूपपतनाऽनुकूलव्यापारस्तदभावाऽनुकूलव्यापारः कर्तृवृत्तिरिति बोधः । अग्नेर्माणवकं वारयतीत्यतस्तु माणवकवृत्त्यग्निजन्यदाहाऽनुकूलव्यापाराऽभावाऽनुकूलव्यापारो देवदत्तवृत्तिरिति बोधः ॥

अन्तर्द्धौ येनाऽदर्शनमिच्छति—अन्तर्द्धिरन्यकर्तृकस्वकर्मकदर्शनाऽभावाऽनुकूलव्यवहितदेशस्थितिरूपस्तद्घटकं यत्कर्तृकदर्शनाऽभावमिच्छति तदपादानसंज्ञमित्यर्थस्तत्फलितमाह—व्यवधाने सतीति—येनेत्यत्र कर्तरि तृतीया । नाऽत्र कृद्योगलक्षणा षष्ठी शङ्कनीया । उभयप्राप्तौ कर्मण्येव तद्विधानात् प्रत्यासत्त्या आत्मनोगम्यमानत्वादस्त्युभयप्राप्तिरिति भावः । मातुर्निलीयते कृष्णः' मातृकर्तृकस्वकर्मकदर्शनेच्छा कृष्णवृत्तिरिति मातृशब्दादपादानत्वेन पञ्चमी । ननूक्तोदाहरणे व्यवहितदेशस्थितेर्धातुना प्रतिपादनेऽपि कथमिच्छाया लाभ इति चेन्न । आक्षेपेण तल्लाभात् । अन्तर्द्धौ किमिति । अयम्भावः, सूत्रे तदनुपादाने यत्कर्तृकदर्शनाऽभावमिच्छति तदपादानमित्यर्थे चोरान्न दिदृक्षते इत्यत्र चोरकर्तृकस्वकर्मकदर्शनाऽभावेच्छाया देवदत्तादिवृत्तित्वाच्चोरशब्दादपादानत्वाऽऽपत्तिः । तदुपादाने तु व्यवधाने सतीत्यस्याऽप्यर्थकुक्षिप्रविष्टत्वेन प्रकृते तदभावान्नापत्तिरिति । सूत्रे येनेत्यस्याऽभावे स्वकर्मकदर्शनाऽभावं य इच्छति तदुपादानमित्यर्थे कर्तुरेवोक्ताऽऽपत्तिस्तत्सत्त्वे तु यत्कर्तृकेत्यर्थघटितोक्तार्थे न कर्तुस्तदापत्तिः । इच्छतिग्रहणाऽभावे यत्र दर्शनाऽभाव एव तत्रैवाऽपादानसंज्ञा स्यात् । तद्ग्रहणसत्त्वे तु अदर्शनेच्छाया तदनुकूलव्यापारकरणे दैववशाद्दर्शने सत्यप्युक्तसंज्ञा भवतीत्यलम् ॥

अन्यारादिति—अत्राऽन्येत्यर्थग्रहणं तेनाऽन्यार्थकशब्दयोगे पञ्चमीति तदर्थः । अन्यार्थश्च भेदाऽऽश्रयो नतु भेदमात्रम् । अत एव घटाद्भिन्न इत्याद्युपपत्तिः । शेखरकारास्तु—'पञ्चमी विभक्ते'रित्यत्र विभागार्थकविभक्तपदेन भेदस्य व्याख्यानात् 'ध्रुवमपाये' इति सूत्रे अपायशब्देन भेदस्याऽपि ग्रहणादपादाने पञ्चमीत्येव पञ्चमीसिद्धावन्येत्यर्थग्रहणमनादेयमित्याहुः ॥

ननु सहाञ्चतीति सध्र्यङित्यत्र पञ्चम्यभावाय दिक्शब्दसाहचर्येण दिग्वाचकस्यैवाऽञ्चूत्तरपदकस्य ग्रहणादिक्शब्दयोगे पञ्चमीविधानादेवाऽञ्चूत्तरपदकयोगेऽपि पञ्चमीविधानसुलभत्वेन सूत्रे पृथगञ्चूत्तरपदग्रहणम्व्यर्थमित्यत आह—अञ्चूत्तरपदस्येति ॥

प्रभृतियोगे पञ्चमीति—प्रभृत्यर्थयोगेऽपि पञ्चमीति तदर्थः । अपादाने पञ्चमीति सूत्रस्थं भाष्यमेवाऽत्र प्रमाणम् । तत्र हि—(यतश्चाऽध्वकालनिर्माणं ततः पञ्चमी कार्तिक्या आग्रहायणी मास) इति वार्त्तिकं प्रत्याख्यातुम् (इदमत्र प्रयोक्तव्यं सत्र प्रयुज्यते कार्त्तिक्याः प्रभृत्याग्रहायणीमास) इत्युक्तम् । प्रभृतिशब्दाऽभावेऽपि तदर्थसत्तामात्रेण पञ्चमीत्यर्थकेनाऽनेन भाष्येण प्रभृत्यर्थयोगे पञ्चमीति वचनं बोध्यते । अन्यथा प्रभृतिपदाऽभावादुक्तवार्त्तिकस्य पञ्चम्यर्थमावश्यकत्वेन तत्प्रत्याख्यानमसंगतं स्यात् । एवञ्च मेरुपृष्ठादारभ्य ध्रुवपर्यन्तं ग्रहनक्षत्रतारागणचित्रितोऽन्तरिक्षलोक इत्यत्र प्रभृत्यर्थकाऽऽरभ्यशब्दयोगेऽपि प-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ञ्चमी। अवीचिमारभ्येत्यत्राऽऽरभ्येत्यस्य गृहीत्वेत्यर्थेन प्रभृत्यर्थकत्वाऽभावान्न पञ्चमीत्यलम्॥

नु (अपपरिबहिरञ्चवः पञ्चम्या) अत्र सूत्रे परस्परसाहचर्य्यादपपर्योर्वर्जनार्थयोः कर्मप्रवचनीयसंज्ञकयोरेव ग्रहणात्तद्योगे (पञ्चम्यपाङ्परिभिरि)ति पञ्चमीविधानेन (लक्षणप्रतिपदोक्त) परिभाषयाऽऽपपरिनिमित्तकसुबन्तस्यैव ग्रहणेन च पञ्चम्यैव समासस्य सिद्धत्वात् अपपरिसाहचर्य्यादुक्तपरिभाषया चाऽञ्चूत्तरपदेनाऽपि अन्यारादिति विहितपञ्चम्यैव समासस्य सिद्धत्वाच्च पूर्वोक्तसूत्रस्थं पञ्चमीग्रहणं व्यर्थं सत् बहिश्शब्दस्य पञ्चम्यन्तेन समासविधानद्वारा बहिश्शब्दयोगेऽपि पञ्चमी भवतीति ज्ञापयतीत्याह–अपपरिबहिरिति समासविधानाज्ज्ञापकाद्बहिर्योगे पञ्चमीति। पञ्चम्यन्तेन समासविधानाज्ज्ञापकादिति तदर्थः। ज्ञापकसिद्धस्याऽसार्वत्रिकत्वात्क्वचिद्बहिश्शब्दयोगे षष्ठ्यपि। तेन मणिबन्धादाकनिष्ठं करस्य करभो बहिरिति सिद्धमिति दिक्॥

ननु 'पृथग्विनानानाने'ति सूत्रेण विकल्पेन तृतीयाविधानात्तदभावपक्षे 'एनपा द्वितीया' इति प्रकृता द्वितीयैव स्यात्। अस्या वैकल्पिकत्वे पञ्चम्यपि, अस्याश्च नित्यत्वाद्विभक्तित्रयसमावेशो न स्यादिति तदर्थमन्यतरस्यां ग्रहणस्य समुच्चयार्थकत्वमावश्यकमित्याह–अन्यतरस्यां ग्रहणं समुच्चयार्थमिति।

शेखरकृतस्तु–अत्र सूत्रेऽन्यतरस्यांग्रहणस्य न द्वितीयासमुच्चयार्थकत्वम्, फलाऽभावात्। न च द्वितीयासमुच्चयार्थकत्वे।

विना वातं विना वर्षं केनेमौ पातितौ द्रुमौ।

इत्यत्र द्वितीया भवतीति वाच्यम्। ऋतेशब्दयोग इव ततोऽन्यत्राऽपि दृश्यते इत्यनेनैव तत्र द्वितीयासिद्धेः। अत्र सूत्रे द्वितीयाया असम्बन्धादेव भाष्यकृता नोक्तो द्वितीयासमुच्चयः। यद्यत्र द्वितीयासम्बन्धः स्यात्तदा 'करणे च स्तोकाल्पकृच्छ्रकतिपयस्ये'ति सूत्रेऽपि पञ्चमीसमुच्चयार्थम्प्रकृताऽन्यतरस्यां ग्रहणस्य सम्बन्धाऽऽवश्यकत्वात्तत्राऽपि द्वितीयासमुच्चयः स्यादिति तद्भावः। (पञ्चम्या अधिकारे द्वितीयाषष्ठीविषये प्रतिषेधो वक्तव्यः' दक्षिणेन ग्रामं दक्षिणतो ग्रामस्येति) भाष्यात् (षष्ठ्यतसर्थप्रत्ययेने)त्यतः प्राक् (एनपा द्वितीये)ति सूत्रमिति सूचितम्। अन्यथा सूत्रपाठक्रमत्यागे न्यायप्राप्तषष्ठ्याः पूर्वनिपाताऽकरणे च न किमपि बीजम्। एवञ्चान्यतरस्यांग्रहणस्य नैव द्वितीयासमुच्चयार्थकत्वमित्याहुरित्यलम्॥

इति पञ्चमी।

अथ सम्बन्धकारकप्रकरणम्

षष्ठी शेषे। अत्र सूत्रे शेषपदेन कर्मादिभ्यो येऽन्येऽर्थाः स शेष इति भाष्यकृतोक्तत्वात्कारकप्रातिपदिकार्थभिन्नस्य स्वत्वादेर्ग्रहणम्। स च शेषः स्वत्वत्वादिरूपेण सम्बन्धत्वेन रूपेण च षष्ठीवाच्यः। राज्ञः पुरुषोऽस्तीत्येतद्वाक्यजन्यशाब्दबोधाऽनन्तरं पुरुषो राजस्वत्ववान्नवेति सन्देहो न भवतीति यथा विशेषरूपेण कल्प्यते तथा राजसम्बन्धी न वेति च सन्देहाऽनुत्पत्त्या सामान्येन सम्बन्धत्वेन रूपेण च शेषस्य षष्ठीवाच्यता कल्प्यते इति भावः। राजनिरूपितस्वत्ववदभिन्नपुरुषकर्तृकसत्तेति बोधः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रुजाऽर्थानामिति । रुजा व्याधिरर्थो येषान्ते रुजार्थास्तेषां तथोक्तानाम् । धातोर्भाववचनत्वस्याऽव्यभिचारेण सामर्थ्याद्वचन इति कर्तरि ल्युट्प्रकृत्यर्थोऽविवक्षितस्तदाह—भावकर्तृकाणामिति ॥

हिंसायां किम्, धानापेषणमिति । (जासिनिप्रहणे)ति सूत्रे हिंसाग्रहणाऽभावे प्रत्युदाहरणभूतोक्तप्रयोगे उक्तसूत्रेण षष्ठ्याऽऽप्राप्त्या (प्रतिपदविधाना षष्ठी न समस्यते) इति समासनिषेधेन धानायाः पेषणमित्यसमस्तप्रयोगाऽपत्तिः । तद्ग्रहणसत्त्वे तु पिष्धातोरत्र हिंसार्थकत्वाऽभावादनेन षष्ठ्यप्राप्त्या कर्तृकर्मणोरिति षष्ठ्या समासे तदुपपत्तिरिति भावः ॥

ननु गामस्य तदहःसभायां दीव्येयुरित्यत्र नित्यं षष्ठीप्राप्तौ विकल्पार्थं 'द्वितीया ब्राह्मणे' इति सूत्रमिति भाष्यात् 'दिवस्तदर्थस्ये'त्यत्र न शेषपदसम्बन्ध इत्याशयेन तिङन्तमुदाहरति–शतस्य दीव्यतीति । यदि 'दिवस्तदर्थस्ये'त्येतत्सूत्रस्याऽपि शेषपदसम्बन्धेन समासनिवृत्तिफलकत्वं स्यात्तदा यत्र समासस्य प्राप्तिसम्भावना तादृशं कृदन्तमेवोदाहरेत् । तथाऽकरणेन ज्ञायते नाऽत्र शेषपदसम्बन्ध इति भावः ॥

ननु 'दिवस्तदर्थस्ये' त्यादिसूत्रेण व्यवधानाच्छेषपदाऽसम्बन्धेनाऽधिकरणकारक एव षष्ठीविधानस्य समुचितत्वेन शेषग्रहणं व्यर्थमित्याशयेनाशङ्कते–शेषे किमिति । समाधत्ते–द्विरह्न्यध्ययनमिति । शेषपदाऽसम्बन्धेऽधिकरणं षष्ठीविधानात्प्रत्युदाहरणभूतोक्तप्रयोगे षष्ठ्यापत्तिरिति तद्व्यावृत्त्यर्थं वृत्त्यादिप्रामाण्यात् 'अधीगर्थदयेशामि'ति सूत्रे कर्मादीनामविवक्षा शेष इति भाष्ये कर्मादीनामित्यत्र बहुवचनेनात्रापि शेषपदसम्बन्धबोधनाच्च मण्डूकप्लुत्या शेषपदसम्बन्ध आवश्यक एवेति समाधातुराशयः । वस्तुतस्तु उक्तभाष्ये बहुवचनेन नाऽत्र सूत्रे शेषपदसम्बन्धलाभः । कर्माश्रयषष्ठीविषये सूत्रोपात्तसकर्मकाणामकर्मकवद्वचनमिति वार्त्तिकं प्रत्याख्यातुं शेष इति वर्त्तते इति भाष्यकृतोक्ते परेण शेषश्च क इति पृष्टे कर्मादीनामविवक्षा शेष इति सिद्धान्तिना स्मारितत्वात् । सिद्धान्तिभाष्यकारेण शेषपदार्थः स्मारितः । नैतावता कृत्वोर्थेत्यत्र शेषपदसम्बन्ध इति लभ्यते । (१)किञ्चैतद्भाष्यबलेन दिवस्तदर्थस्येत्यत्र शेषपदसम्बन्धो लभ्यते । (२)अन्यथा वार्त्तिकरीत्या भावे इष्टस्य शतस्य दिव्यत इति प्रयोगस्याऽसिद्धिरापद्येत । (३)अत एव (अधीगर्थादयः प्रेष्यब्रुपर्यन्ताः कर्माश्रयपदेनोच्यन्ते) इति कैयटेन वार्त्तिकव्याख्यायामुक्तम् । (४)एवञ्च शेषपदसम्बन्धेनोक्तवार्त्तिकप्रत्याख्यानवदेतत्सूत्रद्वयप्रत्याख्याने एव भाष्यकर्तुस्तात्पर्य्यम् । नचैवं (५)'द्वितीया ब्राह्मणे' इत्येतत्सूत्रस्थं भाष्यं विरुणद्धीति वाच्यम् । (६)वार्त्तिकरी-

---

(१) प्राचीनव्याख्यायान्दोषमप्याह—किञ्चेति ।

(२) 'दिवस्तदर्थस्ये'ति सूत्रे शेषपदाऽसम्बन्धे इत्यर्थः ।

(३) दिव इति सूत्रे शेषपदसम्बन्धादेवेत्यर्थः । अस्य मूलोक्तकैयटोक्तसूत्रभाष्यपाठाच्छेषपदसम्बन्धलाभ इति । (४) दिव इति सूत्रे शेषपदसम्बन्धे सतीत्यर्थः ।

(५) ननु द्वितीया ब्राह्मणे इत्यत्र भाष्ये गामस्य तदहः सभायामित्यादौ शेषपदासम्बन्धेन दिव इति सूत्रप्राप्तषष्ठीबाधनार्थमेतस्य सूत्रस्योक्तत्वादस्य का गतिरित्याह—द्वितीया ब्राह्मण इति ।

(६) वार्तिककृता हि नोक्ता शेषपदानुवृत्तिः किन्तु तेनाऽकर्मकवद्भाव एवोक्त इति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्योक्तभाष्यस्य सत्त्वादिति तत्त्वम् । (१)किञ्च यदा कर्मणो विवक्षा, न तदा षष्ठी, स्मरत्यहं मातरमित्युक्तम्भाष्ये । भवन्मते यदा कर्मादिविवक्षा भवति । न भवति तदा षष्ठीति वदेत् । (२)एवञ्च 'ज्ञोऽविदर्थस्य करणे' इत्यत्राऽपि न शेषपदसम्बन्ध इति बोद्ध्यम् । एवञ्च नाऽज्ञानार्थकजानातियोगे कदाऽपि तृतीया । (३)शतं दीव्यतीत्यादि च सिद्ध्यति । ज्ञोऽविदर्थस्येत्यत्र शेषपदसम्बन्धाऽभावेऽनेनैव व्यवधानात्कथमुपपत्तिरधीगर्थेत्यत्र भाष्योक्तस्य शेषपदसम्बन्धस्येति नाशंक्यम् । मण्डूकाऽनुवृत्त्या शेषपदसम्बन्धस्य तत्र सुलभत्वादित्यलमतिविस्तरेण ॥

कर्तृकर्मणोः कृति । नाऽत्र सूत्रे शेषपदस्य सम्बन्धः । तथा सति 'षष्ठी शेषे' इत्यनेनैवाऽत्राऽपि षष्ठ्याः सिद्धौ सूत्रमेतद्वैयर्थ्यमापद्येत । नचैतत्सूत्रस्य ज्ञोऽविदर्थस्येति सूत्रवत्समासनिवृत्तिफलकत्वेन चरितार्थत्वसम्भवे कथं वैयर्थ्यमिति वाच्यम् । (कृद्योगा षष्ठी समस्यते) इत्यनेन तत्र समासस्येष्टत्वादुक्तफलकत्वाऽभावेन वैयर्थ्यस्य स्पष्टत्वात् । सूत्रघटककृतिरित्यस्य करोतेर्भावे क्विबुत्पत्तौ कृद्योगे कर्तरि कर्मणि च षष्ठीति सूत्रार्थो निष्पन्नः । कर्तरि षष्ठ्युदाहरणम् । कृष्णस्य कृतिः । कृतिरिति भावे क्तिन्, करणं कृतिः । कर्मषष्ठ्युदाहरणञ्च, जगतः कर्ता कृष्णः । अत्र कर्तृसाहचर्य्याद्भेदसम्बन्धेनाऽन्वयिन एव कर्मणो ग्रहणात्स्तोकं पाक इत्यादौ न क्रियाविशेषणीभूतस्तोकादिपदात्षष्ठी । (४)अन्यथा व्यपदेशिवद्भावेन फलस्य स्वाश्रयत्वात्कर्मत्वेन तत्राऽन्वितस्य स्तोकादेरपि कर्मत्वात्तस्माद्दुर्वारैव षष्ठ्यापत्तिरिति बोध्यम् । (५)किञ्चस्तोकम्पाचक इत्यादौ न क्रियाविशेषणेन स्तोकादिना समानाऽधिकरणसमासो नाऽपि सुप्सुपेत्यनेन सः । स्तोकादेर्धात्वर्थेऽन्वयात्सुबन्तार्थविशेष्येण पाककर्त्राऽन्वयाऽभावेन सामर्थ्यविरहात् । ननु स्तोकं पाक इत्यत्रैव समासाऽभावप्रदर्शनस्य समुचितत्वे स्तोकं पाचक इति प्रयोगाऽन्तरे तत्प्रदर्शनं निष्फलमिति वाच्यम् । 'तृजकाभ्यां कर्तरी'ति सूत्रोदाहरणविषये ओदनस्य पाचक इत्यत्र षष्ठीवत्स्तोकम्पाचक इत्यत्राऽपि सा स्यादिति सन्देहव्यावृत्तये प्रयोगान्तरे तत्प्रदर्शनस्य साफल्यात् । (६)नचैवं द्वितीयाश्रितेत्यादेः वैयर्थ्याऽऽपत्तिः कष्टं श्रित इत्यत्र सुबन्तार्थविशेष्येण श्रवणकर्त्रा कष्टमित्यस्याऽनन्वयेनाऽसामर्थ्यादिति वाच्यम् । तस्याऽरम्भसामर्थ्यादवयवद्वारकसामर्थ्येऽपि प्रवृत्त्या सार्थक्यात् । (७)द्वितीयाप्रकरणोक्तपरेतुमतरीत्या सामर्थ्यस्य सत्त्वाच्च ।

---

(१) सिंहावलोकनन्यायेनाह—किञ्चेति । (२) पूर्वोक्तव्यवस्थासिद्धौ चेत्यर्थः।

(३) दिवस्तदर्थस्येति सूत्रे पूर्वोक्तरीत्या शेषपदसम्बन्धे सति यदा सम्बन्धित्वेन विवक्षा तदा षष्ठी, यदा कर्मत्वशक्तिमत्त्वेन सा तदा द्वितीयेति रूपद्वयसिद्धिरिति भावः ।

(४) अभेदेनान्वयिनः कर्मणो ग्रहणे सतीत्यर्थः ।

(५) अत्र विशेषमाह—किञ्चेति ।

(६) सामर्थ्याऽभावेन समासशास्त्रेऽप्रवृत्ते सतीत्यर्थः ।

(७) प्राप्तोदकेत्यत्र वृत्तिविग्रहयोः समानार्थकत्वार्थं प्राप्तिकर्तृदककर्मेति बोधस्वीकारवत्कष्टेति कर्मणो द्वितीयान्तार्थस्य कर्तर्यन्वयेन कष्टकर्मकाऽभिन्नाश्रयणकर्तेत्यर्थकल्पने सुबन्तार्थविशेष्येणाऽप्यन्वयेन सामर्थ्यमस्तीति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुबन्तार्थविशेष्येणाऽनन्वयेन समासाऽभावादेव, दारुणं यथा भवति तथाऽध्यापक इत्यर्थकस्य दारुणाऽध्यापक इत्यस्य सिद्धये मलोपवचनमारब्धं 'पूजनात्पूजितमि'ति सूत्रे भाष्ये। असामर्थ्येऽपि समासाऽभ्युपगमे तु समासेनैवोक्तप्रयोगोपपत्तौ भाष्यकृत्कृतस्य मलोपवचनस्य स्पष्टमेव वैयर्थ्यं स्यात्। उक्तसूत्रस्थभाष्यमेव क्रियाविशेषणान्न षष्ठीत्यत्राऽपि प्रमाणं वोद्धव्यम् । अन्यथा 'तृजकाभ्यां कर्तरी' तिनिषेधसामर्थ्यादव्यवद्धारकसामर्थ्येऽपि षष्ठीसमासस्य प्रवृत्त्या समासेनैवोक्तप्रयोगोपपत्तौ मलोपवचनस्य स्पष्टैव वैयर्थ्यापत्तिरिति । नच विभाषाऽधिकारेण षष्ठीसमासस्य वैकल्पिकत्वात्तदभावपक्षे दारुणाऽऽध्यापक इत्यस्योपपत्तये मलोपवचनस्य चरितार्थत्वे कथं वैयर्थ्यमिति वाच्यम् । तथा सति वाक्ये मलोपश्च वक्तव्य इत्येव वचनस्य कर्तुमुचितत्वात् । वैयधिकरण्येन समासाऽप्राप्तिविषयकत्वादेव क्रियाविशेषणे दारुणादौ विशेष्येणाऽनन्वयात्समासाऽप्राप्त्या मलोपविधानमिति कैयटेनोक्तम् । न च विशेष्येणाऽनन्वयेऽप्यवयवद्वारकसामर्थ्यमादाय सुप्सुपेति वा मयूरव्यंसकेति वा समासेनोक्तप्रयोगोपपत्तौ तदर्थं कृतस्य मलोपवचनस्य सर्वथा वैयर्थ्याऽपत्त्या क्रियाविशेषणात्पष्ठ्यभावे समासाऽभावे च न तद्विनिगमकं भवितुमर्हतीति वाच्यम् । उक्तसमासविधायकशास्त्रद्वयस्याऽसार्वत्रिकत्वेन पूर्वोक्तयुक्त्या षष्ठ्यभावात्तत्समासस्याऽप्यभावेन चोक्तप्रयोगाऽनुपपत्त्या तदर्थमुक्तवचनस्याऽऽवश्यकत्वेनोक्तविषये विनिगमकत्वस्याऽक्षतेरित्यलम् ॥

ननु कर्तृकर्मभ्यां क्रियाऽऽक्षेपात्तद्वाचिनो धातोरेव सत्त्वात्तेभ्यस्तिङ्कृतो विधानेऽपि तिङ्योगे 'न लोके'ति निषेधेन षष्ठ्यभावे कृद्योगे एव षष्ठीति कृद्ग्रहणं व्यर्थम् । न च देवदत्तेन शत्योऽश्व इत्यादौ तद्धितयोगेऽश्वरूपकर्मणि षष्ठीव्यावृत्त्यर्थं कृद्ग्रहणमावश्यकमिति वाच्यम् । कारकाऽन्वययोग्यताऽवच्छेदकरूपेण साध्यत्वेनोपस्थितक्रियानिरूपितकर्मण्येवाऽनेन षष्ठीति नियमेन तद्धितात्तेन रूपेण क्रियोपस्थित्यभावादश्वस्य तादृशक्रियानिरूपितकर्मत्वाऽभावेन तत्र षष्ठ्यप्राप्तेः । नच कृद्ग्रहणमुत्तरसूत्रेऽनुवृत्त्याऽव्ययपदेन कृदव्ययस्यैव ग्रहणार्थमिति वाच्यम् । अव्ययार्थस्य ये कर्तृकर्मणीति व्याख्यानेन कृदव्ययस्यैव तत्र ग्रहणात् । नच'उभयप्राप्ताविग्त्यत्रान्यपदार्थसम्पादनद्वारा बहुव्रीह्युपपत्त्यर्थं कृद्ग्रहणमिति वाच्यम् । 'एकाचो द्वे' इत्यादाविवाऽन्यपदार्थस्याऽशब्दत्वेऽपि व्याख्यानात्तदुपपत्तेः । न च भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामित्यादौ (१)गौणे णिच्प्रकृत्यर्थकर्तरि षष्ठ्यर्थं करोतीति कृदिति कर्तृपरं कृद्ग्रहणमिति वाच्यम् । गौणे णिच्प्रकृत्यर्थकर्तरि तृतीयावद्यत्वमन्तरैव षष्ठ्या अप्युपपत्तेः । एवञ्च कृद्ग्रहणमव्यर्थमेवेत्याशयेनाऽऽशंकते—कृतिकिमिति । समाधत्ते—(२)तद्धिते माभूत्कृतपूर्वीकटमिति—अयम्भावः—उक्तरीत्या प्रयो-

---

(१) अप्रधाने ।
(२) तद्धिते माभूदिति । तद्धितान्तनिष्ठा या शक्तिः सा च बोधजनकत्वप्रकारतानिरूपितकृतपूर्वात्वावच्छिन्नभगवदिच्छीयविशेष्यतारूपा तस्या यो ग्रहः [ज्ञानं] स च तादृशविशेष्यताख्यविषयताप्रकारककृतपूर्वीपदत्वावच्छिन्नविषयतावत्कृतपूर्वीपदम्भवत्वित्याकारकस्तन्मात्रप्रयोज्योपस्थितिः । पूर्वकालिककृतिकर्तृत्वावच्छिन्नरूपा तद्विषयिका क्रिया कृतिक्रिया तस्याः कर्तरि कर्मणि च षष्ठी माभूदिति तदर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जनाऽन्यथोपपत्त्या व्यर्थीभूतं कृद्ग्रहणं ज्ञापयति, कृदन्तशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियायाः कर्तरि कर्मणि षष्ठी यथा स्यात्, तद्धितान्तशक्तिग्रहमात्रप्रयोज्योपस्थितिविषयक्रियायाः कर्तरि कर्मणि माभूदिति ।

तथा च कृतपूर्वीकटमित्यत्र कटस्य तद्धितान्तशक्तिग्रहमात्रप्रयोज्योपस्थितिविषयक्रियायाः कर्मत्वान्न षष्ठी । ईदृग्वृत्तिघटकतयैव सकर्मकधातुप्रकृतिकभावक्तान्तस्य कृतेत्यस्य प्रयोगेण कृदन्तशक्त्या क्रियोपस्थित्यभावात् । न च निष्ठान्तत्वात् 'न लोकेति' निषेधेनैव तत्र षष्ठ्यभावेनैतत्कृद्ग्रहणकृतनियमफलं युक्तमिति वाच्यम् । निष्ठान्तमात्रवृत्तिशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियानिरूपितकर्मण्येव तेन षष्ठीनिषेधात् । न च कृद्ग्रहणकृतनियमेन कृतपूर्वीकटमित्यत्रेव तण्डुलानां पाचकतर इत्यादावपि षष्ठी न स्यात्, तण्डुलानां पाचकतरेतितद्धितान्तनिष्ठशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियानिरूपितकर्मत्वसत्वादिति वाच्यम् । पाचकादेः पृथक्प्रयोगेण पाचकपदनिष्ठशक्तिग्रहप्रयोज्योपस्थितिविषयत्वस्य निर्बाधेन षष्ठ्युपपत्तेः । कृधातोः कर्मणोऽविवक्षया भावे क्ते कृतमिति ततः पूर्वशब्दस्य तत्समभिव्याहारे कृतं पूर्वमिति विग्रहे "सुप्सुपेतिसमासे 'पूर्वादिनिः' 'सपूर्वाच्चेति' इनिः, ततः कर्मयोगविवक्षया कृतपूर्वीकटमिति सिद्ध्यति । अस्यैवंरीत्या साधुत्वे एतत्सूत्रस्थं भाष्यमेव मानम् । न च प्राक्कर्मणोऽन्वयाऽविवक्षामपि कृतेत्यस्य कर्मणि साकांक्षत्वेन सापेक्षत्वादसामर्थ्येन वृत्तिर्नस्यादिति वाच्यम् । वृत्तेः पूर्वं कर्मान्वयाऽभावेनाऽसाकांक्षत्वात् । न च 'नपुंसके भावे क्तः' इत्यनेन सकर्मकेभ्योऽपि धातुभ्यो भावे क्तप्रत्ययसिद्धौ कर्मणोऽविवक्षया भावे क्तसाधनयत्नो व्यर्थ इति वाच्यम् । उक्तसूत्रेणाऽप्यकर्मकेभ्य एव क्तविधानादित्यलम् ॥

उभयप्राप्तौ कर्मणि—पूर्वसूत्रेणैव सिद्धौ नियमार्थमिदं सूत्रम् । उभयोः प्राप्तिर्यस्मिन्निति बहुव्रीहिः । अस्याश्च गणादेकनिमित्तत्वलाभेनौदनस्य पाकः, ब्राह्मणानाञ्च प्रादुर्भाव इत्यादौ विभिन्नक्रियाकर्तृकर्मणोः षष्ठीप्राप्तौ नायं नियमः प्रवर्त्तते । प्राप्तिपदेनोभयोः प्रयोगे सत्येवाऽयं निषेध इति बोध्यम् ॥

स्त्रीप्रत्यययोरकाकारयोर्नायं नियम इति—'स्त्रियां क्तिन्' इत्यधिकारविहितयोरकाऽकारयोः प्रयोगे कर्मण्येव षष्ठी न तु कर्तरीतिनियमो न प्रवर्तते किन्तु कर्तर्यपि षष्ठी भवत्येव । नचैवं 'सुट् तिथोः' इति सूत्रे सुटा सीयुटो न बाध इति वृत्तिकृदुक्तमनुपपन्नमिति वाच्यम् । कर्तुः करणत्वविवक्षया तदुपपत्तेः ॥

शेषे विभाषा—उक्तसूत्रकृतनियमस्याऽयं विकल्प इत्येके । इत्येतल्लब्धमर्थंस्पष्टप्रतिपत्त्यर्थमाह—केचिदविशेषेण विभाषामिच्छन्तीति—अकाऽकारभिन्नकृन्मात्रे इति तदर्थः ॥

चतुर्थी चाशिषि—आशीर्विषयक्रियाऽन्वय्यर्थकात्प्रातिपदिकात्तद्द्वारके आयुष्यादियोगे चतुर्थीषष्ठ्यावित्यर्थः । क्रियाद्वारकसम्बन्धस्वीकारादेव एतदर्थकचतुर्थ्यन्तानां सुखहितादिभिर्न समासः । देवदत्ताय सुखं भूयादित्यादौ देवदत्तायेत्यस्य सुखादेश्च भूयादित्येतच्छब्दबोध्यक्रियायामन्वयेन परस्परमसामर्थ्यात् ।

इति षष्ठी ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथाधिकरणकारकप्रकरणम् ।

आधारोऽधिकरणम्—'कारके' इत्यधिकारात्क्रियाजनकेऽस्य प्रवृत्तिः । आधारश्चोपस्थितत्वात्क्रियाया एव, तत्राऽऽधारपदेन न साक्षात्क्रियाऽऽधारस्य ग्रहणं; किन्तु परम्परया तदाधारस्य पराभ्यां कर्तृकर्मसंज्ञाभ्यां बाधात् । परम्परा च व्याख्यानात् कर्तृकर्मद्वारैवेत्याह—कर्तृकर्मद्वारेति—उक्तञ्च हरिणा—

कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् ।
उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥ इति ॥

न च कालस्य साक्षात्क्रियाधारत्वसम्भवे कथं परम्पराऽऽधारस्य ग्रहणमिति वाच्यम् । परम्पराऽऽधारग्रहणस्यैवाऽनुभवसिद्धत्वात् । तस्य साक्षात्क्रियाऽऽधारत्वेऽप्याधारपदे स्वरितत्वप्रतिज्ञया परम्पराऽऽधारस्य ग्रहणम् । किञ्च कालस्य साक्षात्तदाधारत्वे कालः पचति भूतानीतिवत्कर्तृत्वमेव स्यात् । परम्पराऽऽधारग्रहणे सिद्धे (यस्य यद्द्वाराकारकत्वं तस्य तद्द्वारैव क्रियान्वयः) इति व्युत्पत्त्याऽस्याऽऽधारस्य कर्तृकर्मद्वारैव क्रियाऽन्वयः । (१)अत एव, अक्षशौण्ड इत्यादौ समासः । यथा कटे शेते चैत्र इतिवाक्यात्कटाऽधिकरणकचैत्रकर्तृकं शयनमिति बोधस्तथाऽक्षाधिकरणकशौण्डकर्तृका भवनक्रियेतिबोधात्साक्षादेव सप्तम्यन्तस्य शौण्डादिभिः सामर्थ्येन समाससंज्ञासिद्धिरिति भावः ।

यत्तु कैयटेनोक्तम्—अक्षेषु शौण्ड इत्यत्राऽऽसक्तपदाऽध्याहारेणाऽसक्तिक्रियाद्वारा सामर्थ्यात्समास इति तन्न हृदयग्राहि, भाष्यकृता तस्याऽर्थस्याऽनुक्तत्वाद् यत्र च क्रियावाचकपदन्न श्रूयते तत्राऽपि तदन्वययोग्यक्रियावाचकपदाऽऽध्याहारेण क्रियाऽऽधारत्वस्योपपादनीयत्वान्मूले वृक्षः कपिसंयोगीत्यादावस्तिक्रियामध्याहृत्य तस्याः स्वकर्तृकपिसंयोगिवृक्षद्वारा मूलवृत्तितया मूलस्याऽऽधारत्वं बोध्यमिति दिक् ॥

औपश्लेषिकवैषयिकाऽभिव्यापकभेदादाधारस्त्रिधा । उप–समीपे श्लेष उपश्लेषस्तत्कृत औपश्लेषिकः । यन्मासेऽतिक्रान्ते दीयते तस्य मास औपश्लेषिकमधिकरणमिति 'तत्र च दीयते' इति सूत्रभाष्योक्तेः । अत एव, 'इको यणचि'त्यत्राऽचीत्यौपश्लेषिकाऽऽधारे सप्तमी । कटे आस्ते, स्थण्डिले शेते इत्याद्युदाहरणम् । कटाधिकरणिकैककर्तृकाऽऽसनक्रिया । स्थण्डिलाऽधिकरणिकैककर्तृका शयनक्रियेति बोधः । विषयकृतो वैषयिकः, अप्राप्तिपूर्वकप्राप्तिरूपसंयोगसमवायाऽतिरिक्तसम्बन्धेन यदधिकरणं तद्वैषयिकमधिकरणमिति फलितम् । मोक्षे इच्छाऽस्ति इत्याद्युदाहरणम् । स्थाल्यधिकरणककर्तृवृत्तिविक्लित्यनुकूलव्यापारः । मोक्षविषयकेच्छाकर्तृकसत्तेति बोधः । यत्र सर्वाऽवयवावच्छेदेनाऽभिव्याप्तिस्तदभिव्यापकमधिकरणम् । तिलेषु तैलं, दध्नि सर्पिः, सर्वस्मिन्नात्माऽस्तीत्याद्युदाहरणम् । तिलव्यापकाऽधिकरणकतैलकर्तृकसत्ता । दधिव्यापकाऽधिकरणकसर्पिःकर्तृकसत्ता । सर्वव्यापकाऽधिकरणकाऽऽत्मकर्तृकसत्तेत्येवं रीत्या बोधः । एतान्येव मुख्याधिकरणोदाहरणानि । पूर्वोक्तानि तु गौणाधिकरणस्येति बोध्यम् । अधिकरणत्वशक्तिमानधिकरणविभक्त्यर्थः ॥

क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्—इन्प्रकृतेः क्तान्तस्य कर्मणि सप्तमीति

(१) उक्तनियमस्वीकारादेवेत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तदर्थः। तेनाऽधीती व्याकरणे इत्यत्र सप्तमी। कृतपूर्वीकटमित्यत्र न सप्तमी क्तान्तस्येन्प्रकृतित्वाऽभावात्। अत्र न क्तः किन्तु भावे, अन्यथा क्तप्रत्ययेन कर्मण उक्तत्वात्तत्र सप्तम्यनापत्तेः। अधिपूर्वकादिङ्गा भावे क्ते तत 'इष्टादिभ्यश्चे'ति कर्तरीनौ गुणभूतक्रियया सम्बध्यमानव्याकरणरूपकर्मणि सप्तम्योक्तप्रयोगोपपत्तिरिति बोध्यम्। अत्र कर्मपदेन कालाऽतिरिक्तस्यैव ग्रहणान्मासमधीतीत्यादौ न मासशब्दात्सप्तमीत्यलम्॥

साध्वसाधुप्रयोगे च—वार्त्तिकमिदं शेषषष्ठ्यपवादभूतं बोध्यम्। ननु 'साधुनिपुणाभ्यामि'त्येव सिद्धेऽत्र साधुग्रहणं व्यर्थमिति चेन्न। अर्चाऽविवक्षणे तत्त्वकथनमात्रेऽपि साधुर्भृत्यो राज्ञ इत्यादौ सप्तम्यर्थन्तस्याऽऽवश्यकत्वात्। नचोक्तसूत्र एवं साधुग्रहणं मास्त्विति वाच्यम्। अर्चाविवक्षणे प्रतिप्रयोगे सप्तमीनिवृत्त्यर्थन्तस्याऽऽवश्यकत्वात्॥

निमित्तात्कर्मयोगे—प्रत्यासत्त्या स्वाऽन्वयिक्रियाकर्मणा योगे सति निमित्तवाचकात्प्रातिपदिकात्सप्तमीत्यर्थः।

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः।

द्वीपिचर्मणोरण्डकोपसृगयोश्च समवायसम्बन्धः। दन्तकुञ्जरयोः केशचर्मणोश्च संयोगसम्बन्धः। देवदत्तकर्तृवृत्तिचर्महेतुकद्वीपिनिष्ठप्राणवियोगाऽनुकूलव्यापार इत्यादिक्रमेण बोधः। नचाऽनेन निमित्तवाचकात्सप्तमीविधानात्मुक्ताफलाय करिणं रघुवीर हन्तीति रघुवंशप्रयोगोऽनुपपन्नः, निमित्तवाचकान्मुक्ताफलशब्दात्सप्तम्या दुर्वारत्वादिति वाच्यम्। मुक्ताफलं लब्धुमित्यर्थे 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति चतुर्थ्या एव प्राप्तेरिति॥

यस्य च भावेन भावलक्षणम्—भावः क्रिया सा लक्ष्यते येन तद्भावलक्षणम्। यस्येत्यत्र वृत्तित्वं षष्ठ्यर्थः। भावेनेत्यत्र प्रयोज्यत्वं तृतीयाऽर्थः। तथा च यद्वृत्तिक्रियाप्रयोज्यक्रियान्तरं लक्ष्यते ततोऽर्थाज्ज्ञापकक्रियाश्रयवाचकात्प्रातिपदिकात्सप्तमीत्यर्थः। तेन गोषु दुह्यमानासु गत इत्यत्र द्वाभ्यां गोपद्दुह्यमानपदाभ्यां सप्तमीसिद्धिः। ज्ञापकक्रियाश्रयवाचकः कर्त्ता कर्म च, तत्र ब्राह्मणेष्वधीयानेषु गत इतिकर्तर्युदाहरणम्। कर्मणि तु प्रागेवोदाहृतम्। अत्र काचित्क्रिया स्वाऽऽधारकालेनाऽन्यां क्रियां बोधयति, यथा प्रकृते, काचित्तु स्वाऽऽधारकालाऽव्यवहितपूर्वकालेन गोषु दुग्धास्वित्यादौ। एतत्सूत्रविहितसप्तम्या ज्ञापकत्वमर्थः। इदं सूत्रं स्वप्रवृत्तौ शब्दबोध्यमेव लक्ष्यलक्षणभावमपेक्षते न तु तस्य भूयोऽवयवदर्शनम्। ननु सूत्रेण ज्ञापकक्रियावाचकात्सप्तमीविधानेन राहूपरागे स्नायादित्यत्र ज्ञापकक्रियावाचकपदाऽभावात्सप्तमी न स्यादिति चेन्न। तत्र राहूपरागपदेन तदाश्रयकालस्य ग्रहणेनाऽधिकरणसप्तम्या एव प्राप्तेः। विवाहे नान्दी मुखं कुर्यादित्यत्र विवाहपदेन तत्प्राक्कालस्य ग्रहणादधिकरणसप्तम्येवेति दिक्॥

अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च—यस्यां क्रियायां ये उचितास्तेषां कर्तृत्वे विवक्षिते, तथा यस्यां क्रियायां येषां कर्तृत्वस्य अनौचित्यं तेषां अकर्तृत्वविवक्षणे तथा तद्वैपरीत्ये येषां कर्तृत्वस्यौचित्यन्तेषामकर्तृत्वे येषान्तदनुचितन्तेषां कर्तृत्वे विवक्षिते सप्तमी वाच्येति वार्तिकार्थः। एषामुदाहरणानां मूले एव स्पष्टतया नात्र लिखितानि॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

षष्ठी चानादरे—अनादर इति विषयसप्तमी । यस्य च भावेनेत्याद्यनुवर्तते । तथा च, अनादरस्य गम्यमानत्वे सति यत्क्रियाप्रयोज्यक्रियान्तरं लक्ष्यते ततः षष्ठी सप्तमी चेत्यर्थस्तत्फलितमाह–**अनादराधिक्य इति** । लक्ष्यलक्षणभावोऽत्र षष्ठ्यर्थः । प्रपूर्वकस्य व्रजतेरनादरविशिष्टं प्रव्रजनमर्थः । तत्र षष्ठी तात्पर्य्यं ग्राहयति । प्रत्यासत्त्या पुत्रादिविषयकाऽनादर एव गृह्यते इति भावः ॥

यतश्च निर्धारणम्—ननु यस्मात्समुदायान्निर्धारणं पृथक्करणं तादृशसमुदायघटकावृत्तिधर्मवत्त्वबोधनम् यत्र, तत्र तादृशसमुदायवाचकात्प्रातिपदिकात्षष्ठीसप्तम्यौ स्त इत्यर्थेन शब्दस्य समुदायवाचकत्वाऽभावान्नराणां क्षत्रियः शूर इत्यादौ षष्ठ्युपपत्तिर्न स्यादित्यत आह—**जातिगुणक्रियासंज्ञादिभिरिति** । विशिष्टस्येत्यध्याहारः तथा च, जातिगुणक्रियाविशिष्टस्यैकदेशस्य यतः स्वघटितसमुदायात्स्वेतरसमुदायघटकावृत्तिधर्मकरणकं पृथक्करणं तद्वाचकात्प्रातिपदिकात्षष्ठीसप्तम्यावित्यर्थो निर्गलितः । सूत्रे यत इत्यस्याऽभावे यस्य जात्यादिविशिष्टस्य स्वेतरावृत्तिधर्मवत्त्वबोधनं तत एव षष्ठ्यापत्तिः । क्षत्रियत्वजातिविशिष्टस्य क्षत्रियस्य स्वेतरब्राह्मणाद्यवृत्तिशूरत्वधर्मबोधनमिति क्षत्रियशब्दादेव तदापत्तिः तद्व्यावृत्त्यर्थं यत इत्यावश्यकमिति भावः । ननु क्षत्रियशब्दात्प्रथमाया एव प्राप्तौ तस्मादुक्तापत्तेरसम्भवेन कथं यत इत्यस्याऽसत्त्वे ततस्तदापत्तिप्रदर्शनं युक्तमिति वाच्यम् । षष्ठ्यपवादत्ववत्प्रथमाऽपवादत्वस्याऽपि सम्भवात् । स्वघटितसमुदायावधिकस्वेतरसमुदायघटकावृत्ति धर्मकरणकं पृथक्करणरूपनिर्धारणविषयत्वरूपोऽवयवाऽवयविभावरूपश्च सम्बन्धो विभक्त्यर्थः । नृणां नृषु वा द्विजः श्रेष्ठ इत्याद्युदाहरणानि । नृसमुदायावधिकद्विजेतरनराऽवृत्तिश्रेष्ठत्वकरणकपृथक्करणरूपनिर्धारणविषयो द्विजः श्रेष्ठ इत्येवं रीत्या बोधः । निर्धारणविषये उद्भूताऽवयभेदविवक्षया बहुवचनमेव न तु तिरोहिताऽवयवभेदविवक्षयैकवचनं 'कारके' इत्यत्र भाष्ये कारकेष्विति ब्रूयादित्युक्त्या तस्याऽसाधुत्वबोधनात् । नचैवं 'मिदचोऽन्त्यात्परः' इत्यत्रैकवचनं निर्धारणेऽसङ्गतमिति वाच्यम् । तत्र सौत्रत्वादेकवचनोपपत्तेः । नचैवमपि द्वन्द्वः सामासिकस्य चेति गीतावाक्यस्य का गतिरिति वाच्यम् । समाससमूहमध्ये समूहेऽर्थे 'अचित्ते'ति ठक एव तत्र गतित्वादिति दिक् ॥

पञ्चमी विभक्ते—अत्र यतश्च निर्धारणमित्यनुवर्तते । विभागश्चात्र भेदः । तत्र निर्धारणे सर्वत्र यथा कथञ्चिद्भेदस्य सत्त्वाद्विभक्तग्रहणसामर्थ्येन यत्र भेद एव तत्रैवाऽस्य प्रवृत्तिर्नतु केनाऽप्युपात्तरूपेण भेदसत्त्वे, इति नियमादाह—**यत्र निर्धार्य्यमाणस्य भेद एवेति** । निर्धारणविषयत्वरूपोऽत्र पञ्चम्यर्थः । माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यतः पाटलिपुत्रकाऽवधिकनिर्धारणविषया माथुरा आढ्यतरा इति बोधः । एवञ्च पूर्वोक्तनिर्धारणनिरूपकवाचकस्य तदाश्रयवाचकस्य उक्तनिर्धारणप्रयोजकधर्मवाचकस्य च यत्रोपादानमुच्चारितेन शब्देन प्रतीतिस्तत्रैवैतत्सूत्रविहितपञ्चम्यन्तस्य साधुत्वम् । ननु पुरुषोत्तम इत्यत्र पुरुषाणामुत्तम इत्यर्थप्रतीत्या 'यतश्च निर्धारणमि'त्यनेन षष्ठीविधानात् 'न निर्धारणे' इति समासनिषेधः स्यादिति चेन्न । सम्बन्धसामान्ये षष्ठ्या समासोपपत्तेरित्यलम् ॥

नक्षत्रे च लुपि—लुप्शब्दस्याऽभावबोधकत्वात्तत्र नक्षत्रवाचकस्य वृत्तिर्नस्यादिति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लुप्शब्देन लुप्संज्ञया लुप्तप्रत्ययार्थो लक्ष्यते तदाह—नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञये-त्यादि—मूलेनाऽऽवाहयेद्देवीमिति । नक्षत्रवाचकान्मूलशब्दात् 'नक्षत्रेण युक्तः कालः' इत्यनेनाऽण् तस्य 'लुबविशेषे' इति लुप् । मूलनक्षत्रयुक्तचन्द्रकालाऽधिकरणदेवीकर्मक-वाहनमिति बोधः । 'सप्तम्यधिकरणे चे'त्यतो मण्डूकप्लुत्याऽनुवृत्तस्याऽधिकरणस्याऽग्रहणे-ऽस्य सूत्रस्य सर्वविभक्त्यपवादत्वेनेतराऽनपेक्षत्वरूपाऽन्तरङ्गत्वात्प्रातिपदिकार्थं एव षष्ठी-सप्तम्योर्विधानेन अद्य पुष्य इति प्रयोगो न सिद्ध्येदिति तदर्थन्तदावश्यकमिति । नक्षत्र इत्यस्याऽसत्त्वे पञ्चालेषु तिष्ठन्ति अत्र पञ्चालशब्दादुभयविभक्त्यापत्तिरतस्तत् । तत्र 'जनपदे लुबि'ति लुप् ॥

सप्तमीपञ्चम्यौ कारकमध्ये—'कालाऽध्वनोरत्यन्तसंयोगे' इत्यस्मात्कालाऽध्व-नोरित्यनयोरनुवृत्तिः । तौ च पञ्चम्या विपरिणम्येते । कारकशब्दोऽत्र शक्तिपरः । मध्य-शब्दस्याऽवधिद्वयसापेक्षत्वाद्द्विवचनान्तेन कारकशब्देन समासः, कारकयोर्मध्ये इति विग्रहः । शक्तिद्वयस्य शक्तित्वेनैव बोधो न तु द्वित्वेन । ननु कर्तृरूपकारकस्यैकत्वाद्भेद-निबन्धनमध्यव्यपदेशो न स्यादिति चेन्न । कर्तृत्वादिशक्तेरेव कारकरूपत्वात्तस्याश्च काल-भेदेन भेदादुक्तव्यपदेशोपपत्तेरित्याह—**शक्तिद्वयमध्ये यौ कालाऽध्वानावित्यादि**—अवध्यवधिमतोः साजात्यनियमात्कालाऽध्वनोः कारकमध्येऽसम्भवाच्छक्तिशब्देन शक्त्या-श्रयकालग्रहणं बोध्यम् । षष्ठ्या बाधकोऽयं योगः स्वाऽनन्तरकालवृत्तित्वादिकं विभक्त्यर्थः।

यस्य चेश्वरवचनमित्यत्र प्रमाणाऽभावाल्लक्ष्याऽनुरोधेन व्याख्यानाच्च निरूपितत्वस्य वृत्तित्वस्य वा षष्ठ्यर्थत्वेन यन्निरूपितेश्वरत्वं गम्यते यन्निष्ठेश्वरत्वं च गम्यते ततः सप्त-मीत्यर्थं इत्याह—**स्वस्वामिभ्यां पर्यायेण सप्तमीति**—क्रमेणोदाहरणम् । अधि भुवि रामः, अधिरामे भूः । **इत्यधिकरणकारकप्रकरणम्** ॥

इति कारकप्रकरणम् ।

अथाव्ययीभावसमासप्रकरणम् ।

ननु कारकान्तेन सुप्संज्ञोद्देश्यसम्बन्धिन्याः संज्ञायास्तत्प्रयुक्तकार्यस्य च निरूपणा-ऽनन्तरं प्रसङ्गतस्समासनिरूपणमारभते—**समर्थः पदविधिरिति**—विधीयते इति विधिः कर्मसाधनः । तस्य षष्ठ्यन्तेन पदशब्देन समासः । पदस्य विधिः पदविधिरिति । समर्थ-पदस्य समर्थाश्रितोऽर्थः । तथा च, पदसम्बन्धी विधिः समर्थाश्रितो भवतीत्यर्थः । साम-र्थ्यं द्विविधम्—व्यपेक्षारूपम् , एकार्थीभावरूपञ्च अत्रैकार्थीभावरूपमेव सामर्थ्यं न तु व्यपेक्षारूपं व्याख्यानात् समासादिवृत्तिषु तस्याऽसम्भवाच्च । एकार्थीभावश्च (संसृष्टाऽर्थं समर्थमि)ति भाष्यात् विशेष्यविशेषणभावाऽवगाह्येकोपस्थितिजनकत्वरूपः ।

शाब्दिकनये—समुदायशक्त्यङ्गीकारादस्ति कृत्तद्धितैकशेषसमाससनाद्यन्तधातुरूप-पञ्चवृत्तिष्वेकार्थीभावरूपसामर्थ्यम् । अत एव राजपुरुष इत्यादिसमासे न पदार्थैकदेशे राज्ञि ऋद्धादिविशेषणाऽन्वयः (पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेने)ति व्युत्पत्तेः । एतत्फलितार्थकथनमेव (सविशेषणानां वृत्तिर्न वृत्तस्य विशेषणयोगे ने)ति बोध्यम् । नचोक्तरीत्या पदार्थैकदेशे विशेषणान्वयस्याऽभावप्रतिपादनाद्देवदत्तस्य गुरुकुलम् , ऋद्ध-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्य राजमातङ्गा इत्यादेः प्रयोगस्याऽप्रामाण्यापत्तिरिति वाच्यम् । गमकत्वात्तत्र विशे-पणाऽन्वयस्य युक्ततया तस्य प्रामाण्योपपत्तेः । न च महादेव इत्यत्राऽऽत्वं न स्यात्समासे समुदाये शक्त्या तस्यैवाऽर्थवत्त्वेन तदेकदेशस्याऽनर्थकत्वेन सूत्राप्राप्तेरिति वाच्यम् । सूत्रा-ऽऽरम्भसामर्थ्याद्भूतपूर्वगतेराश्रयणाच्च सूत्रप्रवृत्तेरित्यलम् ।

वैयाकरणैः—समासे समुदाये एव शक्तिः स्वीक्रियते नत्ववयवे; तथाहि–रथन्तरं, सप्तपर्णः, शुश्रूपेत्यादाववयवार्थप्रतीत्यभावात्समासादिपञ्चसु विशिष्ट एव शक्तिः । अत एव व्यपेक्षापक्षस्योद्भावनं कृत्वा (अथाऽस्मिन् व्यपेक्षारूपसामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्य) इत्युक्तम्भाष्ये । अत एव च धवखदिरौ । निष्कौशाम्बिः । गोरथः । घृतघटः । गुडधानाः । केशचूडः । सुवर्णालङ्कारः । द्विदशाः । सप्तपर्णः इत्यादौ साहि-त्य-क्रान्त-युक्त-पूर्ण-मिश्र-संघात-विकर-सुच्प्रत्ययलोप-वीप्साद्यर्था न वचनरूपेण वाच्या भवन्ति । अन्यथा तत्तदर्थं वचनं कर्त्तव्यमेव ।

यत्तु तार्किकमीमांसकादयः—राजपुरुप इत्यादौ राजपदादेः सम्बन्धिनी लक्षण-यैव राजसम्बन्धवदभिन्नः पुरुप इति बोधः स्यादेव समासे न स्वीकार्या शक्तिः । अत एव राज्ञः पदार्थैकदेशत्वेन तत्र ऋद्धादिविशेपणाऽन्वयो न (पदार्थः पदार्थेनान्वेति) इत्युक्तेः (सविशेपणानां वृत्तिर्न)त्युक्तेश्च । धवखदिरावित्यादौ न साहित्याद्यर्थप्रत्यायकवचनक-र्त्तव्यतापत्तिः लक्षणयैवोक्तार्थत्वात् (उक्तार्थानामि)ति न्यायेन तदप्रयोगात् । लक्षणया राजसम्बन्ध्यभिन्न इति बोधनेच्छायां समासस्य, राजसम्बन्धवानिति बोधनेच्छायां वि-ग्रहस्य च प्रयोगनियमसम्भवे 'विभाषे'ति सूत्रस्याऽपि नाऽऽवश्यकत्वम् । न चोक्तस्थ-लेपूक्तप्रकारेण विशिष्टशक्त्यनभ्युपगमेऽप्यवयवशक्त्यैव निर्वाहेऽपि पङ्कजशब्दात्पङ्कजनिकर्तृ-रूपार्थलाभार्थं समुदायशक्तिरावश्यकेति वाच्यम् । उक्तार्थस्य योगादेव लाभादित्याद्याहुः ।

तन्न, विशिष्टशक्त्यनङ्गीकारे विशिष्टस्याऽर्थवत्त्वाऽभावेन प्रातिपदिकत्वाऽनापत्तेः । अत एव अर्थवत्सूत्रभाष्ये अर्थवदिति किम् । अर्थवतां समुदायोऽनर्थकः, दश दाडिमानि षड-पूपाः, कुण्डमजाजिनमिति प्रत्युदाहृतम् । एवञ्च त्वन्मते राजपुरुपपदयोः प्रत्येकमर्थवत्त्वे-ऽपि समुदायस्य तत्त्वाऽभावात्प्रातिपदिकत्वं न स्यात् । नचोत्तरसूत्रे समासग्रहणात्सुल-भैव संज्ञेति वाच्यम् । समासग्रहणस्य नियमार्थत्वस्य भाष्यकृतैवोक्तत्वात् । अन्यथा सिद्धिं विना नियमत्वाऽसम्भवात् । समासग्रहणस्य नियमार्थत्वादेव राज्ञः पुरुपः, देव-दत्तः पचतीत्यादिवाक्यस्य मूलकेनोपदंशमित्यादेश्च न प्रातिपदिकसंज्ञा । किञ्च विशि-ष्टशक्त्यस्वीकारे शक्यसम्बन्धरूपलक्षणाया अप्यसम्भवाल्लाक्षणिकार्थवत्त्वस्याऽप्यभावेन सर्वथा प्रातिपदिकत्वाऽभावस्य निश्चितत्वेन स्वाद्यनुत्पत्तौ (अपदं न प्रयुञ्जीते)ति भा-ष्यात्समस्तप्रयोगविलयाऽऽपत्तिरित्यलम् ॥

ननु पूर्वं भूत इति विग्रहे 'सुपा' इत्यनेन समासे समासत्वात्प्रातिपदिकसंज्ञायाम् 'सुपो धातुप्रातिपदिकयोरि'त्यनेन प्रातिपदिकाऽवयवस्य सुपो लुकि पूर्वभूत इत्यत्रोभयोः पूर्वभूतशब्दयोरुक्तसमाससंज्ञाविधायकशास्त्रघटकप्रथमान्यपदबोध्यत्वादुपसर्जनसंज्ञाप्राप्तौ द्वयोस्तस्यां सत्यां पर्यायेण पूर्वप्रयोगापत्त्या निर्देशोपपत्तौ निर्देशादित्यादिमूलोक्तस्याऽसङ्ग-त्यापत्तिरिति चेन्न । उपसर्जनेतिमहासंज्ञाकरणसामर्थ्याच्छास्त्रीयोपसर्जनत्वसमानाऽधिकर

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

णलौकिकोपसर्जनत्ववत एव पूर्वनिपात इति कल्पनेन प्रकृते भवनक्रियाविशेषणत्वेन पूर्वशब्दस्यैवोपसर्जनसंज्ञया पूर्वप्रयोगप्राप्तौ निर्देशोऽपपत्त्या तदर्थम्मूलो तस्याऽऽवश्यकत्वेन तत्संगतेरित्याह—भूतपूर्वे चरडिति निर्देशाद्भूतशब्दस्यैव पूर्वनिपात इति—

ननु निपातेनाऽधिनाऽधिकरणरूपार्थस्योक्तत्वेन (उक्तार्थानामप्रयोगः) इति न्यायेन तदर्थकसप्तम्या अभावेन समासाऽभावादधिहरीति प्रयोगो न स्यादित्याह—निपातेनाऽभिहितेऽप्यधिकरणे वचनसामर्थ्यात्सप्तमीति । उक्तरीत्या सप्तम्या अभावेन समासाऽप्राप्त्या विभक्त्यर्थे समाससंज्ञाविधायकवचनस्यासंगतिरिति तदनुरोधादुक्तेऽप्यधिकरणरूपार्थे सप्तम्या समास इति भावः । न च तिङ्कृत्तद्धितेतिपरिगणनादधिनोक्तत्वेऽपि सप्तमी स्यादेव वचनसामर्थ्यात्सप्तम्याः कल्पनं न युक्तमिति वाच्यम् । तस्य भाष्ये प्रत्याख्यातत्वात् । नचाऽन्यसुबन्तेनाऽपि समासेऽधिहरीति प्रयोगसिद्धिस्स्यादेव वचनसामर्थ्यादिति प्रयासो न विशेषफलजनक इति वाच्यम् । प्रत्यासत्त्या यद्विभक्त्यर्थवाचकाऽव्ययेन सुबन्तस्य समासस्तद्विभक्त्यर्थवाचकसुबन्तस्यैव ग्रहणेनाऽन्यविभक्त्यर्थवाचकसुबन्तेन समासस्याऽनिष्टत्वादिति दिक् ॥

ननु समया ग्राममित्यादौ आराद्वनादित्यादौ च समासो दुर्वार इति पूर्वपक्षं समाधत्ते—आराद्वनादित्यत्र तु नाऽव्ययीभाव इति ।. यद्युक्तस्थलेषु समासः स्यात्तदा (अभितः) इति वार्त्तिकेन 'अन्यारादि'ति सूत्रेण च द्वितीयापञ्चम्योर्विधानस्य सर्वथा वैयर्थ्यं स्यादिति ताभ्यां तयोर्विधानसामर्थ्येन तदभावकल्पनमिति भावः । न च मध्यार्थकसमयाशब्दयोगे दूरार्थकाऽऽराच्छब्दयोगे च द्वितीयापञ्चम्योश्चारितार्थ्येन सामर्थ्यात्समासाऽभावकल्पनमयुक्तमिति वाच्यम् । 'दूरान्तिकार्थैरि' त्यनेन षष्ठीपञ्चम्योः प्राप्तौ षष्ठ्यपवादतया पञ्चम्या विधानेनाऽन्तिकार्थकाऽऽराच्छब्दयोगे षष्ठ्यपवादत्वेन पञ्चमीविधानस्य निरवकाशतया तत्सामर्थ्यादव्ययीभावाऽभावकल्पनस्य युक्तत्वात् । द्वितीयाविधानसामर्थ्यादव्ययीभावाऽभावकल्पनं तु न युक्तमुक्तस्थले द्वितीयाविधानस्य चरितार्थत्वात् ॥

दुर्यवनमिति—ननु अर्थाऽभावाऽर्थकस्याऽपि दुरः सत्त्वादर्थाऽभावेन वात्र समाससिद्धौ व्यृद्ध्यर्थे समासविधानं विफलमिति चेन्न । येन समस्यते तदीयाऽर्थाभावे समासाऽभ्युपगमेन प्रकृते यवनऋद्धेरेवाभावसत्त्वेन यवनानामभावाऽभावात् तत्र समासाऽसिद्ध्यर्थं व्यृद्ध्यर्थे समासविधानस्य साफल्यात् ॥

निर्मक्षिकमिति—मक्षिकाणामभाव इति विग्रहः । संसर्गाऽभावेऽयं समासो नत्वन्योन्याभावेऽपि । नचाऽत्र किं विनिगमकमिति वाच्यम् । अर्थग्रहणसामर्थ्यात्समस्यमानपदजन्यप्रतीतिविशेषविरुद्धाऽभावस्यैव ग्रहणेनाऽन्योन्याभावस्य तु प्रतियोगिताऽऽवच्छेदकेनैव विरोधेन तस्य च प्रकारत्वेऽपि विशेष्यत्वाऽभावेनाऽस्यैव तत्र गमकत्वात् ॥

अतिहिममिति—हिमस्याऽत्यय इति विग्रहः । अत्ययाऽर्थेऽव्ययीभावः । परञ्चास्य सूत्रे ग्रहणं विफलमर्थाभावेनैव गतार्थत्वात् । अभावश्चात्र संसर्गाऽभाव एव, नत्वन्योऽन्याऽभावः । अन्यथा घटः पटो नेत्यत्रऽतिप्रसङ्गः स्यात् ॥

शब्दप्रादुर्भाव—इत्यस्य शब्दविषयप्रकाशार्थेनाऽव्ययेन समास इत्यर्थः । अस्योदाहरणम्—इतिहरीति । अत्र हरिशब्दस्य स्वस्वरूपपरत्वं, तादृशषष्ठ्यन्तहरिशब्देन शब्दप्रकाशार्थकस्येतिशब्दस्य समासः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनुविष्णु—विष्णोः पश्चादिति विग्रहः । अत्र अचः परस्मिन्निति सूत्रस्थात् (ततः पश्चात्स्त्रंस्यते ध्वंस्यते चे)ति भाष्यप्रयोगात् । अनेकमन्यपदार्थे इति सूत्रस्थ-(सर्वपश्चादि) ति भाष्यप्रयोगाच्च न पश्चाच्छब्दस्य समासः; किन्तु तदर्थकाऽनुशब्द-स्यैव एतद्भाष्यप्रयोगादेतत्सूत्रे तत्तदर्थबोधकपदघटकतया गृहीताऽव्ययेन तत्तदर्थेन नायं समासः । अत एव 'यथाऽसादृश्ये' इतिसूत्रस्थभाष्ये सादृश्यसम्पत्तीति प्राप्नोतीत्युक्तम् । यथाशब्देन तूत्तरसूत्रारम्भसामर्थ्यात्समासो भवत्येवेत्यलम् । नचास्य समासे का क्षति-रिति वाच्यम् । तथासति तस्य पूर्वनिपातापत्तेः ।

ननु अविग्रहो नित्यसमासोऽस्वपदविग्रहो वेति नित्यसमासलक्षणसत्त्वे वाक्यं दुर्लभ-मित्यत आह—**प्रतिशब्दस्य वीप्सायामित्यादि** । इति प्राञ्चः । वस्तुतस्तु-प्रति-स्थानमित्यादौ पत्वाऽभावसम्पादनेन चरितार्थत्वात्सामर्थ्यविरहेण तत्सामर्थ्याद्वाक्यस्या-ऽसाधुत्वमिति, (अर्थमर्थम्प्रतिप्रत्यर्थमि)ति सरूपसूत्रस्थभाष्यप्रयोगाद्यदा द्विर्वचनं तदा प्रतिशब्दस्य वृत्तित्वाऽभावेन समासेन वीप्साया उक्तत्वान्न द्विर्वचनमित्यलम् ॥

ननु समृद्धिसम्पत्त्योः पर्यायत्वादन्यतरग्रहणं न कार्यमित्याशङ्क्य समाधत्ते—**ऋद्धे-राधिक्यं समृद्धिरिति** ।

यथाऽसादृश्ये—असादृश्य इतिछेदः, असादृश्येऽर्थे विद्यमानो यथाशब्दः समर्थेन सुबन्तेन सह समस्यते इति तदर्थः । यथा हरिस्तथा हर इत्यत्र न समासः, यथाशब्दस्य सादृश्यार्थकत्वेनासादृश्येऽविद्यमानत्वात् । तत्र हरेरुपमानत्वस्य यथाशब्दो द्योतकः । ननु यथाहरिरित्यत्र यथाशब्दस्याऽसादृश्यार्थकत्वाऽभावेन समासाऽभावः समुचित एव, तथा-हरिरित्यत्र तथाशब्दस्य सादृश्यार्थकत्वात्पूर्वसूत्रेण समासो दुर्वार इति चेन्न । सदृश इत्युक्त्या नियमतः प्रतियोग्याकांक्षादर्शनात्सादृश्यप्रतियोगिवाचकसमर्थसुबन्तेनैव तद्बो-धकाऽव्ययस्य समास इति कल्पनेनोक्तापत्तेस्तत्राऽयोगात् । यथाशब्दः समर्थसुबन्तेन सह समस्यते सादृश्ये द्योत्ये नेति, 'यथाऽसादृश्ये' इत्यस्याऽर्थः । यथाशक्ति, यथाबलमित्या-द्यस्योदाहरणम् । अत एव असादृश्ये इतिकिमर्थं यथा देवदत्तस्तथा यज्ञदत्त इत्युक्तं; न तु सूत्रमेव किमर्थमित्युक्तम् । ननु यथार्थत्वेनैव सिद्धौ सूत्रमिदम्व्यर्थमिति चेन्न । सूत्रगृहीताऽव्ययेन तेनाऽसमासेन सूत्रस्याऽवश्यकत्वात् । सूत्रगृहीताऽव्ययेन तेनऽसमा-सेन सूत्रस्याऽपि ज्ञापकत्वात् । न च प्रकारवचने विहितेन थाल्प्रत्ययेन निष्पन्नस्य यथा शब्दस्य सर्वथा सादृश्यद्योतकत्वात्सूत्रोदाहरणाऽसम्भवेन सूत्रं व्यर्थमिति वाच्यम् । अ-व्युत्पन्नस्य वीप्सायोग्यतापदार्थानतिवृत्तिबोधकस्यैव यथाशब्दस्याऽत्र सूत्रे ग्रहणेनोक्त-युक्त्योपपन्नस्य तस्याऽग्रहणादुदाहरणसम्भवेन सूत्रस्याऽवश्यकत्वात् । उदाहरणे यथा-शक्ति, यथाबलमित्यादावुक्तार्थक एव यथा शब्द इति तत्र समासार्थं सूत्रमावश्यकमेवेति वोध्यम् । न च यथाशब्दस्य व्यञ्जनयोपमानत्वप्रतिपादकत्वमिति निखिलाऽभियुक्तो-क्त्या यद्विशेषवान् हरिस्तद्विशेषवान् हर इत्युक्तबोधाऽनन्तरं व्यञ्जनयोपस्थापितार्थस्य शाब्दबोधविषयत्वं भवत्येवेति, उपमानदेवदत्ताऽभिन्न उपमेयो यज्ञदत्त इति बोधः, साधा-रणधर्मस्तु गृहीतविशेषधर्म एव ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१)साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मम कृते ।
सद्भावस्नेहकरणीयसदृशं तावद्विरचितन्त्वया ॥

इति लक्षणामूलव्यञ्जनास्थल इव लक्ष्यार्थव्यङ्ग्यार्थयोरुभयोः शब्दजन्यबोधविषयत्वं सुवचम् । उपमानोपमेययोरभेदान्वयस्य सत्त्वादेव तयोः समानविभक्तिकत्वम् । एवञ्च पूर्वपदार्थत्वेनाऽप्रसक्त्या सूत्रेऽसादृश्य इति व्यर्थमिति वाच्यम् । सूत्रे प्रकारार्थकस्यैव यथाशब्दस्य ग्रहणेन तत्सामर्थ्याद्‌द्विमुनि व्याकरणमित्यादौ पूर्वपदार्थाऽप्राधान्येऽपि समासवत्तत्राऽपि समासस्य निर्बाधेनाऽसादृश्ये इत्यस्याऽऽवश्यकत्वात् । कृतेऽसादृश्यग्रहणे तु प्रकारवचनभिन्नस्याऽव्युत्पन्नस्यैव यथाशब्दस्याऽत्र सूत्रे ग्रहणेनोदाहरणसिद्धौ न कोऽपि बाधक इति । नचोदाहरणभूतयथाशक्ति, यथाबलमित्यादौ प्रकारार्थकथाल्न्तस्यैव यथाशब्दस्य ग्रहणमस्तु, तादृशस्य यथाशब्दस्य सादृश्येऽपि वृत्तेर्दर्शनात्सादृश्यसम्पत्तीत्यनेनैव समासः स्यात् पूर्वसूत्रे (अव्ययं विभक्ती)त्यादौ यथाग्रहणमस्तु सूत्रमिदञ्च मास्त्विति वाच्यम् । 'यथाऽसादृश्ये' इत्येतत्सूत्रारम्भसामर्थ्यात्सादृश्ये पदार्थानतिवृत्तिबोधकस्य यथाशब्दस्याऽप्रयोगेण सादृश्यसम्पत्तीत्यनेन समासाऽप्राप्त्या तदर्थमस्य सूत्रस्याऽऽवश्यकत्वात् । अव्युत्पन्नप्रकारार्थकयथाशब्दसत्त्वे इदमेव सूत्रं मानं बोध्यमित्यलम् ॥

विभाषा—अधिकारसूत्रमिदम् । ननु एकार्थीभावे समासस्य व्यपेक्षायां वाक्यस्य च सिद्धौ सूत्रमिदं व्यर्थम् । नचैकार्थीभाव एव समासविकल्पार्थमिदमावश्यकमिति वाच्यम् । नह्येकार्थीभावे संज्ञाया अभाव इत्यर्थकस्य (न च संज्ञाया भावाऽभावाविष्येते) इति भाष्यस्य विरोधदुर्वारतया एकार्थीभाव एव वैकल्पिकसमासस्याऽनिष्टत्वात् । एवमेकार्थीभावाभावेन समासाऽप्राप्त्या समासनिषेधसूत्राणि (नित्यंक्रीडाजीविकयोरि)त्यत्र नित्यग्रहणञ्च नावश्यकानीति चेन्न । लक्षणैकचक्षुष्कान् प्रति क्वैकार्थीभावो नित्यः क्व पाक्षिकः क्व नाऽस्तीत्यर्थबोधनार्थं विभाषेति सूत्रस्याऽऽवश्यकत्वात् ॥

एतत्सामर्थ्यात्प्राचीनानां नित्यसमासत्वमिति—अयम्भावः-प्रागेव विभाषाधिकारस्य कर्त्तुमुचितत्वादत्रैतत्करणसामर्थ्यादितः पूर्वेषां नित्यत्वमेवेत्यवगम्यते । नचैवं (सुप्सुपे) त्यस्याऽपीतः पूर्वत्वान्नित्यत्वाऽपत्तिरिति वाच्यम् । तथा सत्यनेनैव सिद्धेऽव्ययं विभक्तित्यादिना समासविधानस्य वैयर्थ्यापत्तेः । नचाऽव्ययमित्यादिना समासाविधानेऽव्ययस्य समासशास्त्रप्रथमानिर्दिष्टस्योपसर्जनसंज्ञाविधायकेन (प्रथमानिर्दिष्टमि)ति शास्त्रेणाऽव्ययस्य नियमेनोपसर्जनसंज्ञाविधानाऽनुपपत्त्याऽधिहरीत्यादावध्यादेरपि परप्रयोगाऽऽपत्तिरिति वाच्यम् । समासव्याप्यसंज्ञाविधायके प्रथमानिर्दिष्टमुपसर्जनमिति प्रथमानिर्दिष्टमित्यस्यार्थकरणेनाऽध्यादेः परप्रयोगाऽऽपत्त्यभावादव्ययमित्यस्य वैयर्थ्येन तत्सामर्थ्यात्सुप्सुपेत्यस्य न नित्यत्वमिति दिक् ॥

इत्यव्ययीभावसमासप्रकरणम् ।

---

(१) अत्र नायकसमीपे प्रेषिता या दूती सा तन्नायकोपभोगेन निवृत्तेच्छा भूत्वा पुनर्नायीकासमीपे आगत्य स नाऽऽयातीत्युक्त्वा विरता तत उपभोगचिन्हेन तं वृत्तान्तं ज्ञात्वा तां दूतीम्प्रति नायिकाया उक्तिरियम् । मम प्राणप्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ तत्पुरुषसमासप्रकरणम् ।

ननु (तत्पुरुष) इत्यधिकारसूत्राऽनन्तरं (संख्यापूर्वो द्विगुश्चे)तिसूत्रकरणाच्चकारबलेन द्विगुतत्पुरुषयोःसमावेशः स्यात्। न च चकारस्योक्तसंज्ञाद्वयपर्य्यायार्थत्वेन समुच्चयार्थत्वाऽभावात् कथमुभयोः समावेशः स्यादिति वाच्यम्। (संख्यापूर्वो द्विगुरि)ति योगं विभज्य पूर्वेण (तद्धितार्थोत्तरपदसमाहारे चे)त्यत्रोक्तस्य संख्यापूर्वस्य तत्पुरुषसंज्ञाविधानसामर्थ्यादेव पर्य्यायत्वसिद्धौ चकारस्य संज्ञाद्वयसमावेशार्थत्वाक्षतेः। एवञ्च द्विगुश्चेति सूत्रमनावश्यकमेवेत्याह—**इदं सूत्रं त्यक्तुं शक्यमिति** । द्विगुश्चेति सूत्रमित्यर्थः ।

ननु द्विगोस्तत्पुरुषत्वे किम्फलमित्यत आह—**समासान्तः प्रयोजनं पञ्चराजमिति** । पञ्चानां राज्ञां समाहार इति विग्रहे (राजाहः सखिभ्यष्टच्) इति टच् । न च (अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः) इत्यनेन टजन्तोत्तरपदस्य द्विगोः पञ्चराजस्य स्त्रीत्वबोधनेन टित्वान्ङीप् दुर्वार इति वाच्यम् । टचः समासस्यैवाऽन्ताऽवयवत्वं न तूत्तरपदस्येति उत्तरपदस्याऽकारान्तत्वाऽभावादुक्तवार्त्तिकेन स्त्रीत्वाऽवोधनेन ङीपोऽप्राप्तेः । न च समासार्थे यदुत्तरपदं तदन्तस्यैव समासान्तत्वमित्यर्थके समासार्थोत्तरपदान्ताः समासान्ता इति पक्षे द्विगोरकारान्तोत्तरपदत्वेन स्त्रीत्वादुक्तदोषस्तदवस्थ एवेति वाच्यम् । अत्र पक्षे पात्रादित्वान्नेत्यनेनैव दोषोद्धारादित्यलम् । पञ्चराजीति काशिकायामुदाहृतं तन्न युक्तमिति हरदत्तः । केचित्तु पात्रादित्वान्ङीवभावकल्पने विनिगमकाऽभावात्काशिकोक्तोदाहणं युक्तमेवेत्याहुरिति दिक् ॥

द्वितीया श्रितातीतपतितेति—द्वितीयायाः प्रत्ययत्वेन प्रत्ययग्रहणपरिभाषया तदन्तविधिः । श्रितादीनां सुबन्तत्वाऽसम्भवेन स्वप्रकृतिके लक्षणा । तथा च द्वितीयान्तं श्रितादिप्रकृतिकैरित्यर्थः सम्पन्नः । न च सम्बोधने श्रितादीनां सुबन्तत्वासम्भवेन तेषां स्वप्रकृतिके लक्षणा नाऽऽवश्यिकेति वाच्यम् । (येन विधिरि)ति सूत्रस्थभाष्यप्रामाण्येन सम्बुद्धिस्त्रीलिङ्गप्रथमान्तभिन्नेऽपि समासस्येष्टत्वेन श्रितादीनां लक्षणाया आवश्यकत्वात् । श्रितादीनां समर्थविशेषणत्वात्प्राप्तस्य तदन्तविधेः (समासप्रत्ययविधौ प्रतिषेधः) इत्यनेन निषेधात्कष्टं परमश्रित इत्यादौ न समासापत्तिः । तदन्तविधौ तु श्रिताद्यन्तसमर्थप्रकृतिकैरित्यर्थे तत्रोक्तापत्तिर्दुर्वारैवेति दिक् ॥

स्वयं क्तेन—ननु अत्र सूत्रे आत्मनेत्यर्थकस्य स्वयमित्यव्ययस्य कर्तृत्वनिष्ठविशेष्यतानिरूपितबोधजनकत्वेन कर्मत्वविशेष्यकबोधजनकत्वाऽभावान्न द्वितीयायाः सम्बन्धः; किन्तु तृतीयाया एवेत्याह—**द्वितीया तु नेह सम्बध्यते; अयोग्यत्वादिति**—असम्भवादिति तदर्थः । क्तस्य प्रत्ययत्वात्प्रत्ययग्रहणपरिभाषया तदन्तविधौ स्वयमित्यव्ययं क्तान्तप्रकृतिकसमर्थसुबन्तेन सह समस्यते इति सूत्रस्यार्थः । स्वायंकृतिरित्युदाहरणम् । समासे स्वयंकृतशब्दादिञि आद्यचो वृद्धौ रूपं सिद्ध्यतीति समासस्योक्तप्रयोगोपपत्तिरैकेश्वर्यमपि फलबोध्यम् । तदभावे तु कृत इत्यस्यैव पष्ठ्यन्तत्वेन तत एवोक्तप्रत्यये ऋकारस्य वृद्धौ रपरत्वे स्वयंकार्तिरित्यापत्तिरिति दिक् ॥

खट्वा क्षेपे—द्वितीया श्रितेत्यतो द्वितीयायाः स्वयं क्तेनेत्यतः क्तेनेत्यस्य चानुवृत्तिः, तयोश्च प्रत्ययत्वात्प्रत्ययग्रहणपरिभाषया तदन्तविधिः । क्षेपो निन्दा । खट्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शब्दस्य स्वप्रकृतिके लक्षणा, तथा च-खट्वाप्रकृतिकं द्वितीयान्तं क्तान्तप्रकृतिकसमर्थ-सुबन्तेन सह समस्यते सति निन्दाया गम्यमानत्वे इति सूत्रार्थः । खट्वारूढ इत्युदाहरणम् । खट्वामारूढ इति विग्रहः । स जाल्म इत्युच्यते । असमीक्ष्यकारीति तदर्थः ।

जाल्मोऽसमीक्ष्यकारी स्यात्कुण्ठो मन्दः क्रियासु यः ।

इत्यमरोक्तेः—समाप्तवेदव्रतेन पुरुषेण खलु खट्वाऽऽरोढव्या ब्रह्मचारिणैव भूमौ शयितव्यम् । अनेनैव खट्वाऽऽरूह्यते चेदयमेव जाल्म इत्युच्यते । अस्य शब्दस्य रूढत्वादकृतेऽपि खट्वाऽऽरोहणे निन्दितानुष्ठानपरस्य सर्वस्याऽपि खट्वारूढत्वं बोध्यम् । अत एवाह—नित्यसमासोऽयमिति—वाक्येन निन्दाऽप्रतितेरिति भावः ॥

तृतीयान्तं तत्कृतार्थेन गुणवचनेन—सौत्रत्वात्तत्कृतेति लुप्ततृतीयान्तम् । तृतीयान्तपरामर्शितच्छब्देन तृतीयान्तार्थो लक्ष्यते । गुणवचनस्य शब्दत्वात् तृतीयान्ताऽर्थकृतेत्यस्याऽर्थद्वारा गुणवचनविशेषणत्वं तृतीयान्तार्थकृतो यो गुणस्तद्वचनेनेति, एतत्फलितार्थमाह—तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनेत्यादि—ननु गुणवचनेनेत्यत्र वचनग्रहणं व्यर्थं गुणशब्दस्य धर्ममात्रपरत्वेन तेन समासाऽसम्भवेन तद्वाचिन एव ग्रहणादिति चेन्न । गुणमुक्तवानिति व्युत्पत्या गुणवाचित्वविशिष्टद्रव्यवाचिन एव ग्रहणार्थं वचनग्रहणस्य सार्थक्यात् । तेन घृतेन पाटवमित्यादौ न समासः । तत्र गुणशब्दस्य धर्ममात्रपरत्वादेव खण्डशब्दस्य क्रियावचनत्वेऽपि न कोऽपि दोषः । अस्य सूत्रस्य कृतशब्दार्थद्वारकसामर्थ्ये एव प्रवृत्तिर्न तु साक्षात्परम्पराऽन्वये । अन्यथोक्तसूत्रेण निपुणश्लक्ष्णशब्दाभ्यां समासविधानं व्यर्थं स्यात् । न च सदृशशब्दस्याऽप्युक्तार्थे ज्ञापकत्वसम्भवात्कथमुभयोरेवोपादानमिति वाच्यम् । सदृशशब्दस्याऽनावश्यकत्वस्य प्रतिपादयिष्यमाणत्वात् । गुणवचनेनेत्यत्र गुणशब्दस्य तत्कृतेत्येतत्सापेक्षत्वेऽपि सौत्रत्वात्समासो बोध्यः । सूत्रे तत्कृतेत्यस्याऽनुपादानेऽक्ष्णा काण इत्यत्राऽपि समासापत्तिः, तदुपादाने तु अक्ष्णा काणत्वस्याऽकरणात्किन्तु कर्मादिनैव तत्करणात्काणशब्दस्य तृतीयान्तार्थकृतगुणवचनत्वाऽभावाऽन्नोक्ताऽऽपत्तिः । गुणवचनेनेत्यस्याऽभावे गोसम्बन्धिदध्यादिभोजने देवदत्तादेर्वपावत्त्वात्तृतीयान्तार्थकृतत्वेन गोभिर्वपावानित्यादौ समासाऽऽपत्तिः । तत्सत्त्वे तु देवदत्तादेर्गुणवचनत्वाऽभावान्नोक्तापत्तिरिति दिक् ॥

पूर्वसदृशसमोनार्थकलह—ननु (तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्यामि)त्यनेन स शशब्दयोगे षष्ठ्या अपि विधानात्सदृशशब्देन षष्ठीसमाससिद्धावत्र सूत्रे सदृशग्रहणं व्यर्थम् । नचोक्तसूत्रविहितषष्ठ्याः प्रतिपदविधानषष्ठीत्वात् (प्रतिपदविधाना षष्ठी न समस्यते) इति निषेधवचनस्य जागरूकत्वादुक्तसमासाऽप्राप्त्या समासार्थन्तत्र सदृशग्रहणमावश्यकमिति वाच्यम् । उक्तसूत्रषष्ठ्या न प्रतिपदविधानत्वमित्यस्य प्रतिपादयिष्यमाणत्वात् । न च (तत्पुरुषे तुल्यार्थतृतीया)इत्यनेन पूर्वपदप्रकृतिस्वरसिद्ध्यर्थं सदृशग्रहणमस्त्विति वाच्यम् । (सदृशप्रतिरूपयोः सादृश्ये) इत्यनेनैवोक्तस्वरसिद्धेः । तत्र हि दास्याः सदृश इत्यादौ षष्ठ्या अलुकि पूर्वपदप्रकृतिस्वरार्थं सदृशग्रहणमावश्यकम् । न च मनसा सदृश इत्यत्र समासार्थमस्तु सदृशग्रहणमिति वाच्यम् । तस्य संज्ञात्वाऽभावेन तदर्थमपि तस्याऽनावश्यकत्वात् । एवञ्च प्रयोजनाऽभावाद्व्यर्थमेव सदृशग्रहणमिति चेन्न । भोजनेन सादृश्यवानित्यर्थे भोजनसदृश इत्यत्र समासार्थन्तस्याऽऽवश्यकत्वात् । न चा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऽत्रापि हेतोः शेषत्वविवक्षया षष्ठीत्यनेनैव समाससिद्धावेतदर्थमपि तदनावश्यकमेवेति वाच्यम् । उक्तरीत्या समासोपपत्तावुक्तस्वरसिद्ध्यापत्तेः । न च सदृशप्रतिरूपयोः सादृश्ये इत्यनेनैव स्वरसिद्धिरिति वाच्यम् । तत्र सादृश्यग्रहणेन तस्योपमानबोधकपूर्वपदके एव प्रवृत्तेः ।

वस्तुतस्तु—भोजनेन कृतः सदृश इत्यर्थे (तृतीया तत्कृतार्थेनेति) (तत्पुरुषे तुल्यार्थे)ति सूत्राभ्यां समासस्वरसिद्ध्युपपादने तु व्यर्थमेव सदृशग्रहणमिति ध्वनितं प्रकृतसूत्रस्थकैयटे इत्यलमतिविस्तरेण ॥

मिश्रग्रहणे सोपसर्गस्याऽपि ग्रहणमिति—पणबन्धेनैकार्थ्यं सन्धिस्तस्मिन् गम्यमाने सति अनुपसर्गतृतीयान्तात्परं इत्युत्तरपदमन्तोदात्तमित्यर्थके 'मिश्रं चाऽनुपसर्गमसन्धावि' ति सूत्रे (समासप्रत्ययविधौ प्रतिषेधः) इत्यनेन तदन्तविधिप्रतिषेधात्सोपसर्गेण समासाऽप्राप्त्याऽनुपसर्गेणैव समाससिद्धौ व्यावर्त्याऽभावाद्व्यर्थमनुपसर्गग्रहणमुक्तमर्थं ज्ञापयतीति भावः ॥

ननु (कर्तृकरणे कृते)त्यस्य कर्तृकरणयोरर्थयोर्विहिततृतीयान्तस्य बहुलं समास इत्यर्थे प्रत्ययग्रहणपरिभाषया निर्विशिष्टभिन्नस्य कृदन्तत्वाऽभावेन नखनिर्भिन्न इत्यत्र समासो न स्यादत आह—**कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति**—यत्र गतिकारकसमभिव्याहृतं कृदन्तं तत्र गतिकारकसमभिव्याहृतस्यैव कृदन्तस्य ग्रहणमपिशब्दात्तदसमभिव्याहृते कृदन्ते केवलस्याऽपि तस्य ग्रहणमिति तदर्थः । तथा च-अवतरणदलोक्तोदाहरणे नीरूपगतिविशिष्टस्य भिन्नस्य कृदन्तत्वात्समाससिद्धिति सर्वमनवद्यमिति भावः ॥

बहुलग्रहणं सर्वोपाधिव्यभिचारार्थमिति—बहूनर्थान् लातीति बहुलमिति बहुलपदस्यार्थात् कर्तृकरणयोर्विहितस्यापि क्वचिन्न समासः क्वचिद्विभक्त्यन्तरस्याऽपि समासः । दात्रेण लूनवान्, दात्रेण छिन्नवान्, हस्तेन कुर्वन्नित्यादीन्याद्यस्योदाहरणानि । पादहारकः, गलेचोपक इत्यादि द्वितीयस्य । ह्रियते इति हारकः, बाहुलकात्कर्मणि ण्वुल् पादाभ्यां हारकः पादहारकः । पादाभ्यामित्यपादानपञ्चम्यन्तस्य समासः । चोपयतीति चोपकः, हेतुमण्ण्यन्ताच्चुप मन्दायां गतावित्यस्मात्कर्मणि ण्वुल् । गले चोपको गलेचोपकः, (अमूर्धमस्तकादि)ति सप्तम्या अलुक् ॥

ननु सूत्रे सुपेत्यधिकारात्तिङन्तेन समासाऽनतिप्रसक्त्या कर्तृत्वकरणत्वयोः क्रियानिरूपित्वेन कर्त्राद्याक्षिप्तक्रियाबोधककृदन्तेनैव समासलाभेन व्यावर्त्याऽभावात्कृद्ग्रहणं व्यर्थमित्याशयेनाऽऽशङ्कते-**कृतेति किमिति** ।

समाधत्ते—काष्ठैः पचतितरामिति—कर्तृत्वकरणत्वयोः क्रियानिरूपितत्वात्तद्वाचकसुबन्तस्य तद्धितान्तघटितस्याऽपि सम्भवात्तेनाऽपि समासे प्रत्युदाहरणभूतोक्तप्रयोगे समासाऽऽपत्तिर्दुर्वारैवेति तद्वारणाय कृद्ग्रहणमावश्यकमिति भावः । कृदन्तेनैव समासो यथास्यान्न सुबन्तेनेत्यर्थं कृद्ग्रहणं प्रत्युदाहरणे शानजन्तादिभिरिव बहुलग्रहणात्समासवारणं शक्यमिति केचिदित्यलम् ॥

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः—अत्र तदर्थपदं तस्मै इदं तदर्थमित्यर्थकं तच्छब्देन सन्निकृष्टत्वाच्चतुर्थ्या परामर्शः । तस्याश्च प्रत्ययत्वात्प्रत्ययग्रहणपरिभाषया तद-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न्तविधौ चतुर्थ्यन्तमिति सामर्थ्यात्तेन तदर्थो लक्ष्यते तस्मात्तादर्थ्ये चतुर्थीत्यभिप्रेत्याह—**चतुर्थ्यन्तार्थाय यत्तद्वाचिनेत्यादि**—चतुर्थ्यन्तवाच्ययूपार्थं यद्दार्वादि तद्वाचकशब्देन चतुर्थ्यन्तस्य वा समास इत्यर्थः । यूपाय दार्वित्यादीन्युदाहरणानि ।

ननु सूत्रे तदर्थपदेन प्रकृतिविकृतिभावातिरिक्तग्रहणे तेनैव बलिरक्षितशब्दाभ्यामपि समाससिद्धौ याभ्यां समासार्थं कृतमुक्तशब्दद्वयग्रहणं व्यर्थं सञ्ज्ञापयति तदर्थपदेन प्रकृतिविकृतिभावस्यैव ग्रहणमित्याशयेनाह—**तदर्थेन प्रकृतिविकृतिभाव एव गृह्यते, बलिरक्षितग्रहणाज्ज्ञापकादिति**—न च हितसुखशब्दयोरपि ज्ञापकत्वसम्भवेन शब्दचतुष्टयस्यैव ज्ञापकत्वप्रतिपादनस्य युक्तत्वाद्द्वयोरेव तत्त्वप्रदर्शनमयुक्तमिति वाच्यम् । हितसुखशब्दयोगे । (चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैरि)त्यनेनाऽतादर्थ्येऽपि चतुर्थीसम्भवात् उक्तशब्दद्वयेनाऽन्योपकाराऽजननेन तद्योगे तादर्थ्यचतुर्थ्या असम्भवाच्चोक्तशब्दद्वयस्य ज्ञापकत्वाऽसम्भवात् । न च समासत आशिषोऽप्रतीत्या (चतुर्थी चाशिषी)ति विहितचतुर्थ्यन्तस्य समासाऽस्वीकाराद्बलिरक्षितग्रहणवद्धितसुखशब्दयोरपि ज्ञापकत्वं सम्भवतीति वाच्यम् । ब्राह्मणहितं, गोहितं गोसुखमित्यादिलक्ष्यदर्शनादतादर्थ्यचतुर्थ्यन्तस्यापि समासाङ्गीकारात्तदर्थन्तयोरावश्यकत्वात्सामर्थ्यविरहेण ज्ञापकत्वाऽसम्भवादित्यलम् ॥

ननु बलिरक्षितग्रहणज्ञापकज्ञापितस्य प्रकृतिविकृतिभावस्य तदर्थपदेन ग्रहणमितिनियमस्य रन्धनाय स्थालीत्यत्र समासवारणमेव फलं तत्र षष्ठीसमासस्य दुर्वारत्वान्नियमो व्यर्थ एव । न च सति षष्ठीसमासे समासस्वरः, तादर्थ्यचतुर्थ्या तु नियमेन समासवारणात्पूर्वपदप्रकृतिस्वर इति स्वरे विशेष इति वाच्यम् (चतुर्थी तदर्थे) इत्येतद्विहितपूर्वपदप्रकृतिस्वरस्यापि प्रकृतिविकृतिभाव एवेष्टत्वादुक्तस्वराऽप्राप्त्या स्वरेऽविशेषादुक्तसमासस्याऽनिवार्यत्वेन नियमवैयर्थ्यस्य तादवस्थ्यादिति चेन्न । रन्धनाय स्थालीत्यत्र शब्दशक्तिस्वभावात्तदर्थत्वेनैव भानेन सम्बन्धत्वेनाऽभानात् षष्ठ्यभावेन तत्समासाऽप्राप्त्या सत्यां तादर्थ्यचतुर्थ्यां प्राप्तं तत् समासनिवृत्त्यर्थमुक्तनियमस्याऽऽवश्यकत्वेन सार्थक्यात् । एतत्सर्वं प्रकृतसूत्रस्थभाष्ये स्पष्टम् ।तत्र हि–(चतुर्थी तदर्थमात्रेण चेत्सर्वप्रसङ्गोऽविशेषात् । सर्वस्य चतुर्थ्यन्तस्य तदर्थमात्रेण सह प्रसङ्गो भवति । अनेनाऽपि प्राप्नोति, रन्धनाय स्थाली, अवहननायोलूखलमि)ति । अत्राऽनेनाऽपि प्राप्नोतीत्युक्त्वा कथमप्येषु समासो न भवतीत्युक्तम् । उक्तञ्च कैयटेन नाऽनभिधानाद्रन्धनस्थाल्यादयः षष्ठीसमासा भवन्तीति । नचोक्तयुक्त्या चतुर्थीषष्ठीसमासवारणेऽपि रन्धनार्था स्थाली रन्धनस्थालीति मध्यमपदलोपिसमासो बाधकाऽभावात्स्यादेवेति वाच्यम् । अनभिधानादुक्तसमासस्याऽप्यप्राप्तेरिति दिक् ॥

अश्वघासादयस्तु षष्ठीसमासा इति—तदर्थपदेन प्रकृतिविकृतिभावग्रहणात्समासाप्राप्त्याऽत्रापि घासादीनामुपकारकत्वेन तादर्थ्यचतुर्थ्यां सत्यां न समासः; किन्तु वाक्यमेव । सम्बन्धत्वेन भाने तु षष्ठीसमासो भवत्येवेति भावः ॥

अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यमिति—अनेन वार्त्तिकेन कार्यद्वयं विधीयते । एवमर्थशब्देन चतुर्थ्यन्तस्य नित्यसमासत्वं द्वितीयं विशेष्यगतलिङ्गत्वञ्च एतदसत्वे विभाषाऽधिकारेण समासस्य पाक्षिकत्वात्समासाऽभावपक्षे वाक्यस्याऽपी-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ष्टापत्तौ द्विजायार्थ इति प्रयोगः स्यात् । 'अर्थैरैविभवा अपी'त्यमरोक्त्याऽर्थशब्दस्य नित्य-पुंस्त्वात् (परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरि)त्यनेन सर्वत्र पुँल्लिङ्गस्यैव प्रयोगात् द्विजार्था यवागूः द्विजार्थं पय इत्यादयः प्रयोगा न स्युः !

वस्तुतस्तु—अनेन विशेष्यलिङ्गतैव विधेया, समासनित्यत्वरूपद्वितीयविधेयस्य तु चतुर्थ्यां तादर्थ्यस्योक्तत्वादर्थशब्देन विग्रहाऽप्रसक्त्या न्यायसिद्धत्वात् । गुरोरिदं गुर्वर्थमित्यादाविव लिङ्गस्यापि लोकतः सिद्धत्वे तु स्पष्टार्थमेवैतद्वार्त्तिकमित्यवसेयमिति दिक् ॥

पञ्चमी भयेन । पञ्चम्यन्तं भयशब्दप्रकृतिकसमर्थसुबन्तेन समस्यते इत्यर्थः । अत्र सूत्रे विनिगमकाऽभावात्सूत्रेणैव वृकभीत इत्यादौ समाससिद्धौ (भयभीतभीतिभीभिरिति वाच्यम्) इत्येतद्वार्त्तिकाऽऽरम्भाच्च न भयेत्यर्थग्रहणं किन्तु स्वरूपस्यैव । तेन न वृकात्त्रास इत्यादौ समासाऽऽपत्तिरूपो दोषः । वार्त्तिके उपलक्षणत्वान्निर्गतजुगुप्सयोरपि ग्रहणं बोध्यम् । न च सूत्रे भयेत्यर्थग्रहणे स्वरूपस्य ग्रहणाद् भोगोपरत इत्यादौ समासो न स्यादिति वाच्यम् । बहुलग्रहणात्क्वचिद्विभक्त्यन्तरस्याऽपि कृता समास इत्यस्य पूर्वमेवाभिहितत्वेन तत्र समासोपपत्तेः । सुप्सुपेति मयूरव्यंसकादित्वाद्वा तदुपपत्तेश्च ॥

प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यम् । पदं पदं प्रति विहिता प्रतिपदविधाना कारकविशेषोपादानेन विहितेत्यर्थः । 'षष्ठी शेषे' इत्येतद्विहितषष्ठ्यतिरिक्ता सर्वाऽपि षष्ठी प्रतिपदविधानेत्युच्यते सा न समस्यत इति तदर्थः । ननु (न निर्धारणे) इत्यनेन निर्धारणविहितषष्ठ्याः समासो निषिध्यते, वार्त्तिकेनापि प्रतिपदविधानषष्ठ्याः समासनिषेधः क्रियते । एवञ्च शेषषष्ठ्यतिरिक्तायाः सर्वस्या अपि षष्ठ्याः प्रतिपदविधानत्वाद्वार्त्तिकेनैवोक्तसूत्रप्रयोजनस्य गतार्थत्वात्सूत्रं व्यर्थमिति चेन्न । (यतश्च निर्धारणमि)त्यनेन षष्ठ्या अविधानेन सप्तम्या एव विधानादनया तस्या बाधाऽभावाय, तत्प्रतिप्रसवात्तत्र सम्बन्धसामान्य एव षष्ठ्या विधानात्तस्याश्चाऽप्रतिपदविधित्वाद्वार्त्तिकेनाऽगतार्थतया सूत्रस्य सार्थक्यात् । यत्तु (ज्ञोऽविदर्थस्य करणे) इत्यादि (कृत्वोऽर्थप्रयोगे कालेऽधिकरणे) इत्येतेषु सूत्रेषु शेषपदसम्बन्धात्तैः शेष एव षष्ठीविधानात्तत्र च (शेषे षष्ठी)-त्येव सिद्धावुक्तसूत्रसमुदायसामर्थ्यात्तत्तत्सूत्रविहितषष्ठ्याः समासाभावकल्पनेन वार्त्तिकस्य सिद्धत्वान्नापूर्वत्वमिति; तन्न । उक्तसूत्राणां तत्तद्धातुयोगे उपात्तकारकाणां शेषत्वाऽभावज्ञापनद्वारा वार्त्तिकज्ञापकत्वे विनिगमकत्वाऽभावात् । वार्त्तिकस्यापूर्वत्वादेव नेदं भाष्ये प्रत्याख्यातम्, अत एव च प्रतिपदविधानेतिपूर्वपक्षोद्घाटने,शेषलक्षणाऽतिरिक्ता सर्वा प्रतिपदविधाना, 'कर्तृकर्मणोः कृती' ति कृद्योगेति च तत्रोक्तम् । तत्र शेषलक्षणेत्यस्य शेषमात्रलक्षणेत्यर्थ इति दिक् ॥

ननु ब्राह्मणस्य ये दन्तास्ते शुक्ला इत्यर्थाद्ब्राह्मणशब्दस्य दन्तैरेवाऽन्वयात्तेनैव सामर्थ्येन शुक्लशब्देनाऽसामर्थ्यात् (सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो ने)ति निषेधाच्च ब्राह्मणस्य शुक्ला इत्यत्र समासो न स्यादत आह—यदा प्रकरणादिना दन्ता इति विशेष्यं ज्ञातं तदेदमुदाहरणमिति । अधुना शुक्लशब्दस्यैव विशेष्यसमर्पकत्वमिति न समासप्राप्तिरिति भावः ॥

अनित्योऽयं गुणेन निषेध इति । गुणवाचकशब्देन षष्ठ्यन्तस्य समासनिषेधो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऽसार्वत्रिकेत्यर्थः । पूरणार्थेन च षष्ठ्यन्तस्य समासनिषेधोऽपि तथेत्यपि बोध्यम् । अत्र प्रमाणं ('तदशिष्यं संज्ञाप्रमाणत्वात्') इत्यादिनिर्देश एव, तथाहि, गुणेन पूरणार्थेन च समासनिषेधस्य नित्यत्वे तस्य अशिष्यमित्यत्र समासनिषेधेन निर्देशाऽसङ्गतिरिति स एव व्यर्थीभूतो ज्ञापयति, अनित्योऽयमित्यादि । पूरणार्थेन समासनिषेधस्य नित्यत्वे 'लोपेन चेत्पादपूरणमि'ति निर्देशः प्रमाणम् । तथाहि, पूरणार्थेन समासनिषेधस्य नित्यत्वे पादस्य पूरणमिति समासाऽनापत्त्या निर्देशासङ्गतिरिति स एवोक्तार्थं ज्ञापयतीति भावः । तेन कुम्भपूरणभव उञ्छपष्ठ इत्यादौ समाससिद्धिः ।

शेखरकृतस्तु—पूरणार्थेन समासनिषेधाऽनित्यत्वस्य नोक्तोदाहरणे समाससिद्धिः फलम् । कुम्भसम्बन्धी पूरणं उञ्छसवन्धी पष्ठ इति मध्यमपदलोपिसमासस्य सिद्धत्वात् । अत एव गुणेन समासनिषेधाऽनित्यत्वम्भाष्ये नोक्तम् । (१) अन्यत्राऽस्याऽनभिधानम् । (२)अत एव, सर्वश्वेत इत्यादौ गुणेन न समास इति सन्दिह्य (गुणात्तरेणतरलोपश्चेति) वचनमारब्धं सर्वगुणेति सूत्रे भाष्ये (३) । संख्याशब्दानां (४) भावशब्दत्वाद्योजनशतादौ क्रोशशतादौ गोविंशतिरित्यादौ च नायं निषेध इति । तथा च पंक्तिविंशतीति सूत्रभाष्यम् (ते एते विंशत्यादयः शब्दाः समुदाये सन्तो भाववचना भवन्ती)ति (विंशत्यादिषु भाववचनेष्वि)ति च, यस्तु तत्र (५)एषां गुणवचनत्वव्यवहारोऽपि स तु(६)तत्सादृश्यात् । (७) अन्यथा गावो धनमित्युपक्रमस्य धनमेको गुणः, अपत्यमेको गुणः इत्यपि भाष्योक्तेश्चैत्रधनं चैत्राऽपत्यादीनीत्यादि न स्यादित्याहुः ॥

पूर्वोक्तसाहचर्येण कृदव्ययस्यैव ग्रहणमिति—पूर्वपरयोः सत्तव्ययोः कृतोः सान्निध्यादव्ययपदेन कृदव्ययस्य ग्रहणादेव (सर्वपश्चादि) तिभाष्यप्रयोग उपपन्नः । अन्यथा कृदकृत्साधारणस्याऽव्ययस्याव्ययपदेन ग्रहणेन पश्चाच्छब्दस्याव्ययत्वेन तद्योगे समासनिषेधापत्तावुक्तभाष्यप्रयोगो नोपपद्येत । प्रकृतसूत्रस्थभाष्येऽपि अकृदव्ययैरुच्चैरादिशब्दैः सामर्थ्याभावान्नसमास इत्यभिधाय कृदव्ययमेवोदाहृतम् । एतेन सति सामर्थ्येऽन्याव्ययैः समासस्येष्टत्वमवगम्यते ।

नागेशास्तु—द्विजस्य कुर्वन्कृत्वेत्यादौ सूत्रेण कारकषष्ठ्या समासनिषेधात् कटाद्यपेक्षया शेषषष्ठ्यां तु असामर्थ्यात्समासप्राप्तिरेव नेति सन्दिह्य द्विजस्य द्विषन् पुरा सू-

---

(१) नन्वेवं काककार्ष्ण्यमित्याद्यपि स्यादत आह—अन्यत्रेति । भाष्यादावनुक्तत्वान्नान्यत्रोक्तसमास इति भावः ।

(२) अस्य निषेधस्याऽनित्यत्वाऽभावादेवेत्यर्थः ।

(३) अस्य निषेधस्याऽनित्यत्वाऽभावाद्गोविंशतिरित्यादिसिद्धिर्न स्यादत आह—संख्याशब्दानामिति ।

(४) भावप्रवृत्तिनिमित्तकत्वादित्यर्थः । यथा 'तस्यभाव' इत्यत्र भावशब्दस्य धर्मपरत्वं तथैवाऽत्रापि तस्य तत्वमिति भावः ।

(५) विंशत्यादीनामित्यर्थः । (६) गुणसादृश्यादित्यर्थः ।

(७) गुणबोधकत्वस्यैव स्वीकार इत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्येस्योदेतोरित्यादौ (द्विषः शतुर्वा वचनन्तोसुनूकसुनोरप्रतिषेध) इति कारकषष्ठीसत्त्वात्तश्चोदाहृतम्भाष्ये तस्मादीदृशे विषये शेषत्वविवक्षणस्य तादर्थ्यस्य सम्बन्धत्वविवक्षणस्य चाऽभाव एव पाणिनितात्पर्यनिर्णयायैव भाष्यकृत्प्रवृत्तेरिति वदन्ति ॥

समानाधिकरणे समासनिषेधोदाहरणं—**तक्षकस्य सर्पस्येति**—अत्र परत्वात्प्राप्तसमानाधिकरणसमासं बाधित्वा प्राप्तस्य षष्ठीसमासस्य निषेधः । नच षष्ठ्यन्तयोः समासेऽर्थाऽभेदात्प्रधानस्याऽपूर्वनिपात इत्येतन्निरूपणप्रस्तावे येन सुबन्तेन समासस्तन्निरूपितसम्बन्धार्थकस्यैव षष्ठ्यन्तस्य ग्रहणमित्युक्त्या प्रकृते तादृशषष्ठ्यभावात्समासाऽप्राप्त्या निषेधो विफल एवेति वाच्यम् । भाष्यप्रामाण्याद्यत्र व्यधिकरणषष्ठ्यन्तयोः समासस्तत्र तादृश्या षष्ठ्या ग्रहणेन समानाधिकरणषष्ठ्यन्तयोः समासे उक्तनियमाऽभावात्समासप्राप्त्या निषेधस्य साफल्यात् । अत्र प्रकृतसूत्रस्थसमानाधिकरणग्रहणमेव मानमिति सूत्रकृत्तात्पर्यम् । नचाऽत्रासामर्थ्यादेव समासाऽप्राप्त्या निषेधो व्यर्थं एवेति वाच्यम् । कटोऽपि कर्म भीष्मादयोऽपीति पक्षे परस्पराऽन्वय एवेति सामर्थ्यस्य सत्वान्निषेधस्य सार्थक्यात् । क्रियान्वयनियमश्च न साक्षादेव; किन्तु यद्द्वारा कारकत्वं तद्द्वारकोऽपीत्युक्तम् । नच समानाधिकरणाऽधिकारे समानमध्यमवीराश्चेति पाठात् तस्य समानाधिकरणाधिकारस्थले समासविषयत्वाऽभावेऽप्यन्यत्राप्रवृत्तौ प्रमाणाऽभावेन समानाधिकरणमसमर्थवदित्यसामर्थ्यात्समासाऽप्राप्त्या निषेधो व्यर्थ इति वाच्यम् । अधात्वभिहितमित्युक्त्या धातूत्तरप्रत्ययेन कर्माभिधाने यजुषः पीयमानस्येत्याद्यर्थं निषेधस्य सार्थक्यात् । इदं भाष्ये स्पष्टम् । ननु तक्षकस्य सर्पस्येत्यत्र विशेषणतावच्छेदकतक्षकत्वस्य सर्पत्वात्मकविशेष्यतावच्छेदकाऽव्यभिचारान्न विशेषणसमासप्राप्तिरिति चेन्न । कैलासाद्रिरित्यादौ समासानापत्त्या 'विशेषणं विशेष्येण बहुलमि'त्यत्र विशेषणविशेष्योभयोपादानेन विशेषणत्वविशेष्यत्वाऽवच्छेदकधर्मद्वयस्य परस्परव्यभिचारे एव विशेषणसमासप्राप्तिरिति नियमाभावेन तत्रोक्तसमासस्य दुर्वारत्वात् । एवं च षष्ठीसमासनिषेधेऽप्युक्तसमासः स्यादेवेतिनिषेधो विफल एवेत्याशङ्क्य समाधत्ते—**विशेषणसमासस्त्विह बहुलग्रहणान्नेति** । उक्तस्थले विशेषणसमासेऽपि फले विशेषाभावादिति भावः । समानाधिकरणे समासनिषेधस्य फलान्तरमप्याह—**गोर्धेनोरित्यादि**—विभक्त्यन्तरे चरितार्थस्य पोटायुवतीत्यादेः परत्वाद्बाधकस्य षष्ठीसमासस्याप्यनेन बाध इति भावः । अन्यथा तत्र हि षष्ठीसमासे सति गुणप्रवृत्तिनिमित्तकत्वादप्रधानत्वेन प्रथमानिर्दिष्टत्वेन च धेनोः पूर्वनिपातः विशेषणसमासे तु गोरिति भेदः । तत्रादिपदेन भोज्यस्योष्णस्येत्यादेः संग्रहो बोध्यः । ये तु नोपसर्गसंज्ञाया अन्वर्थत्वमङ्गीकुर्वन्ति तेषां मते षष्ठीसमासे पूर्वनिपातनियम इति तद्वारणाय निषेधः, विशेषणसमासस्तु स्यादेवेति कैयट इति प्राञ्चः ।

नागेशस्तु, (प्रथमानिर्दिष्टमि) तिसूत्रस्थभाष्योक्तरीत्या (षष्ठी) इति सूत्रे येन सुबन्तेन समासस्तदर्थनिरूपितसम्बन्धार्थकषष्ठ्या ग्रहणात्प्रकृते समासाऽप्राप्त्या निषेधस्याऽनावश्यकत्वेन समानाधिकरणग्रहणं व्यर्थमेव, ध्वनितञ्चेदम्भाष्ये । तथाहि भाष्यं समानाधिकरणे किमुदाहरणम् , एकदेश्याह, राज्ञः पाटलिपुत्रकस्य, प्रष्टाऽह नैतदस्ति, असामर्थ्यादत्र न भविष्यति । येन सुबन्तेन समासस्तदर्थनिरूपितषष्ठ्यन्तेनाऽसामर्थ्यरूपः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'उदाहरणवाक्यैकदेश्याह—कथमसामर्थ्यं प्रष्टैकदेश्याह, समानाधिकरणमसमर्थवदिति । उदाहरणवाक्यैकदेश्याह, अधात्वभिहितमिति तच्छेषात्सर्पिषः पीयमानस्येत्युदाहरणमित्युपसर्जनसंज्ञासूत्रस्थभाष्यैकवाक्यत्वेनाऽस्यैवं व्याख्यानमेव युक्तमिति वदन्ति ।

राजपूजितमित्यादौ भूते क्तान्तेनेति—न च (तक्रकौडिन्य)न्यायेन वर्त्तमानार्थक्तेन भूतार्थक्तस्य बाधान्मूलोक्तमयुक्तमिति वाच्यम् । भूतार्थक्तस्याऽवश्यं प्राप्तौ वर्त्तमानार्थक्तस्याऽनारम्भात् । भूतत्ववर्त्तमानत्वयोर्युगपद्विवक्षाया असम्भवात् । दधिदानस्याऽवश्यं प्राप्तौ तक्रदानारम्भाद्युक्त एव तक्रदानेन दधिदानबाधः; प्रकृते तथा नास्तीति भावः ।

केचित्तु—उक्तन्यायेन वर्त्तमानार्थक्तेन भूतार्थक्तस्य बाधप्राप्तावन्यथा समाधत्ते—तथा हि—यद्युक्तन्यायेनोक्तार्थकप्रत्ययेनोक्तार्थकप्रत्ययस्य बाधः स्यात्तदा 'तेनैक् दिक्' इत्यनेन षष्ठीविधानादुपज्ञातशब्दस्य तेनेति तृतीयया योगो न स्यादित्युक्तनिर्देशाद्वर्त्तमानक्तेन न भूतक्तस्य बाध इति ज्ञायते । नचैवमप्युक्तनिर्देशस्य ज्ञानार्थेष्वेव ज्ञापकत्वमस्त्विति वाच्यम् ।

"पूजितो यः सुरासुरैः ।"

इति प्रयोगाऽनुरोधेन सामान्यविषयकज्ञापकत्वस्यैवौचित्यात्, केचिच्च कारकषष्ठ्या एव समासनिषेधकमिदं सूत्रं शेषषष्ठ्या स्यादेव समास इत्याहुरित्यन्यत् ॥

ननु भृञस्तृचि निष्पन्नस्य भर्तृशब्दस्य तृजन्तत्वेन 'तृजकाभ्यां कर्तरी'ति निषेधेन षष्ठीसमासाभावे भर्तृशब्दस्य याजकादिगणे पाठेन समासस्येष्टत्वाद्वज्रस्य भर्त्तेत्युदाहरणमयुक्तमित्यत आह—**पत्यर्थभर्तृशब्दस्य तु याजकादित्वात्समास इति** । प्रसिद्धत्वेन पत्यर्थभर्तृशब्दस्यैव याजकादिगणे पाठादन्यार्थकस्य तस्याऽग्रहणाद्वज्रस्य भर्त्तेत्यत्र भर्तृशब्दस्य धारणकर्त्रर्थकत्वेन नोक्तसूत्रेण समासाऽऽपत्तिरिति युक्तमेवोदाहरणम् । नच याजकादिषु भर्तृशब्दस्याऽर्थविशेषविशिष्टत्वेनाऽपाठात्सामान्यतस्तस्य तत्र पाठेनोदाहरणेऽप्यनेन समासस्याऽवश्यम्भावितयाऽयुक्तमेवोदाहरणप्रदर्शनमिति वाच्यम् । रूढेर्बलीयस्त्वात्पतिपर्यायस्यैव भर्तृशब्दस्य ग्रहणेनोदाहरणप्रदर्शनस्य युक्तत्वात् । तृजकाभ्यामित्यत्र तृच्साहचर्य्येण कर्त्रर्थकस्यैवाकस्य ग्रहणेन कर्तृग्रहणमनावश्यकमिति नाशङ्क्यम्, तथा सति उत्तरसूत्रे भावार्थकस्यैवाकः सम्भवादर्थाधिकाराऽनुरोधेन प्रकृतसूत्रेऽपि भावार्थकस्यैव ग्रहणमिति शङ्कानिरासाय कर्तृग्रहणस्यावश्यकत्वादिति भावः ॥

ननु (तृजकाभ्यामि)तिनिषेधस्य जागरूकत्वात् त्रिभुवनविधातुरितिसमस्तप्रयोगो नैवोपपद्येतेत्याशयेनाऽऽशङ्कते—**कथं तर्हि घटानां निर्मातुरित्यादि** । समाधत्ते—**शेषषष्ठ्या समास इति** । प्रत्यासत्त्या कारकषष्ठ्या एवाऽनेन समासनिषेध इति भावः ।

न्यासकारास्तु—विधातृशब्दस्य तृजन्तत्वादनेनानिषेधात्षष्ठीति सूत्रेण समासादुक्तप्रयोगोपपत्तिः । न च तृन्योगे (नलोकाव्ययनिष्ठाखलर्थतृनामि)ति सूत्रेण षष्ठीनिषेधात्तत्समासाऽप्राप्त्या पुनस्तदवस्थ एवोक्तदोष इति वाच्यम् । त्रकाभ्यामित्येव वक्तव्ये तृचः सानुबन्धस्य ग्रहणसामर्थ्यादुक्तनिषेधानित्यत्वज्ञापनेनोक्तदोषोद्धारादिति वदन्ति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत्तु (जनिकर्तुः) (तत्प्रयोजको हेतुश्चे)तिनिर्देशाभ्यां (तृजकाभ्यां कर्तरी)तिसमास-निषेधाऽनित्यत्वादुक्तप्रयोगोपपत्तिरित्याहुः केचित्, तन्न । शेषषष्ठीसमासेनैवोक्तनिर्देश-द्वयोपपत्तौ सामर्थ्यविरहादुक्तसमासनिषेधाऽनित्यत्वज्ञापनस्याऽसम्भवादिति दिक् ॥

पूर्वापराधरोत्तरमेकेति—नन्वेकदेशशब्दस्याऽवयवे रूढत्वात्तस्य कर्मधारयत्वे-ऽपि तस्मात्मत्वर्थीयः । (न कर्मधारयान्मत्वर्थीयः) इति निषेधात्कथं कर्मधारयान्मत्व-र्थीय इति वाच्यम् । कृष्णसर्पवानित्यत्रैवोक्तनिषेधस्य रूढेष्वेव प्रवृत्तेः । न च (एकगोपू-र्वादि)त्यनेन ठञ दुर्वार इति वाच्यम् । एतन्निर्देशादेवेनः प्रवृत्तेरित्याह—**अवयविना सहेत्यादि** ।

ननु ऊर्ध्वकाय इतिवत् (समुदाये हि प्रवृत्ताः शब्दा अवयवे प्रवर्तन्ते) इति न्यायात् पूर्वकाय इत्यादिप्रयोगाणां कर्मधारयसमासेनैव सिद्धौ सूत्रमिदं व्यर्थमित्यत आह—**षष्ठी-समासापवाद इति** । अयम्भावः—सूत्रसत्त्वे तेन समासे पूर्वशब्दस्य पूर्वप्रयोगे पूर्व-काय इत्युपपद्यते । सूत्राऽभावे षष्ठीसमासे तु षष्ठ्यन्तस्य कायशब्दस्य पूर्वप्रयोगे काय-पूर्व इत्यनिष्टप्रयोग आपद्येतेति तन्निवृत्त्यर्थं सूत्रमावश्यकमिति भावः । उक्तप्रयोगे पूर्वका-यस्येति विग्रहः । नच (अन्याराद्)ति सूत्रे दिशि दृष्टः शब्दो दिक्शब्द इति व्याख्या-नेन सम्प्रति दिग्वृत्त्यभाववतामपि योगे पञ्चमीविधानात्षष्ठ्या दुर्लभतयोक्तविग्रहो दुर्लभ इति वाच्यम् । (तस्य परमाम्रेडितमि)तिनिर्देशेनाऽवयवाचिदिक्शब्दयोगे पञ्चम्यभा-वज्ञापनात्षष्ठ्युत्पत्तौ बाधकाऽभावेनोक्तविग्रहस्य सुलभत्वात् । सूत्रे एकदेशिनेत्यस्याऽभावे पूर्वं नाभेः कायस्येत्यत्राऽपि समासापत्तिरिति तद्व्यावृत्त्यर्थं तदुपात्तम् । नाभेर्यः पूर्वो भागः स कायस्याऽवयव इत्यर्थः । नाभेरित्यस्य दिग्योगलक्षणपञ्चम्यन्तत्वादत्र पूर्वस्य भागस्य नाभिरवधिः, नत्वेकदेशिनीति न नाभ्या सह समासः । कायशब्देन तु पूर्वकायो नाभेरिति समासः स्यादेवेत्यलम् ।

ननु पूर्वपरेति सूत्रे पूर्वादीनामुपादानादेतेषामेवैकदेशानां समासः स्यादन्येषां न स्या-त्तथा मध्यान्हः; सायाह्न इत्यादिप्रयोगो नैवोपपद्येतेत्याशङ्क्याह—**सर्वोऽप्येकदेशोऽ-न्हा समस्यत इति** । पूर्वादिभिन्नशब्दस्याप्यान्हन्शब्देन समास इति तदर्थः । अत्रा-ऽर्थे (संख्याविसायपूर्वस्ये) ति सूत्रमेव ज्ञापकं बोध्यम् । तथाहि-उक्तज्ञापनाऽभावेऽन्ह-स्य सायपूर्वत्वाऽभावेन सूत्राऽप्राप्त्या व्यर्थन्तदुक्तार्थं ज्ञापयतीति भावः । नच मध्यान्ह इत्यादेरूर्ध्वकाय इति वत्कर्मधारयेणैव निर्वाहाज्ज्ञापकत्वाश्रयणं व्यर्थमिति वाच्यम् । (अहःसर्वैकदेशे) त्यादिविहितसमासान्तस्य (अन्होऽन्ह एतेभ्य) इत्यन्हादेशस्य चैकदेशिसमासं विनाऽनुपपत्त्या ज्ञापकाश्रयणस्य सार्थक्यात् ॥

ननु उक्तज्ञापकादुक्तार्थज्ञापनेन मध्यान्ह इत्याद्युपपत्तावपि मध्यरात्र इति नोपपन्नमि-त्यत आह—**केचित्तु सर्व एकदेशः कालेन समस्यते नत्वह्नैवेति** । संख्यावि-सायेति ज्ञापकस्य सामान्यापेक्षत्वेन सर्वस्याप्येकदेशस्य कालवाचकशब्देन समास इत्यर्थ-ज्ञापनेनोभयत्र निर्वाह इति भावः । नचैवं दिनमध्यो रात्रिमध्य इति नोपपद्येतेति वा-च्यम् । ज्ञापकसिद्धस्याऽसार्वत्रिकत्वादिति भावः ॥

अर्द्धं नपुंसकम् । ननु ग्रामार्द्धो नगरार्द्ध इति भाष्यप्रयोगात्खण्डवाचकार्द्धशब्द-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्य नित्यक्लीबत्वाभावात्समांशवाचकोक्तशब्दस्य नित्यक्लीबत्वेन तस्यैवाऽत्र ग्रहणम्। प्रमाणञ्चात्र प्रकृतसूत्रस्थं नपुंसकग्रहणमेव। तथाहि—(पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे) इत्यत्रैवार्द्धशब्दस्य पाठात्समासोपपत्तौ पृथगर्द्धमिति योगविभागेन निर्देशान्नपुंसकत्वे लब्धे पुनर्नपुंसकग्रहणं फलाऽभावाद्व्यर्थं सत् ज्ञापयति-'नित्यक्लीबार्द्धशब्द एवेह गृह्यत' इत्याह—नित्यं क्लीबे स इति।

केचित्तु—नपुंसकग्रहणस्य नोक्तार्थं ज्ञापकत्वमङ्गीकुर्वन्ति; किन्तु अर्द्धमिति निर्देशादेव नपुंसकत्वलाभे पुनस्तद्ग्रहणस्य सूत्रनिर्देशे लिङ्गविवक्षार्थमेव। नच तस्य समांशवाचकनित्यक्लीबग्रहणार्थत्वेन सामर्थ्यविरहादुक्तार्थज्ञापकत्वं न सम्भवतीति वाच्यम्। एचो ह्रस्वविधाने अर्द्धैकारौकारयोर्विधानमाशङ्क्य (नैव लोके नैव वेदे अर्द्ध एकारोऽर्द्ध ओकारोऽस्ती)ति (एचोङ्) (एच, इगि) तिसूत्रस्थभाष्यप्रयोगात्समांशवाचिनोऽप्यर्द्धशब्दस्य नित्यक्लीबत्वाऽभावात्। तथा च नित्यनपुंसकोऽर्द्धशब्द एकत्वविशिष्टेनाऽवयविना समस्यते इत्यर्थः।

ननु पिप्पल्या नियमेन षष्ठ्यन्तत्वात् (एकविभक्ति चापूर्वनिपाते) इत्यनेनोपसर्जनत्वे (गोस्त्रियोरि)ति ह्रस्वत्वे अर्द्धपिप्पलि इति ह्रस्वान्तप्रयोगापत्तिरित्यत आह—एकविभक्तावषष्ठ्यन्तवचनमिति। एकविभक्तिपदघटितसूत्रे यदेकविभक्तिपदन्तदषष्ठ्यन्तबोधकमित्यर्थः। तेन पिप्पलीशब्दस्याऽनुपसर्जनत्वान्नोक्तापत्तिरिति बोध्यम्॥

ननु (एकविभक्तावषष्ठ्यन्तवचनमि)त्यभ्युपगमे पञ्चानां खट्वानां समाहार इति विग्रहे खट्वाशब्दस्य षष्ठ्यन्तत्वादुपसर्जनसंज्ञाप्रतिषेधेन ह्रस्वत्वाप्रवृत्तावदन्तत्वाऽभावेन (द्विगोरि)ति ङीपोऽप्रवृत्त्या पञ्चखट्वीति न स्यादित्याशङ्क्य समाधत्ते—एकदेशिसमासविषयकोऽयमुपसर्जनसंज्ञानिषेध इति। (अपथं नपुंसकमि)त्येतत्सूत्रे पञ्चखट्वीति भाष्यप्रयोगादेकविभक्तावित्यस्य सङ्कोचादेतल्लभ्यते इति भावः। अर्द्धं पिप्पल्या इति विग्रहे, अर्द्धपिप्पलीति। परवल्लिङ्गत्वात्स्त्रीत्वम्। अनेन द्रव्यैक्य एव समासो विधीयते तेनाऽर्द्धपिप्पलीनामित्यत्र न समासो; द्रव्यस्य बहुत्वात्। उक्तनियमाऽभावे तु समासे अर्द्धपिप्पलीत्येवेति दिक्॥

द्वितीयतृतीयचतुर्थतुर्याणि। ननु वृत्तिकारेण यदुक्तमस्य षष्ठीसमासापवादत्वन्तदयुक्तमिति ध्वनयन्नाह—अन्यतरस्यां ग्रहणसामर्थ्यात्पूरणगुण इति निषेधं बाधित्वेत्यादि। नच द्वितीयशब्दस्य भागार्थकाऽन्प्रत्ययान्तत्वात्पूरणार्थकप्रत्ययान्तभिन्नत्वेन निषेधाऽप्राप्त्या पूरणगुणेति निषेधं बाधित्वेति मूलोक्तमनुपपन्नमिति वाच्यम्। भागार्थकान्प्रत्ययान्तस्याऽपि स्वार्थिकत्वेन पूरणार्थकत्वान्मूलोपपत्तेः। स्पष्टञ्चेदम्भाष्ये। तत्र हि—अन्यतरस्यांग्रहणस्य पक्षे षष्ठीसमासमुक्त्वा कृतेऽप्यन्यतरस्यांग्रहणे षष्ठीसमासो न प्राप्नोति किंकारणम्। पूरणगुणेति निषेधात्। नैतत्पूरणान्तम्। अना एतत्पर्यवसन्नम्। व्यवहितं, स्वरभेदं प्राप्त इति यावत्। एतदपि पूरणान्तमेव। पूरणन्नामाऽर्थस्तमाह तीयशब्दः। अतः पूरणं योऽसौ पूरणान्तात्स्वार्थे भागेऽन् सोऽपि पूरणमेव। पूरणमन्नामाऽर्थ इत्यस्य पूरणाऽभिन्नो योऽर्थस्तस्य प्रतिपादनमतः स्वार्थिकत्वात्तदन्तेनाऽप्यस्त्येवेत्यर्थः। पूरणशब्दे पूरयति स्वघटितसमुदायविशेषे विवक्षितसंख्याप्रकारकप्रतीतिं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जनयतीति व्युत्पत्या बाहुलकात्कर्तरि ल्युट् ॥

उपमानानि सामान्यवचनैः—उपमीयते वस्त्वन्तरं सादृश्येन परिच्छिद्यते येन तदुपमानम् । उपमनोपमेयसाधारणधर्मविशिष्टोपमेयवचनं सामान्यवचनम् । तथाच-उपमानबोधकानि सुबन्तानि उपमानोपमेयोभयसाधारणधर्मविशिष्टरूपसामान्यवचनैः समर्थसुबन्तैः सह समस्यन्ते इति सूत्रस्यार्थः । घनश्याम इत्याद्युदाहरणम् । इति प्राञ्चः ।

शेखरकृतस्तु, स्वसमभिव्याहृतनिष्ठमुपमानत्वमिवशब्दद्योत्यम् । इवशब्दसमीपोच्चारितघनादिपदार्थगतं यदुपमानत्वं सादृश्येन वस्त्वन्तरपरिच्छेदकत्वं तदिवशब्देन द्योत्यते इति तदर्थः । साधारणधर्मसम्बन्धस्योपमानोपमेययोर्बोधे तात्पर्य्यग्राहकता च । एवञ्च उपमानोपमेययोरभेदान्वयादेव तयोः समानविभक्तिकत्वनियमः । समासे तूक्तार्थस्य समासशक्तिबलाद्बोधः । उपमानत्वेनोपमानबोधकेत्यर्थास्वीकारे ससम्बन्धिकत्वात्सामान्यवचनैरित्येव उपमानेन समासलाभे उपमानग्रहणं स्पष्टमेव व्यर्थम् । एवमुत्तरसूत्रे उपमितमित्युपमानत्वेन बोधकमित्यर्थकम् । एवमेव भाष्यस्वरस इत्याहुः । तत्र हि यत्र किञ्चित्समानञ्चिच्च विशेषस्तत्रोपमानोपमेये भवत इत्युक्त्वा, उपमानं, हि नाम, अनिर्ज्ञातज्ञानार्थमुपादीयते तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानमेव, भुक्त्वा शस्त्री श्यामेति सूत्रोदाहरणमित्युक्तम् । समानाधिकरणेनेति वर्तत इत्युक्तम् । तेन स्पष्टमेवोपमानोपमेययोरभेदान्वयो लभ्यत इति ॥

ननु घन इव श्याम इति विग्रहे घनश्यामशब्दयोरेकार्थवृत्तित्वरूपसमानाधिकरणत्वाऽभावात्समासो न स्यादत आह—**इह पूर्वपदन्तत्सदृशे लाक्षणिकमिति**—अत एव मृगीव चपला मृगचपलेत्यादौ पुंवद्भावः सिध्यति । तत्र सन्निधानादुत्तरपदोपस्थापितमृगत्वचपलत्वद्वारकस्यैव सादृश्यस्यैव ग्रहणमिति । न चैवं कथमुपमानपरत्वमितिवाच्यम् । भूतपूर्वगत्या शक्यार्थमादाय तत्परत्वोपपत्तेः ॥

ननु घनश्याम इत्याद्युदाहरणसिद्ध्यर्थमेव (उपमानानि सामान्यवचनैरि) ति सूत्रं तस्य विशेषणसमासेनैव सिद्धौ सूत्रं व्यर्थमेवेति चेन्न । सति विशेषणसमासे कुब्जखञ्जः खञ्जकुब्जः इति वद्घनश्यामशब्दयोः पर्य्यायतया पूर्वनिपानापत्तेः । तस्मात्पूर्वनिपाताय सूत्रमावश्यकमित्याह—**पूर्वनिपातनियमार्थं सूत्रमिति** । 'तुल्यार्थतृतीयासप्तम्युपमानाव्यय' इति सूत्रे प्रतिपदोक्तस्यैवास्य ग्रहणेन ग्रहणार्थमपि सूत्रस्याऽऽवश्यकत्वम् । अत एव, पुरुषव्याघ्र इत्युदाहरणम् । उपमानशूरव्याघ्राऽभिन्नः शूर इति बोधः (एवं मयूरव्यंसकादयश्चे) त्यनेन समासेनोपमानस्वरप्रवृत्तिरिति तत्त्वमिति ॥

उपमितं व्याघ्रादिभिः । उपमेयमुपमितम् । भूतकालो नाऽत्रविवक्ष्यते । उपमेयस्य सम्बन्धिशब्दत्वात्तेनोपमेयस्याऽऽक्षेपात्, उपमानभूतैर्व्याघ्रादिभिः सहोपमेयं समस्यते सति साधारणधर्मस्याऽप्रयोग इत्यर्थः । ननु उपमेयस्योपमानपरिच्छेद्यत्वादुपमानोपमेययोः समभिव्याहारे उपमानस्य विशेषणत्वमेवेति तस्य विशेषणं विशेष्येणेति सूत्रेणैव पूर्वनिपातसिद्धौ विशेष्यस्य पूर्वनिपातार्थमिदं सूत्रमित्याह—**विशेष्यस्य पूर्वनिपातार्थं सूत्रमिति** । उपमितमित्येतत्पदस्वारस्येनोपमितस्योपमानेन सह नित्यसाकांक्षत्वेन च व्याघ्रादीनामुपमानत्वे एव उपमानोपमेययोः समानलिंगत्वे सत्येव चेतत्सूत्रप्रवृत्तिः । अत

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एव (परवल्लिङ्गम् द्वन्द्वतत्पुरुषयोरि)ति सूत्रे (द्वन्द्वैकदेशिनोरि)तिन्यासं कृत्वा तत्पुरुषग्रहणं प्रत्याख्यातं भाष्ये। अन्यथा—

भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्ततः।
छात्राणामुपहास्यत्वं यास्यामि पिशुनात्मनाम्।

इति कैयटश्लोके भाष्याब्धिरित्यत्र दृश्यमानपरवल्लिङ्गसिद्ध्यर्थं तत्पुरुषग्रहणस्यावश्यकत्वात्प्रत्याख्यानासङ्गतिः। उक्तप्रयोगे सत्यपि सामान्यधर्मप्रयोगे लिङ्गभेदे च (मयूरव्यंसकादयश्चे)त्यनेन समासो बोध्यः। न च तत्र विशेषणसमास एवेति वाच्यम्। तथा सति उपमानस्य विशेषणत्वेन पूर्वनिपातापत्तेः।

ननु सूत्रे सामान्याऽप्रयोगे इत्यस्यासत्त्वे पुरुषो व्याघ्र इव शूर इत्यत्र सामान्यधर्मस्य शूरत्वस्य सति प्रयोगे समासापत्तिरतस्तदुपात्तम्। न च शूरसापेक्षत्वेनाऽसामर्थ्यात्समासाऽप्राप्त्या प्रत्युदाहरणासङ्गतिरिति वाच्यम्। प्रधानस्य पुरुषस्य सापेक्षत्वेऽपि सामर्थ्याऽभावाभावात्। विशेषणरूपोपमानस्य नित्यसापेक्षत्वेऽपि तत्सापेक्षत्वस्य न दोषावहत्वमिति बोध्यम्। उपमानत्वञ्च साधारणधर्मवत्त्वेन परिच्छेदकत्वम्। परिच्छेदकत्वञ्च साधारणधर्मवत्त्वेन ज्ञानविषयीभूतस्यैवेति। नच नित्यसापेक्षत्वस्य दोषाऽऽधायकत्वाऽभावाद्विशेषणस्योपमानस्य नित्यसापेक्षवदुपमेयस्यापि नित्यसापेक्षत्वेनैव समाससंज्ञासिद्धौ प्रत्युदाहणे समासार्थं उपमानं नित्यसापेक्षमिति तत्सापेक्षत्वं न दोष इत्यस्यैव ज्ञापकत्वमित्ययुक्तमिति वाच्यम्। यद्यपि उपमेयत्वस्य साधारणधर्मवत्त्वेन परिच्छेद्यत्वमेव; तथापि उपमेयस्य साधारणधर्मवत्त्वं विधेयमेवेत्युपमेयस्य नित्यसापेक्षत्वाभावादिति दिक्॥

विशेषणं विशेष्येण बहुलम्—ननु विशिष्यते येन तद्विशेषणम्, अन्यस्माद्व्यावर्त्तकमित्यर्थः। कर्त्तुः करणत्वविवक्षायां विपूर्वकाच्छिषेः ल्युटि रूपमित्याह—**भेदकं समानाधिकरणेनेति**—विशेषणविशेष्ययोरुभयोः सम्बन्धिविशिष्टत्वादन्यतरोपादानेनैवाऽऽक्षेपस्य सम्भवादुभयोपादानं स्पष्टार्थमिति कैयटः। यत्तु समस्तपदद्वयजन्यबोधप्रकारस्य विशेषणविशेष्यधर्मद्वयस्य यत्र परस्परव्यभिचारस्तत्रैव समासो नान्यत्रैतदर्थमुभयोपादानमिति; तन्न। कैलासाद्रिः भावपदार्थः, तर्कविद्येतिप्रयोगाणामसङ्गत्यापत्तेः।

युवाखलतिपलितवलिनजरतीभिः—ननु 'विशेषणं विशेष्येण बहुलमि' त्यनेनैव समाससिद्धौ प्रयोजनाऽभावाद्व्यर्थमेवैतत्सूत्रमित्यत आह—**पूर्वनिपातनियमार्थं सूत्रमिति**—पूर्वसूत्रेण समासे युवतिशब्दस्य पूर्वप्रयोगानियमोऽनेन समासे तूक्तशब्दस्यैव पूर्वप्रयोग इति तदर्थमेव सूत्रमिति भावः।

ननु सूत्रे पुंलिङ्गयुवन्शब्दस्यैवोपादानात्तस्य खलतीजरतीशब्दाभ्यां सामानाधिकरण्याभावेन समासाऽप्राप्त्या युवखलती युवजरतीत्यादि न स्यादित्याशंकां समाधत्ते—**लिंगविशिष्टपरिभाषया युवतिशब्दोऽपि समस्यते इति**—(प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषास्वरूपम्। प्रातिपदिकस्य ग्रहणे लिङ्गबोधकप्रत्ययविशिष्टस्य अपिशब्दात्केवलस्याऽपि ग्रहणम्बोध्यमिति तदर्थः। तथाचोक्तपरिभाषया सूत्रोपात्तयुवञ्छब्देन युवतिशब्दस्यापि ग्रहणात्तस्याश्च खलत्यादिसमानाधिकरणत्वादुक्तप्र-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

योगोपपत्तौ न किमपि बाधकमिति भावः ।

ननु सूत्रे समानाधिकरणाधिकारेण एकार्थबोधकत्वरूपसामानाधिकरण्याऽभावाद्युवजरतीति प्रयोगो न स्यादित्यत आह—युवत्यामेव जरतीधर्मोपलम्भेनेत्यादि—बोधकालीनेच्छाजन्यज्ञानस्यारोपरूपत्वाज्जरतीत्वस्य युवत्यामारोपाद्युवत्या अपि जरतिसामानाधिकरण्येन समासे उक्तप्रयोगोपपत्तिः । जरत्यां तु न युवतीत्वधर्मारोपः, तथा सति युवतीशब्दस्य विशेषणत्वेन विशेषणसमासेऽपि नियमतो युवतीशब्दस्य पूर्वनिपातसिद्धौ पूर्वनिपाताय कृतस्य सूत्रस्य वैयर्थ्यापत्तेरितिभावः ।

कुमारः श्रमणादिभिः—ननु सूत्रे कुमारशब्दस्य पाठात्तस्य श्रमणादिभिः सामानाधिकरण्याऽभावात्कुमारी श्रमणा कुमारश्रमणेति प्रयोगो न स्यादिति चेन्न । लिङ्गविशिष्टपरिभाषया कुमारशब्देन कुमारीशब्दस्य ग्रहणात्तस्य च श्रमणादिशब्देन समानाधिकरणत्वात्समासे उक्तप्रयोगोपपत्तेः । एतदेव कुमारग्रहणमुक्तपरिभाषाज्ञापकमिति बोध्यमित्यलम् ।

ननु निर्मक्षिकमित्यादावव्ययीभावस्य चारितार्थ्यादविघ्नमित्यत्र विघ्नानामभाव इति विग्रहे परत्वात्तत्पुरुषः स्यादित्याह—अर्थाऽभावेऽव्ययीभावेन सहायं विकल्पत इति—पूर्वपदार्थप्राधान्येऽव्ययीभावः, उत्तरपदार्थप्राधान्ये तत्पुरुष इत्यादिरीत्येति भावः । न्यायसिद्धे प्रमाणमप्याह—रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति । अद्रुतायामसंहितमिति—असन्देह इत्यस्य सन्देहाऽभावो [निश्चय] इत्यर्थः । प्रमाणभूतमुपन्यस्तं द्वितीयं वार्त्तिकं संहितासूत्रस्थमिति बोध्यम् । द्रुताभिन्नायां मध्याविलम्बितवृत्तौ संहिताऽभाव इत्यर्थः । अव्ययीभावे कृते, द्वन्द्वे परवल्लिङ्गेनोपपन्नस्य असन्देहा इति पुँल्लिङ्गप्रयोगस्याऽनुपपत्तिः । द्वितीये द्रुतायामिति स्त्रीलिङ्गप्रयोगाऽनुपपत्तिश्च । उक्तभाष्यवार्त्तिकप्रयोगेण नञ्तत्पुरुषसमासस्याव्ययीभावेन वैकल्पिकत्वज्ञापनादनुपलब्धिरविवाद इत्याद्युपपन्नमिति भावः । न चाऽविद्यमाना विघ्ना यस्मिन्निति बहुव्रीहिणा अविघ्नं कर्मेत्याद्युपपत्तावव्ययीभावस्योदाहरणमिदं किमर्थमिति वाच्यम् । उत्तरे कर्मण्यविघ्नमस्त्वित्यादेरव्ययीभावं विनाऽनुपपत्तेरिति प्राञ्चः ।

शेखरकृतस्तु—भाष्ये उत्तरपदस्य धर्मपरत्वान्नञ्तत्पुरुषोऽन्यपदार्थप्रधानः, न विद्यते ब्राह्मण्यं यस्मिन् सोऽब्राह्मणः इति, । नच बहुव्रीहेरन्यपदार्थप्रधानत्वस्य प्रसिद्धत्वान्नञ्तत्पुरुषस्याऽन्यपदार्थप्रधानत्वे बहुव्रीहेर्वैयर्थ्यमिति वाच्यम् । उत्तरपदस्य धर्मिपरत्वे बहुव्रीहेश्चारितार्थ्यात् । उत्तरपदस्य धर्मिपरत्वे बहुव्रीहिसमासाऽऽश्रयणादेव 'अनेकमन्यपदार्थे' इत्येतत्सूत्रस्थं (नञोऽस्त्यर्थानामुत्तरपदलोपश्चे)ति वार्त्तिकं सङ्गच्छते । न च बहुव्रीहेरन्यपदार्थप्रधानत्वेऽस्य इत्यादौ सर्वनामकार्यं न स्यादिति वाच्यम् । 'एतत्तदोःसुलोपोऽकोरनञ्समासे हलि' इत्येतज्ज्ञापकात्तत्र सर्वनामकार्योपपत्तेः । नोक्तार्थे सम्पूर्णसूत्रस्य ज्ञापकत्वम् ; किन्तु तदेकभूतस्याऽनञ्समास इत्यस्यैव तत्त्वमिति बोध्यम्, तथाहि यदि अस इत्यादौ सर्वनामकार्य्यं न स्यात्तदा 'हल्ङ्याब्भ्य' इत्यनेन सुलोपस्य दुर्वारत्वादनञ्समासग्रहणं व्यर्थमेव स्यादिति भावः । तत्र भाष्ये नञ्तत्पुरुषस्यान्यपदार्थप्रधानत्वपक्षे अवर्षा हेमन्त इत्यादौ विशेष्यतल्लिङ्गवचनापत्तिर्दोष उक्तः । नच 'लिङ्गमशिष्यं लोकाश्रयत्वा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दि' त्यनेन लिङ्गदोषपरिहारसम्भवात्तदापत्तिप्रदर्शनमयुक्तमिति वाच्यम् । उक्तयुक्त्या लिङ्गदोषे परिहृतेऽपि वचनदोषापत्तेस्तादवस्थ्यात् ।

नञ्तत्पुरुषस्याऽन्यपदार्थप्रधानत्वपक्षेऽवर्षा हेमन्त इत्यादौ वचनदोषस्य दुर्वारत्वात्तद्व्यावृत्त्यर्थन्नञ्तत्पुरुषस्य पूर्वपदार्थप्रधानत्वमेवास्तु । अत्रापि पक्षेऽस इत्यादौ पूर्ववत्सर्वनामकार्य्योपपत्तिः । न चाऽवर्षा हेमन्त इत्यत्र पूर्वपदस्य नञोऽव्ययत्वात्तदर्थप्रधानस्य नञ्तत्पुरुषस्य लिङ्गसंख्याभ्यां योगाऽभावात्तस्य पूर्वपदार्थप्रधानत्वाऽभ्युपगमेन कथन्तत्र्त्यदोषपरिहार इति वाच्यम् । शब्दशक्तिस्वभावाद्वाक्ये नञोऽसत्वभूतार्थाऽभिधायित्वेऽपि समासे सत्त्वभूतार्थाऽभिधायित्वेन लिङ्गसंख्यान्वयसम्भवात् । यद्वा गुणवाचकशब्दानामाश्रयगतलिङ्गादिवत्समासार्थप्रतियोगित्वेन यद्द्रव्यं श्रितस्तद्द्रव्यस्थलिङ्गादिसमासस्य भविष्यति ।

अभावरूपसमासार्थस्य प्रतियोगित्वेन वर्षारूपद्रव्याश्रयणादेतद्गतलिङ्गादिसमासस्य सुलभमेवेतिभावः । समासार्थेनाऽभावेन प्रतियोगिनोऽपि स्वज्ञानायाऽऽश्रयणादभावस्याऽपि प्रतियोग्याश्रयतया नोक्तदोषाऽवकाशः । नञ्घटितसमासघटकेन वर्षाशब्देनाऽभावस्योपस्थित्या वर्षाशब्दरूपाश्रयस्यैव ग्रहणमुचितम् । प्रतियोगिन आश्रयत्वाकल्पने अवर्षा हेमन्त इत्यादौ विशेष्यभूतहेमन्तगतलिङ्गवचनापत्तिदोषदूषितादन्यपदार्थप्रधानो नञ् तत्पुरुष इतिपक्षादङ्गीकृतेऽपि पूर्वपदार्थप्रधानत्वपक्षे विशेष्यगतलिङ्गवचनाऽऽपत्तिरूपदोषस्यातदवस्थत्वेन अस्तु तर्हि पूर्वपदार्थप्रधान इति भाष्याऽसङ्गतिः । पूर्वपदार्थप्रधानत्वपक्षस्य निर्दोषत्वादेतत्समकक्षया [अथवा पुनरस्तूत्तरपदार्थ प्रधान] इति भाष्यकृदुक्तेरसङ्गतिश्च । प्रतियोगिन आश्रयत्वाकल्पयितृरीत्या पूर्वपदार्थप्रधानत्वपक्षे दोषस्य स्थितत्वादस्तु तर्ह्युत्तरपदार्थप्रधान इति वक्तुमुचितम् । उक्तपक्षद्वयेऽपि 'अनेकमन्यपदार्थे' इति सूत्रेऽनेकमित्यत्र वक्ष्यमाणैकवचनासिद्धिं मनसि निधाय नञ्तत्पुरुषस्योत्तरपदार्थप्रधानत्वं सिद्धान्तितम्भाष्यकृता । उत्सर्गतस्तत्पुरुषस्योत्तरपदार्थप्रधानत्वम्भवति । अत्र नञ्तत्पुरुषस्य पूर्वपदार्थप्रधानत्वपक्षेऽस्याऽव्ययीभावाऽपवादत्वेनाऽव्ययीभावस्य बाधनात्, नञाव्ययीभावाऽभावोऽवश्यं स्वीकर्त्तव्यः । अन्यथा नञ्तत्पुरुषस्य पूर्वपदार्थप्रधानत्वपक्षेऽव्ययीभावापवादत्वं स्यात् । अतोऽत्यन्ताऽभावार्थकस्य नञः क्रियादिप्रतियोगिकाऽभावबोधकत्वादुत्तरपदार्थेनाऽनन्वयादसामर्थ्यादमक्षिकमित्यादौ नाऽव्ययीभावः । न संदेह इत्यादौ संदेहस्य गुणरूपत्वान्नञः सन्देहाऽभावबोधकत्वम्भवत्येव, इत्यभिप्रायेण 'प्रसज्यायं क्रियागुणौ ततः प्रतिषेधप्रतीति'रिति भाष्ये उक्तम् । असन्देह इत्यादौ चाऽऽरोपितः संदेह इति भेदेनाऽऽरोपज्ञानात्सन्देहाऽत्यन्ताऽभावप्रतीतिर्भवतीत्याद्याहुरितिदिक् ॥

तत्रोपपदं सप्तमीस्थम्—इदमधिकारसूत्रम् । अस्याऽधिकारत्वादेव, अमैव तुल्यविधानमित्यादि प्राचां व्यवहारोपपत्तिः । येन सूत्रेणाऽमो विधानं तेन यस्योपपदसंज्ञाविधानमिति तदर्थात् । ननु एकस्य सूत्रस्योभयविधायकत्वन्न सम्भवतीति चेन्न । 'कर्मण्यणि' त्यादौ कर्मणीत्यादेः सौत्र्याः प्रथमार्थे सप्तम्याः सत्त्वाद्धातोरण् भवति, कर्म चोपपदसंज्ञमितितदर्थादेकस्याऽप्युभयविधायकत्वदर्शनात् । अत्र सूत्रे सप्तमीपदस्य तद्न्तप-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वम्, तत्स्थं तद्वाच्यमित्याह—सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितमित्यादि। उपपदमितिमहासंज्ञया तत्रेत्यत्र प्रथमार्थे सप्तमीबलेन च लब्धार्थमाह—तद्वाचकं पदमिति—अत्र पदमित्यनेन विभक्त्यन्तस्य ग्रहणे स्तम्बेरमः, कर्णेजपः, इत्यत्र स्तम्बकर्णयोरुपपदत्वाऽनुपपत्तिस्तयोरविभक्त्यन्तत्वादिति वाच्यम्। 'स्तम्बकर्णयो रमिजपोरि'त्यत्र सुपीत्यधिकारेण स्तम्बकर्णयोस्तत्प्रकृतिकसुबन्ते लक्षणया तयोर्विभक्त्यन्तत्वेन तत्त्वोपपत्तेः। तत्र लक्षणाया अनङ्गीकारे उपपदमिति महासंज्ञया लब्धस्योपपदसंज्ञकसुबन्तस्यासत्वात् स्तम्बेरमः, कर्णेजप इत्यत्र समासानापत्तिः। सूत्रे स्तम्बकर्णयोरिति सप्तम्याः प्रथमार्थत्वाद्रमिजपोरनन्तरमच् प्रत्ययो भवति स्तम्बकर्णौ चोपपदसंज्ञकौ भवत इत्यर्थापत्त्या यच्च सुबन्तं न तत्सप्तम्यन्तपदस्थं यच्च सप्तम्यन्तपदस्थं न तत्सुबन्तमिति सूत्रार्थाऽनुपपत्त्या समासाऽनापत्तिरित्यर्थः। ननु स्तम्बेरमः, कर्णेजप इत्यत्र सूत्रे स्तम्बकर्णयोरुपादानसामर्थ्यात्तयोः सुबन्तत्वाऽभावेऽपि उपपदसंज्ञायाः सुलभत्वात्संज्ञाया; सुलभत्वात्समासोपपत्तौ तत्र तदनुपपत्तिप्रदर्शनं न युक्तियुक्तमिति चेन्न। उक्तयुक्त्योक्तस्थलीयसमासाऽऽपत्तिपरिहारेऽपि समाससंज्ञाविधायकशास्त्रे 'उपपदमतिङि'ति सूत्रे प्रथमान्तसुबन्तसुब्ग्रहणस्याऽनुवर्त्तनात्प्रथमान्तस्यैवोपपदसंज्ञकसुबन्तस्योक्तसूत्रेण समासविधानेन 'सुप्यजातावि' ति णिन्यन्ते राज्ञः दर्शीत्यादौ समासाऽनापत्तेर्दुर्वारत्वात्। तत्र प्रथमान्तं सुबन्तमेवोपपदं समस्यते इत्यर्थस्तु सुपीतिसप्तम्याः प्रथमार्थत्वाद्बोध्यः। तथा च राजानं पश्यति तच्छीलेतिविग्रहपरोक्तप्रयोगे दुर्वारमेवोक्तदूषणमिति। नचोपपदमतिङिति सूत्रस्याऽऽवृत्याऽर्थद्वयकरणात्प्रथमान्तसुबन्तोपपदस्याऽन्यविभक्त्यन्तसुबन्तोपपदस्य च समासे न कुत्राऽप्यापत्तिरिति वाच्यम्। गौरवादर्थद्वयकरणस्य कर्तुमशक्यत्वात्। उपपदमिति महासंज्ञाविरोधाच्च। स्तम्बकर्णेति प्रातिपदिकयोः पदत्वाऽभावेन तयोरुक्तसंज्ञाऽङ्गीकारे स्पष्ट एव महासंज्ञाविरोध इति भावः। एतेन पदस्यैवोपपदसंज्ञा भवतीत्यर्थादायातमिति ज्ञेयम्। 'सुप्यजातौ णिनिस्ताच्छील्ये' 'सुपिस्थः' इत्येतत्प्रभृतिविषये सप्तम्यन्तपदवाच्यत्वरूपतत्स्थत्वमादाय सुप्यजातावित्यादावुक्तरीत्योपपदत्वोपपादनेऽपि 'विभाषाग्रे प्रथमे' त्यादौ सुपीत्यस्याऽनधिकारादग्रेशब्दादीनां कथमुपपदत्वमिति वाच्यम्। उक्तस्थले तदनधिकारेऽपि महासंज्ञाबलेनाऽग्रादिशब्दानां तत्प्रकृतिकसुबन्ते लक्षणया तत्त्वोपपत्तेः॥

महासंज्ञाकरणसामर्थ्येन विभक्त्यन्तस्यैवोपपदसंज्ञास्वीकारादेव, अतिङ्ग्रहणादेतद्योगद्वये सुप्सुपेति निवृत्तमित्युक्तमुपपदमतिङिति सूत्रे भाष्ये। उप–समीपे उच्चरितं पदमुपपदम्। सामीप्यञ्च सप्तम्यन्तपदघटितसूत्रविधेयप्रत्ययप्रकृत्यर्थेऽन्वयित्वमेव नत्वाऽनुपूर्व्यं व्यवधानम्। 'कर्मण्यण्' इति सूत्रे उष्ट्रप्रणायमितिभाष्योदाहरणात्। 'आतोऽनुपसर्गे कः' इत्यत्राऽनुपसर्गग्रहणाच्च। नच आनुपूर्व्यव्यधानरूपसामीप्यस्याऽनाऽऽश्रयणे गुरुं नमस्कारोतीत्यादावण् दुर्वार इति वाच्यम्। भवन्तं शृणोतीत्यादाविवोक्तस्थलेऽनभिधानादणोऽप्रवृत्तेः। नन्वेतत्सूत्रस्याऽधिकारसूत्रत्वेऽत्र 'तत्र, ग्रहणं व्यर्थमधिकारेणैव प्रकृतधात्वधिकारविषयतायाः सिद्धत्वादित्यत आह—तस्मिंश्च सत्येवेति–उपपदे सत्येवेत्यर्थः। अयम्भाव;–तत्रग्रहणाऽभावे 'धः कर्मणि ष्ट्रन्' इत्यादौ यथा कर्मण्यभिधेये ष्ट्रन्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रत्ययो भवतीत्यर्थो भवति; तथैव 'कर्मण्यणि' त्यादौ कर्मण्यभिधेयेऽण् प्रत्यय इत्यर्थे कर्तर्यण्प्रत्ययाऽनापत्तिः। किञ्च सप्तम्यन्तनिर्देशस्योपपदसंज्ञार्थत्वेन चारितार्थ्यात्केवलादपि धातोः कर्तर्यण्प्रत्ययसम्भवः। कृते तु तस्मिन् कुम्भाद्युपपदस्य प्रत्ययोत्पत्तिहेतुभूतत्वेन केवलादुक्तप्रत्ययापत्तिशङ्काकलङ्कोदयावसरो नैवास्तीति। अनेन च सूत्रेण प्रत्ययविशेषस्य पदसंज्ञासन्नियोगशिष्टत्वं बोधयति। यस्य प्रत्ययविधायकशास्त्रस्य सप्तम्यन्तपदैकवाक्यता वा भवति तेन शास्त्रेण प्रत्ययविशेषस्य सप्तम्यन्तपदस्योपपदसंज्ञायाश्च युगपद्विधानम्भवति यस्य तु प्रत्ययविधायकशास्त्रस्य नोक्तरूपत्वं तस्य केवलप्रत्ययमात्रविधायकत्वमेव। यथा तव्यत्तव्यानीयर इत्यादिशास्त्राणां केवलप्रत्ययविधायकत्वमेवेति तदाशयः। प्रत्ययविधेरुपपदसंज्ञासन्नियोगशिष्टत्वाऽनङ्गीकारे त्वन्वाचयशिष्टत्वापत्तिः। अयम्भावः—कर्मण्यणित्यादौ यस्मिन्प्रयोगे कर्मणो विधीयमानाऽण्प्रत्ययप्रकृत्यर्थाऽन्वयित्वन्तत्रप्रयोगे कर्मण उपपदसंज्ञाऽपि भवति। धातोरण्प्रत्ययस्तूपपदाऽभावेऽपि भवतीति सम्भाव्येत। नच सूत्रे कर्मणीति सप्तम्यन्तपदसत्त्वात्कथन्तदभावे प्रत्ययसम्भव इति वाच्यम्। कर्मणीतिसप्तम्यन्तपदोच्चारणस्य यत्र तादृशस्य समीपोच्चारितत्वन्त्रोपपदसंज्ञाविधायकत्वेन चारितार्थ्यात्। अत्र सूत्रस्य प्रथमार्थसप्तम्यामेव प्रवृत्त्या 'भुवो भावे' इत्यादौ भावेऽर्थे भुवः क्यबित्यर्थाद्भावे इति अधिकरणसप्तम्यां न प्रवृत्तिरिति बोध्यम्। उपदेशेऽजनुनासिक इदि, ति सूत्रे प्रवृत्त्युपयोग्यानुनासिकत्वव(१)ल्लक्ष्यानुरोधेनैव काचित्सप्तमी प्रथमार्थे काचित्स्वार्थाऽधिकरण एवेति व्यवस्थाऽनुमेयेत्यलं पल्लवितेन॥

उपपदमतिङ्—सूत्रे सुबन्तस्याऽसत्त्वादुपपदेतिमहासंज्ञावलात्तल्लाभस्तथा च उपपदस्य सुबन्तस्य समर्थेन नित्यं समास इत्यर्थः। सुबन्तस्योपपदसंज्ञास्वीकारादेव 'राजनि युधि कृञः' इत्यत्र राजनीति सप्तम्याः प्रथमार्थत्वकल्पनात्सुबन्तस्यैव क्वनिप्प्रत्ययविधानसमकालिकोपपदसंज्ञास्वीकारेण राजानं योधितवतीति राजयुध्वेत्यादौ नलोपो जातः।

सूत्रेऽतिङितिपदे न तिङ् यस्मिन्निति बहुव्रीहिणा तिङन्ताघटित उपपदसमास इत्यर्थे ण्वुल्विधायकसूत्रस्थायाः क्रियार्थायां क्रियायामिति सप्तम्याः प्रथमार्थत्वेन एधानाहारको व्रजतीत्यत्र व्रजतीत्यस्य विभक्त्यन्तस्योपपदत्वेऽपि तिङन्तत्वान्न समासः।

नच तस्योपपदसंज्ञाविधाने किम्फलमिति वाच्यम्। तदुच्चारण एव प्रत्ययोत्पत्तेरेव फलत्वात्। एवञ्च तिङन्तस्य नोपपदसमास इति फलितमित्याह—अतिङन्तश्चायं समास इति—कथमपि तिङन्ताघटितः समाससंज्ञकः समुदाय इत्यर्थः। कुम्भ अस् कार इत्यलौकिकं प्रक्रियावाक्यमिति। समासप्रवृत्तियोग्यं लोके प्रयोगार्हमित्यर्थः। ननु [अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते] इतिन्यायबलेन 'सुपो धातुप्रातिपदिकयोरि' त्येतत्सूत्रविहितलुका 'लशक्वतद्धिते' 'तस्य लोपः' इति सूत्रद्वयविहितयोः ङकारस्येत्संज्ञालोपयोर्बाधेन कुम्भ ङस् इत्येवं प्रदर्शनस्य युक्तत्वादुक्तवाक्यप्रदर्शनं न युक्तमिति चेन्न। इत्सं-

(१) लक्ष्याऽनुरोधेनैवेति। ब्रह्मभूयमित्येतच्छब्दजन्यशाब्दबोधे धात्वर्थभवनस्यैव विशेष्यत्वेन भानस्याऽनुभवसिद्धत्वाद्भाव इति सप्तम्या न प्रथमार्थत्वम्। भव्यम्प्रभव्यमित्यादौ क्यपोऽदर्शनात् 'अनुपसर्गे सुपि' इत्यनयोस्तु प्रथमार्थत्वमेवेतिकल्पनवल्लक्ष्यानुरोधेन कल्पनीयमिति भावः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ञ्जालोपयोर्बाधाऽबाधयोः फले विशेषाऽभावेनोक्तन्यायाऽप्रवृत्तेः । अत्र 'कर्तृकर्मणोः कृति' इत्यनेन कृद्योगलक्षणा षष्ठी । नवाऽन्तरङ्गपरिभाषया द्वितीयाया दुर्वारत्वात्कथं षष्ठीति वाच्यम् ।

(प्रकल्प्य चापवादविषयं तत उत्सर्गः प्रवर्त्तते) इति न्यायेन षष्ठ्या एव प्राप्तेः । न-चोक्तसूत्रेण षष्ठीविधानात्पष्ठीसमासस्यैव सुलभत्वेन तं विहायोपपदसमासः कथमिति वा-च्यम् । विभक्त्युत्पत्तेः पूर्वमेवाऽन्तरङ्गत्वादुत्तरपदे उपपदसमासप्रवृत्तेः । नच कृद्योगलक्ष-णषष्ठ्याः कारकषष्ठीत्वेनाऽन्तरंगत्वात्पष्ठीसमासस्याऽपि विभक्त्युत्पत्तेः पूर्वं प्रवृत्तौ कुतो नाऽयमेव समास इति वाच्यम् । सत्येवमस्य समासस्यैवेष्टत्वात् । नच षष्ठीसमासस्य नित्यत्वादेतत्कृतस्य तत्पुरुषसंज्ञाप्रयुक्तैकार्थीभावरूपसामर्थ्यस्याऽनपगमेनोक्तसमासप्रवृत्तेः। एकस्या एव संज्ञाया उभाभ्यामपि प्रवृत्त्याऽविरोधेन युगपदेवोभाभ्यां सेति भाष्ये स्पष्टमत्र सूत्रे । (१)एवञ्च 'द्वितीयाश्रिते'त्यादिसूत्रविहितसमासोऽप्युत्तरपदे सुबुत्पत्तेः प्रागेवेति बोध्यम् । (२)अतएव परिभाषायां कारकेतिसामान्यत एवोक्तम् । भाष्यकृता च न कार-कांशे प्रमाणमुपन्यस्तम् । नच प्रकृतसूत्रस्थभाष्यात्परिभाषा न कर्त्तव्येत्यवगमेन परिभा-षाघटककारकांशे नोपन्यस्तं भाष्यकृता प्रमाणमित्युक्तिर्न संगतिमाप्नोतीति वाच्यम् । प्रकृतसूत्रस्थभाष्यस्य विशिष्टायाः परिभाषाया अकर्त्तव्यपरत्वेनादोषात् । उक्तभाष्यस्यै-तत्परत्वादेव परिभाषाप्रत्याख्यानोत्तरमपि गतिकारकेति समासवचनादित्युक्तम् । तेन कारकांशो वाचनिक इति लभ्यत इति ॥

ननु सूत्रेऽतिङ्पदसत्त्वात्तिङन्तस्य समासाऽभावबोधनं तत्सुपाऽधिकारेणैव सिद्धञ्चे-द्व्यर्थं तद्ग्रहणमित्याशयेनाशङ्कते—अतिङ्किमिति । समाधत्ते-मा भवान् भूदिति । कारको व्रजतीत्यादिभाष्योक्तस्याऽप्युपलक्षणमिदमिति बोध्यम् । अत्र समासाऽभावं सूचयितुमेव मध्ये भवानिति प्रयुक्तम् । अयम्भावः—अतिङ्ग्रहणाऽसत्त्वे तिङन्तेन समा-सापत्तिः, 'माङि लुङि'ति सप्तमीनिर्देशेन माङ उपपदत्वात् । नच सुपाधिकारस्य प्रागेवो-क्तत्वात्सुबन्तस्यैव समासेन तिङन्तस्य समासाऽभावाद्व्यर्थमेव तदिति वाच्यम् । तस्य वक्ष्यमाणपरिभाषाज्ञापनेन साफल्यात् । तथाहि-माङ उपपदत्वे तादृशमहासंज्ञाकरणब-लात् कर्तुं देवदत्तो घटं ग्रामं व्रजतीति प्रयोगवत् 'ऐऔच्' 'तद्धितार्थे'ति सूत्रद्वयस्थभा-ष्याद्द्वित्रिपदव्यवधाने प्रयोगाऽभावबोधनेन माङि लुङिति सप्तम्याः प्रथमार्थत्वाऽभावा-त्तस्योपपदत्वे मानाऽभावेन तस्योपपदत्वे फलाऽभावेन चोक्तप्रत्युदाहरणभूतोक्तप्रयोगे समासापत्त्यभावाद्व्यावर्त्याऽभावेन व्यर्थमतिङ्ग्रहणं ज्ञापयति नात्र सूत्रे सुपेत्यस्यानुवृत्तिः 'कुगति प्रादयः' इत्यत्राऽपि न तदनुवृत्तिः । तत्र 'कुप्रादयः' 'गतिः' इति योगं विभज्य कुप्रादयः सुबन्ताः सुबन्तेन, समस्यन्ते, गतिश्च सुबन्तोऽतिङन्तेन समस्यत इत्यर्थः । तथा च सिद्धैषा परिभाषा (गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः)

---

(१) गतिकारकेति परिभाषायां कारकशब्दमात्रस्योपादानात्कारकविभक्त्यन्तस्य कृ-द्भिः समासविधायकशास्त्राणां कृदन्तात्सुबुत्पत्तेः प्राक् प्रवृत्तिरित्यस्य सिद्धौ चेत्यर्थः ।

(२) परिभाषायाः कारकसामान्यविषयत्वादेवेत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इति । उक्तयुक्त्या गत्युपपदयोर्लाभः कारकांशस्य तु 'कर्तृकरणे कृता बहुलमि'ति सूत्रस्थबहुलग्रहणाल्लाभः ।

परिभाषाफलं प्रदर्शयन् गतिमुदाहरति—व्याघ्रीति । अत्र व्याङो घ्रशब्देन गतिसमासः । अस्य समासस्य सुबन्तस्याऽपेक्षणे तु सुबुत्पत्त्यर्थं संख्याऽपेक्षणात्ततः पूर्वमेव लिङ्गयोगात्तन्निमित्तकप्रत्ययष्टावेव स्यान्न ङीप् । अविभक्त्यन्तस्य घ्रशब्दमात्रस्य जातिवाचकत्वाऽभावेन च ङीप् न स्यादिति भावः । नच परिभाषाघटकांशत्रयस्य मध्ये गत्यंशोदाहरणस्योपपदत्वेन सिद्धत्वाद्व्यर्थं एव स इति वाच्यम् । आङ उपपदत्वेन तस्य घ्रशब्देन समासेऽपि पश्चाद्विशब्देन समासार्थं गत्यंशस्याऽवश्यकत्वात् । आङः 'घ्रः संज्ञायामि'त्यनेनाङ्पूर्वकात् घ्राधातोः कप्रत्ययविधानादाङ उपपदत्वं न विशब्दस्येति भावः ।

कारकमुदाहरति—अश्वक्रीतीति । अत्राश्वेन क्रीतेति विग्रहे 'कर्तृकरणे कृता बहुलमि'त्यनेन समासः । 'क्रीतात्करणपूर्वादि'ति ङिप् । सुबन्तेन सति समासे पूर्वोक्तयुक्त्या टाप्यदन्तत्वाभावान्नासाविति भावः । उपपदमुदाहरति—कच्छपीति । कच्छेन पिबतीति विग्रहे 'सुपी'ति योगविभागात्कः । अत्राऽपि सुबन्तेन समासे व्याघ्रीत्यत्रेव ङीप् न स्यादिति भावः । कच्छेन साधनेन पीबतीत्यर्थे कच्छस्य कारकत्वादस्यैवोदाहरणमिदं नोपपदस्य; तथा च माषवापिणीत्यस्योदाहरणम् । अत्र माषोपपदाद्वपधातोः 'सुप्यजातावि'ति णिनिः । ततो माषोपपदस्य कृदन्तेन समासे 'प्रातिपदिकान्तनुम्विभक्तिषु चे'ति सूत्रेण पूर्वपदस्थनिमित्तात्परस्य समासप्रातिपदिकान्तनकारस्य णत्वसिद्धिः, सुबन्तेन समासे तु अन्तरंगत्वान्नान्तलक्षणङीपो दुर्वारतया ततो वापिनीशब्देन समासे गर्गभगिनीत्यत्रेव णत्वानापत्तिरित्येके । कच्छेत्यस्य कारकत्वाऽभावाद्युक्तमेवोदाहरणमुपपदस्येत्यन्ये इति दिक्॥

अह्नष्टखोरेव । द्व्यहीन इति । द्वे अहनी भृतः क्रतुरिति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे चे'त्यनेन तद्धितार्थे द्विगौ 'तमधीष्ट' इत्यधिकारे द्विगोर्वेत्यनुवर्त्तते 'रात्र्यहः सम्वत्सराच्चे'त्यनेन खे तस्मिन् 'अह्नष्टखोरेवे'त्यनेन टिलोपे खस्येनादेशे चोक्तरूपसिद्धिः । ननु खस्य टिलोपमात्रफलकत्वाऽभ्युपगमे तत्र तद्धितार्थे द्विगौ विहितेन टचैव टिलोपसिद्धौ खग्रहणं व्यर्थमिति चेन्न । समासान्तविधेरनित्यत्वेन टचोऽप्रवृत्त्या खग्रहणस्य सार्थक्यात् । समासान्तविधेरनित्यत्वादेव द्विगोर्वेत्यनुवर्त्तमाने रात्र्यहःसम्वत्सराच्चेत्यस्य चारितार्थ्यम् । नच 'अह्नष्टखो'रित्यनेन खे परे टिलोपविधानसामर्थ्यादेव समासान्तविधेष्टचोऽप्रवृत्तौ तस्याऽनित्यत्वपर्यन्तानुधावनं खपुष्पग्रहणवन्निष्फलमिति वाच्यम् । अहीन इत्यत्र खे टिलोपविधानेन अह्नष्टखोरित्यस्य सार्थक्यात्सामर्थ्याऽभावेन समासान्ताऽभावाऽसाधकत्वेनोक्तविधेरनित्यत्वमन्तरा टचो दुर्वारतयोक्तविधेरनित्यत्वपर्यन्तानुधावनस्य साफल्यात् । नच टचि को दोष इति वाच्यम् । 'अह्नोऽह्न एतेभ्यः' इत्यनेन द्व्यहीन इत्यस्याऽह्नादेशेनाऽसिद्ध्यापत्तेः । नच प्रमाणाऽभावात्समासान्तविधेरनित्यत्वं न स्यादिति वाच्यम् । अश्वादिगणे राजन्छब्दपाठस्यैव तत्र प्रमाणत्वात् । तथाहि—प्रतेरंश्वादयस्तत्पुरुषे' इत्यनेनाऽन्तोदात्तार्थमश्वादिगणे राजन्छब्दपाठः स चायं समासान्तविधेरनित्यत्वे सत्येव सफलः, अन्यथा टचैवान्तोदात्तत्वसिद्धौ तदर्थं कृतस्याश्वादिगणे राजन्छब्दपाठस्य वैयर्थ्यापत्तेरित्यलम् ।

Kirtikaht Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्त्रियामदन्तत्वाट्टाबिति । ननु 'रात्राऽन्हाहाः पुंसि' इत्यनेन रात्रिशब्दान्ता-ऽहन्शब्दान्ततत्पुरुषयोः पुंस्त्वविधानात्प्रकृतेऽहन्शब्दान्ततत्पुरुषस्य पुंस्त्वबोधनात्स्त्री-त्वस्य दुर्लभतया स्त्रियामित्याद्युक्तिर्न सम्यगिति चेन्न । सर्वमहः सर्वाह इत्यत्र पुंस्त्ववि-धानेन सफलस्योक्तवचनस्य लुप्ततद्धितेऽप्रवृत्तेः । न च प्रमाणाऽभावात्कथमिह तदप्रवृ-त्तिरिति वाच्यम् । 'लुपि युक्तवद्व्यक्तिवचने'इत्यस्यैव तत्र प्रमाणत्वात् । तथाहि—लुप्तप्रत्य-येष्वपि प्राकृतलिङ्गाऽनुशासनप्रवृत्त्यभ्युपगमे स्पष्टमेव तद्वैयर्थ्यं स्यात् । लुप्तप्रत्यये प्राकृ-तलिङ्गाऽनुशासनाऽप्रवृत्तेरेव लवणः सूपः, लवणा यवागूरित्यादौ क्लीबत्वं न । नच द्वयो-रह्नोर्भवेति विग्रहे 'कालाट्ठञि'त्यनेन विहितस्य ठञो 'द्विगोर्लुगनपत्ये' इत्यनेन लुकि 'राजाहः सखिभ्य' इति टचि टिलोपेऽह्नादेशे च निष्पन्नस्य द्व्यह्नशब्दस्य ठञन्तत्वेन 'टि-ड्ढाणञि' तिङीपो दुर्वारतया टाबित्युक्तिर्न समीचीनेति वाच्यम् । अनुपसर्जनीभूतस्य ठञो योऽकारस्तदन्तप्रातिपदिकान्ङीब्विधायकसूत्रार्थं वर्णाश्रयत्वेन (वर्णाश्रये नास्ति प्र-त्ययलक्षणमि) ति निषेधात्प्रत्ययलक्षणाप्रवृत्त्या ठञोऽसत्त्वेन ङीपोऽप्रवृत्तेः । नचैवं परि-हारेऽपि टच्प्रत्ययस्य टित्वान्ङीप् स्यादेवेति वाच्यम् । टचः समासान्तत्वात्तद्धितार्थम्प्र-ति तस्योपसर्जनत्वेन तदप्रवृत्तेः । अत एव आपिशलिना प्रोक्तमधीयाना ब्राह्मणी'आ-पिशलेत्युदाहृतम्भाष्ये । नच (संख्या पूर्वो द्विगुरि)त्यनेन द्विगुसमासे (द्विगोरि)त्यनेन ङीप् दुर्वार एवेति वाच्यम् । उक्तङीब्विधायकस्य 'अपरिमाणबिस्ताऽचिते'ति निषेधेन तदप्रवृत्तेः । अतोऽत्र टाब एव युक्तत्वात्तथैवोदाहृतमित्यलं पल्लवितेन ।

दीर्घाह्नो प्रावृडिति । दीर्घाणि अहानि यस्यामिति विग्रहे 'अह्नोऽन्हः एतेभ्यः' इत्यनेनाऽन्हादेशे (क्षुभ्नादिषु चे)ति णत्वनिषेधे रूपं सिद्ध्यति ।

यत्तु प्राचा । उक्तप्रयोगे णत्वाऽभावोऽदन्ताह्नादेशाऽभ्युपगमेनोपपादितः स तदायासो मुधैव, 'प्रातिपदिकान्तनुम्विभक्तिषु चे'त्यनेन प्राप्तणत्वव्यावृत्त्यर्थं तस्य क्षुभ्नादिगणे पाठस्यावश्यकत्वेन तदुपपत्तेरिति भावः ।

ननु (लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमि)ति परिभाषया 'सन्महत्परमो-त्तमोत्कृष्टाः पूज्यमानैः' इत्येतत्सूत्रविहितप्रतिपदोक्तसमासस्यैवाऽत्र ग्रहणं स्यात्तथा च तत्र यदुत्तरपदं तस्मिन्नेव परे आत्वविधानं नान्यस्मिन्निति व्यर्थं समानाधिकारग्रहणमिति चेन्न । तस्य सामर्थ्यादुक्तपरिभाषाऽप्रवृत्तिकल्पनेन साफल्यात् । एवञ्च महाबाहुरित्यत्र नाऽऽत्वानुपपत्तिः । उक्तप्रयोगे महान्तौ बाहू यस्येति बहुव्रीहिः ॥

ननु आन्महत इत्यनेन महच्छब्दस्यात्वविधानादुत्तरसूत्रे द्व्यष्टनोरेव ग्रहणाच्च सर्वथा-ऽप्राप्त्या एकादशेत्यत्राऽऽत्वं न स्यादत आह-आदिति योगविभागादात्वमिति । योगविभागस्य भाष्याऽनारूढत्वमित्यत आह-प्रागेकादशभ्य इति निर्देशाद्वेति ।

ननु अर्द्धनावमित्याद्यर्थं लोकाश्रयत्वाल्लिङ्गस्येत्यस्यावश्यकत्वादनेनैव लिङ्गोपपत्तौ लिङ्गविधायकप्रकरणमनावश्यकमिति चेत्सत्यम् । जात्याख्यायामित्यादिसूत्रसमूहवदिष्टा-पत्तेरिति ध्वनयन्प्रकृताऽनुपयुक्तान्यपि तानि व्याचष्टे—जात्याख्यायामित्यादि । जातेः प्राधान्येनाऽऽख्यायामित्यर्थः । भावप्रत्ययमन्तरा प्राधान्येन जातिबोधे गवादिशब्दानां साधुत्वे इदमेव सूत्रं मानमिति बोध्यम् । तस्याऽविशेष्यत्वे बाह्यार्थाऽन्वयो व्यक्तिघटित-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परम्परया बोध्यः। तत्र-जातेरेकत्वेनैकवचनं प्राप्नोतीत्यस्यारम्भः। अत्रैकत्वञ्च बहुवचनार्थः। एकस्मिन्नर्थे वर्तमानः शब्दो बहूनामर्थानां वचनं बोधको भवतीत्यर्थादर्थातिदेशोऽयमित्याह—**एकोऽप्यर्थो बहुवद्भवतीत्यादि**। तदुक्तम्भाष्ये-(यावद्ब्रूयादेकोऽर्थो बहुवद्भवतीति तावदेकस्मिन्बहुवचनमिती)ति। एकत्वेऽर्थे बहुत्वप्रयुक्तस्य कार्यस्यातिदेशात्कार्यातिदेश एवेति बोध्यम्। जातौ संख्यान्वये एकवचनस्य व्यक्तौ संख्याऽन्वये बहुवचनस्य सिद्धत्वादनावश्यकत्वेन भाष्ये प्रत्याख्यातमेतत्सूत्रम्। एवञ्च यथोत्तरं मुनीनां प्रामाण्यात्सूत्रोक्तार्थेऽसाधुत्वमेव प्रयोगाणामिति बोध्यम्।

सविशेषणस्य प्रतिषेध इति। मुख्यार्थे बहुवचननिषेधार्थमिदं वार्त्तिकम्। यदा तु अस्मच्छब्दस्य स्वघटिते उद्भूतावयवभेदे समुदाये लक्षणा तदा बहुवचनं भवत्येव, तेन

'त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः'।

इत्यादि सिद्धम्। गार्ग्योऽहं ब्रवीमीत्यादावयं निषेधः। उत्तमपुरुषाऽनुरोधेनाऽत्राहमित्यस्य स्वविशेष्यत्वादित्यलम्॥

ननु 'सभाराजाऽमनुष्यपूर्वा' इत्यत्र सभेत्येको योगः, राजाऽमनुष्यपूर्वेत्यपरो योगः, तत्र सभान्तस्तत्पुरुषो नपुंसकं स्यादित्यर्थकेन सभेतियोगेनैव स्त्रीसभमित्यत्र नपुंसकत्वे सिद्धे 'अशाले'ति सूत्रं व्यर्थमित्यभिप्रायेणाशङ्कते—**अशाला किमिति**। समाधत्ते–**धर्मसभेति**। धर्मशालेत्यर्थः। अयमभिप्रायः—इनसभम्, ईश्वरसभमित्यत्रापि पूर्वयोगेनैव नपुंसकत्वोपपत्तौ व्यर्थः सन्नुत्तरयोगो ज्ञापयति स्त्रीत्वेतरलिङ्गविशिष्टप्राणिवाचकपूर्वपदकस्य सभान्तस्य तत्पुरुषस्य नपुंसकत्वञ्चेत्तर्हि राजाऽमनुष्यपूर्वपदकस्यैव स्यादेवञ्च स्त्रीत्वेतरलिङ्गविशिष्टप्राणिवाचकपूर्वपदकेतरत्वेन पूर्वयोगे संकोचे कृते स्त्रीत्वेतरलिङ्गविशिष्टप्राणिवाचकपूर्वपदकेतरत्वाऽभावेन इनसभमीश्वरसभमित्यत्र नपुंसकत्वार्थमुत्तरयोगस्यावश्यकत्वेन स्त्रीसभमीत्यत्रेव धर्मसभेत्यत्राऽपि नपुंसकत्वापत्तिरिति तदर्थमशालेति सूत्रमावश्यकमेवेति दिक्॥

इति तत्पुरुषः॥

अथ बहुव्रीहिसमासप्रकरणम्।

शेषो बहुव्रीहिः। असर्वोपयोगार्थकाच्छिषेः कर्मणि घञा निष्पन्नस्य सूत्रघटकशेषपदस्योपयुक्तादन्यपरत्वेन यस्य पदस्याऽर्थस्य वा पूर्वत्रोपयोगस्तस्य पूर्वमप्रसिद्धिमभिधाय भाष्यकृता सिद्धान्तितं त्रिकतः शेष इत्येतन्मूलकव्याख्यानात् शेष इत्यस्य प्रथमान्तत्वाच्च। तेन प्रथमान्ताऽपेक्षशेषस्यैव ग्रहणमिति बोध्यम्। पदतः शेषस्य ग्रहणे सामान्यतो विशेषतो वा यस्य पदस्योपयोगस्तदन्याऽप्रसिद्धिः, 'सुप्सुपे'त्यत्र समान्यतः, 'द्वितीया-श्रिते'त्यादौ विशेषत उपयोगः। अर्थोऽपि पूर्वपदार्थप्रधानत्वेऽन्यपदार्थप्रधानत्वे चाऽव्ययीभावः। उत्तरपदार्थप्रधानत्वे तत्पुरुषः प्रसिद्ध एव, अतो यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेष इति विवक्षितमितिभावः। **सशेषःप्रथमान्तमिति**। ननूक्तप्रकारेण प्रथमान्तस्य बहुव्रीहिरिति सिद्धम्, तत्कथं, (प्रादयो गताद्यर्थे प्रथमया) इति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत्पुरुषसमासप्रकरणस्थवार्त्तिकेन प्रगत आचार्य इत्यादौ प्रथमान्तस्य तत्पुरुषसमासविधानादिति चेन्न । उक्तवार्त्तिकेन प्रथमान्तेन प्रादीनामुक्तसमासविधानेऽपि प्रथमान्तस्योक्तसमासाविधानादिति भावः । नच कण्ठे काल इत्यादौ व्यधिकरणपदस्यापि बहुव्रीहिदर्शनात्प्रथमान्तस्यैवोक्तसमास इत्ययुक्तमिति वाच्यम् । तत्र तत्र ज्ञापकसाध्यबहुव्रीहेरिष्टत्वात् ।

अनेकमन्यपदार्थे । अन्यस्य समस्यमानपदातिरिक्तस्य पदस्यार्थोऽन्यपदार्थस्तत्र विद्यमानस्याऽनेकप्रथमान्तस्य वा समासः; स च बहुव्रीहिसंज्ञक इत्यर्थः । अन्यपदार्थ इत्यत्राऽन्यपदं भेदविशिष्टार्थकं ततश्च भेदस्य प्रतियोगिनि साकाङ्क्षत्वाच्छेपपदोपस्थितस्य प्रतियोगित्वेन तत्राऽन्वयाद्द्वितीयान्तार्थ इति लब्धम् । तथा च–स्वनिष्ठप्रतियोगितानिरूपितभेदविशिष्टार्थकपदार्थे विद्यमानस्याऽनेकप्रथमान्तस्य समास इति फलितार्थः ॥

अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति । 'अनेकमन्यपदार्थे' इत्यनेकप्रथमान्तस्य समासविधानात्तत्राऽन्यपदार्थपदेन प्रथमान्तार्थातिरिक्तस्यैव ग्रहणं युक्तमित्येतत्फलितन्तद्दिति भावः ॥

समानाधिकरणानामिति च फलितमिति । समानाधिकरणत्वञ्च, एकार्थबोधजनकत्वम् । अनेकप्रथमान्तस्थले अभेदाऽन्वयप्रयोजकीभूतसमानविभक्त्यन्तविशेष्यविशेषणवाचकपदसत्वादर्थादेव समानाधिकरणत्वोपपत्तिरिति तदाशयः । अनेकप्रथमान्तस्य समासविधानादेकप्रथमान्तस्य तदभाव इत्याह—**प्रथमार्थे तु नेति** । सूत्रे प्रथमान्तमित्यस्य फलमाह—**पञ्चभिर्भुक्तमस्येति** ।

प्रादिभ्यो धातुजस्येति । प्रादिभ्यः परं यद्धातुजं पदं तदन्तस्य पदान्तरेण समासः पूर्वपदान्तर्गतस्योत्तरपदस्य धातुजस्य वा लोप इत्यर्थः । प्रपर्ण इत्युदाहरणम् ॥

नञोऽस्त्यर्थानामिति । नञः परं यदस्त्यर्थवाचि पदं तदन्तस्य पदान्तरेण बहुव्रीहिः, अस्त्यर्थवाचिनाम्पदानाम्वा लोप इत्यर्थः । अविद्यमानः पुत्रोऽपुत्र इत्युदाहरणम् । तत्राऽस्त्यर्थानामित्यस्याऽसत्वे अनुपनीतपुत्र इत्यत्रापि समासोत्तरपदलोपयोरापत्तिरतस्तत् । नञोऽसत्वे निर्विद्यमानपुत्र इत्यत्राप्युक्तापत्तिः । नन्विह सुपेत्यस्याऽसम्बन्धेऽपि सुवित्यस्य सम्बन्धादस्तीत्यस्य तिङन्तत्वेन समासो न स्यादत आह—**अस्तीति विभक्तिप्रतिरूपकमव्ययमिति** ।

अत्र केचित्—चित्रा । जरती गौर्यस्येति विग्रहे सूत्रेऽनेकेतिपदसत्त्वेन त्रिपदबहुव्रीहिः तत्र सूत्रेणोत्तरपदे पुंवत्त्वविधानादुत्तरपदशब्दस्य समासस्य चरमावयवे रूढत्वेनोत्तरपदस्य मध्यमपदेन व्यवधानात्प्रथमस्य न पुंवद्भावः । गोरूपोत्तरपदे जरतीत्यस्य द्वितीयस्यापि न सः । पूर्वपदशब्दस्य प्रथमावयवे रूढत्वेन तस्य पूर्वपदत्वाऽभावात् तथा च चित्राजरतीगुः । जरतीचित्रागुर्वा । दीर्घातन्वीजंघः । तन्वीदीर्घाजंघ इत्येवेत्याहुः ।

वस्तुतस्तु—यथा द्वन्द्वसमासप्रकरणस्थे 'आनङ् ऋतो द्वन्द्वे' अत्र सूत्रे (होतृपोतृनेष्टोद्गातार) इति समर्थसूत्रस्थभाष्यप्रयोगान्न पूर्वपदाक्षेपः । अत एव भाष्यकृदुदाहृतस्य तृतीयस्यानङः सङ्गतिः । अन्यथा पूर्वपदशब्दस्य प्रथमावयवे रूढत्वाचत्र तृतीयस्य पूर्वपदत्वाऽभावात्तदसङ्गतिः । तथैवाऽत्रापि पूर्वपदाक्षेपाऽऽभावेनोपान्त्यस्य पुंवत्वं स्यादेवेति चित्राजरद्गुरित्येव प्रयोगः । अत्र सूत्रे पूर्वपदसम्बन्धाऽभावादेव, चित्राजरत्यौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गावौ यस्येति द्वन्द्वगर्भे ऽपि बहुव्रीहौ चित्राजरद्गुरिति भाष्यं सङ्गच्छते। ननु तत्र पूर्वपदे पुंवत्वेन कुतो न टाब्निवृत्तिरिति चेन्न। द्वन्द्वान्तर्गतस्य जरच्छब्दस्योत्तरपदत्वेऽपि समानाधिकरणत्वाऽभावेन तदनिवृत्तेः। नचैवमपि द्वन्द्वात्मकपूर्वपदस्य समानाधिकरणोत्तरपदपरत्वेन सति पुंवद्भावे तदवस्थ एवोक्तदोष इति वाच्यम्। स्त्रीप्रत्ययप्रकृतिभूतयोर्द्वन्द्वान्तर्गतचित्राजरच्छब्दयोरेकैकस्य भाषितपुंस्कत्वेऽपि द्वन्द्वात्मकपूर्वपदस्य भाषितपुंस्कत्वाऽभावेनादोषादिति भावः। कर्मधारयपूर्वपदे तु पूर्वपदान्तर्गतोत्तरपदाश्रयणेन प्रथमस्योत्तरपदाश्रयणेन द्वितीयस्य च पुंवत्वे जरच्चित्रगुः। कर्मधारयोत्तरपदे तु जरति चासौ गौश्चेति विग्रहे 'गोरतद्धित' इति टचि टित्वान्ङीपि जरद्गवी, अस्य चित्राशब्देन बहुव्रीहौ चित्राजरद्गवी यस्येतिविग्रहे 'नद्यृतश्चेति वक्ष्यमाणसूत्रेण कपि चित्रजरद्गवीक इति प्रयोगः। सूत्रे भाषितपुँस्कादित्यस्याऽसत्वे गङ्गाभार्य्य इत्यत्र भार्य्यारूपोत्तरपदपरत्वेन पुंवद्भावापत्तिः। न च गङ्गाशब्दस्य नित्यस्त्रीत्वान्नोक्तापत्तिरिति वाच्यम्। सूत्रेण स्त्रीरूपार्थकबोधकस्य शब्दस्य पुंस्त्वरूपार्थातिदेशकरणसामर्थ्यात्स्त्रीत्वरूपार्थबोधकत्वेऽपि गङ्गाशब्दस्योक्तापत्तेर्दुर्वारत्वादिति भावः॥

वृद्धिनिमित्तस्य च तद्धितस्येति—ननु वृद्धिशब्देन विहिता या वृद्धिरित्यर्थलाभः कथमिति चेन्न। व्याख्यानेन तल्लाभात्। तथाहि—यः सकलाया वृद्धेर्निमित्तं यस्त्रयाणामाकारैकारौकाराणां निमित्तमितिभाष्यप्रामाण्याद्वृद्धिशब्दस्यावृत्तिः। तथा च सुकर एवोक्तार्थलाभः॥ वृद्धिम्प्रति वृद्धिशब्देन फलोपधानाभावादिह पुंवदिति। वृद्धिशब्देन ताम्प्रतिस्वरूपयोग्यस्वीकारे तु स्त्रौघ्नीभार्य इत्यत्र वृद्धिशब्देन विहिताया वृद्धेरौकाररूपाया हेतुभूततद्धितस्वरूपयोग्यत्वं वैयाकरणभार्येत्यत्रापि तद्धितस्याऽणः सत्वान्निषेधापत्तिः। फलोपहितस्वीकारे तु नापत्तिः।

तथाहि—फलोपहितस्वरूपयोग्यभेदेन द्विविधं निमित्तम्। तत्राऽऽद्यं कार्य्याव्यवहितपूर्वकालावच्छेदेन कार्याधिकरणवृत्तित्वे सति कार्यसमानाधिकरणाऽत्यन्ताऽभावीयप्रतियोगिताऽनवच्छेदकधर्मवत्वरूपम्। अन्त्यश्च सत्यन्तविशेषणरहितम्। तथा च वृद्धिरूपकार्यसमानाधिकरणे उक्तप्रयोगेऽणः सत्त्वादणतिरिक्ताऽभावीयप्रतियोगिताऽनवच्छेदकाऽणत्वधर्मवत्ताया उभयत्र सत्त्वेऽपि वृद्धिरूपकार्य्याव्यवहितपूर्वकालावच्छेदेनोक्तरूपकार्य्याधिकरणे स्त्रौघ्नीत्यादिप्रयोगे वैयाकरणघटकस्याऽणोऽसत्वान्नापत्तिः। अत्र प्रवाहणस्य परस्य वृद्धिर्न पूर्वस्य तु वेत्यर्थके 'प्रवाहणस्ये' तिसूत्रे प्रवाहणेयीभार्यं इत्यत्र वृद्धिनिमित्तस्य चेति पुंवत्त्वनिषेधो न प्राप्नोति माभूदेवं जातेरिति भविष्यतीति भाष्योक्तेरेवाऽत्र प्रमाणत्वं बोध्यम्। तावद्भार्यं इत्यत्रत्यदोषव्यावृत्तये वृद्धेर्निमित्तं यस्मिन्नित्यर्थाश्रयणपरभाष्यादुक्तप्रयोगे वृद्धिनिषेध इष्ट एवेति शेखरकृदिति दिक्॥

ननु 'ओरोदि' त्येव लाघवात् सूत्रमस्तु गुणग्रहणघटितसूत्रकरणे संज्ञापूर्वकविधित्वेन गौरवाद्धेयम्। नच गुणग्रहणाघटितसूत्रकरणेऽपि भस्य तद्धिते इत्येवंरूपसंज्ञापूर्वकत्वस्य सत्त्वाद्गौरवाद्धेयमित्ययुक्तमिति चेन्न। यत्र संज्ञापदं विधेयसमर्पकं तस्यैव संज्ञापूर्वकविधित्वात्प्रकृते भस्य तद्धिते इति सत्वेऽपि संज्ञारूपविधेयसमर्पकपदत्वाऽभावेनादोषादिति चेन्न। गुणग्रहणस्य सामर्थ्यात् [संज्ञापूर्वको विधिरनित्यः] इत्यर्थज्ञापनेन साफ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्यात् । तेन स्वायम्भुवमित्यादिसिद्धिः । [ओरोदि] तिन्यासे ओदित्यत्र तकारस्योच्चारणार्थत्वात्तपरत्वे फलाऽभावान्न 'तपरस्तत्कालस्ये' त्यस्य प्रवृत्तिः । किञ्च 'ओरो' इत्येवास्त्विवति भावः ॥

पूर्वपदात्संज्ञायामगः—ननु सूत्रेऽग इत्यस्य सत्त्वाद्गकारव्यवधाने पूर्वपदस्थनिमित्तात्परस्य नस्य णत्वन्नेत्यर्थे ऋगयनमितिषष्ठीतत्पुरुषे णत्वन्न भवतीत्याशयेनोदाहरति—अगः किम् । ऋगयनमिति ।

वस्तुतस्तु—नाग्ग्रहणस्योक्तस्थलीयणत्वापत्तिनिवृत्तिः फलम् । तस्य 'अणृगनादिभ्यः' इति सूत्रे ऋगयनशब्दपाठसामर्थ्यान्निपातेनैव निवृत्तिरिति व्यर्थमेव तदिति भाष्ये स्पष्टमित्याह—अणृगयनादिभ्य इत्यादि ॥

उपसर्गाद्बहुलम्—नन्वस्य सूत्रस्याऽष्टाऽध्याय्यामपठितत्वात्कुत उपलब्धिरिति नाशङ्क्यम् । 'उपसर्गादनोत्परः' इत्यत्राऽनोत्पर इति परित्यज्य तत्स्थाने बहुलग्रहणं संयोज्य भाष्यकृतैव पठितत्वात् । सत्यस्मिन् नसो नस्योपसर्गस्थनिमित्तात्परस्य बहुलं णत्वमित्यर्थे प्रणोनयेत्यत्राऽव्याप्तिवारणं प्रश्नः पूपेत्यादावतिव्याप्तिवारणञ्च फलमित्यलम् ॥

ननु उक्तसूत्रे [वेर्ग्रो वक्तव्यः] [ख्यश्च] ति वार्त्तिकद्वस्य सत्त्वात्ताभ्यां ग्रख्ययोरन्यतरस्य विधानाद्विनसेत्यस्योपपत्त्यसम्भवादुक्तप्रयोगघटितस्य भट्टिपद्यस्य कथमुपपत्तिरित्याशयेनाशंकते-कथं तर्हि विनसा हतबान्धवेति भट्टिरिति । समाधत्ते—विगतयेति । एवञ्च विनसेति 'पद्दन्नस्'सूत्रेण नसादेशेन तृतीयान्तमिति न कश्चिद्दोष इति भावः ॥

इनः स्त्रियाम् । इनः प्रत्ययत्वेन (प्रत्ययग्रहण) परिभाषया तदन्तविधौ स्त्रियां विद्यमानादिन्नन्तबहुव्रीहेः कविस्यर्थः । तथाच उक्तपरिभाषया दण्डिन्नित्यस्यैवेन्नन्तत्वाद्बहुदण्डिन्नित्यस्य तत्त्वाऽभावात्कप् न स्यादित्यत आह—अनिनस्मन्ग्रहणान्यर्थवताचाऽनर्थकेन च तदन्तविधिं प्रयोजयन्तीति ॥

इति बहुव्रीहिः ॥

अथ द्वन्द्वसमासप्रकरणम् ।

चार्थे द्वन्द्वः । 'अनेकमन्यपदार्थे' इत्यतोऽनेकमित्यस्यानुवृत्त्या चस्याऽर्थे विद्यमानानामनेकप्रथमान्तानां द्वन्द्वसमासो भवतीत्यर्थः । उक्तसूत्रादनुवृत्तस्याऽनेकमित्यस्य स्रग् वाग्दृषदं होतृपोतृनेष्टोद्गातार इत्यादौ यथायथं समासान्तस्याऽनङश्च मध्येऽप्रवृत्तिरन्ते एव प्रवृत्तिश्च फलम्बोध्यम् ।

अत्र केचित् । चैत्रेण मैत्रेण च कृतमिति वाक्येऽवयवकर्तृत्वस्यैव प्रतीत्या चैत्रमैत्राभ्यां कृतमिति समासे समुदायकर्तृत्वस्यैव प्रतीत्या चैत्रेण मैत्रेण च कृतमिति वाक्यस्य समाससमानार्थकत्वाऽभावेन चैत्रेण मैत्रेणेत्यस्य चैत्रमैत्राभ्यामिति समुदायसाधुत्वप्रयोजकवाक्यत्वाऽभावात्प्रथमान्तानामेव द्वन्द्वो नतु परिनिष्ठितविभक्त्यन्तानामिति । वाक्यस्य समुदायसाधुत्वप्रयोजकत्वाऽभावादेव (यदग्नये च प्रजापतये चे)त्यादौ व्यस्ते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रत्येकं देवतात्वप्रतीतिः । अग्नीषोमाभ्यामित्यादौ समुदाये देवतात्वप्रतीतिरिति व्यवस्था सिद्धयति । वाक्यस्याऽपि समुदायसाधुत्वप्रयोजकत्वे तु समास इव वाक्येऽपि समुदाये देवतात्वप्रतीतिरेव स्यात् । अत एव (ङिसम्बुद्धयोरनुत्तरपदे) इति वार्त्तिके सम्बुद्धिग्रहणमिहाऽनावश्यकं राजवृन्दारकेत्यादौ सम्बुद्ध्यन्तानां समासः, इह तावत्समासमानार्थकेन वाक्येन भवितव्यम् । यश्चेहार्थो वाक्येन गम्यते नासौ कदाचित्समासेन गम्यते अवयवसम्बोधनं वाक्येन गम्यते समुदायसम्बोधनं समासेनेति 'न ङिसम्बुद्ध्योरि'ति सूत्रे भाष्ये उक्तम् । सम्बोधनविभक्त्यन्तस्य सम्मुखीभावफलकत्वात्प्रत्येकमेव सम्मुखीभावप्रतीत्या क्रियाऽन्वयेऽभावेन परस्परमसामर्थ्यमिति तदाशयः । यदा समानाऽधिकरणस्थलेऽपि न समासस्तदा व्यधिकरणानां सुतरां न द्वन्द्व इति परिनिष्ठितविभक्त्या समासेऽपि राजपुरोहिताविति द्वन्द्वोदाहरणम् । एवञ्च व्यधिकरणतृतीयाऽद्यन्तानामपि क्रियादावेवाऽन्वयेन क्रियाजनकत्वरूपकारकत्वस्य प्रत्येकमेव बोधान्न वाक्यसमासयोस्तुल्यार्थत्वमित्यलम् ॥

मिलितानामन्वय इतरेतरयोग इति । परस्पराऽपेक्षाणामुद्भूताऽवयवभेदसमूहरूपाणामेकस्मिन्धर्मावच्छिन्नेनाऽन्वय इति तदर्थः । तेन नीधातोः संयोगजनकव्यापाराऽनुकूलव्यापारवाचकत्वेन द्विकर्मकत्वेऽपि अजां ग्रामं नयतीत्यादौ नाऽपि चकारप्रयोगो नाऽपि समास एकधर्मावच्छिन्नेऽन्वयाभावात् । (१)अत एवाऽत्राऽनेकचकारप्रयोगः । यत्र मिलितानामन्वयस्तत्रेतरेतरयोगस्तादृशसमूहश्चार्थः इत्यन्वयः । समूहे उद्भूताऽवयवभेदत्वञ्च, अवयवगतसंख्यारोपवत्त्वं प्रत्यवयवं समूहरूपत्वाऽऽरोपो वा । समूह इति । अनुद्भूताऽवयवभेदः समूह इत्यर्थः । तत्रेतरेतरयोगे उद्भूताऽवयवभेदसमूहस्य प्रतीत्या प्रवृत्तिधर्मरूपमेव प्रवृत्तिनिमित्तम् । समाहारे तु अतिरिक्तत्वेनैव समूहत्वभानात्समूहत्वं प्रवृत्तिनिमित्तमिति विशेषः । ईश्वरं गुरुञ्च भजस्वेत्यादौ न समास असामर्थ्यादिति । अनेक सुबन्तानां चार्थे वृत्त्यभावेनैकार्थीभावरूपसामर्थ्याऽभावादित्यर्थः । समुच्चयस्थले च समभिव्याहृतस्यैकस्य सुबन्तस्य चार्थे वृत्तावपि अपरस्य चार्थे वृत्त्यभावः । अन्वाचये तु उभयोरपि चार्थे वृत्त्यभाव इति भावः ॥

ननु उद्भूताऽवयवभेदविवक्षणे इतरेतरयोगद्वन्द्वे द्विवचनबहुवचनस्य, अनुद्भूताऽवयवभेदविवक्षणे समाहारद्वन्द्वे समुदायगतैकत्वादेकवचनस्य चोपपत्तावेकवद्भावविधायकप्रकरणमन्तरापीति व्यर्थमेवैतत्प्रकरणम् । इतरेतरयोगद्वन्द्वे नेष्ट एकवद्भावो लक्ष्यानुरोधादिति चेन्न । प्राण्यङ्गादीनां समाहार एव नेतरेतरयोग इति नियमार्थत्वेन सार्थक्यात् । तथा च नैतेभ्यो बहुवचनद्विवचनापत्तिरुद्भूताऽवयवभेदविवक्षयेति बोध्यम् । (तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे) इति विपरीतनियमो नाऽऽशङ्कनीयः । तथा हि एकवचनस्य द्विवचनाऽभावो बहुवचनग्रहणप्रयोजनम् । विपरीतनियमे तु प्राण्यङ्गाद्यतिरिक्तस्य समाहारत्वाऽभावादेकवचनाऽनुत्पत्या बहुवचनस्यैव द्विवचनसिद्धौ पुनर्बहुवचनग्रहणं व्यर्थमेव स्यादित्यभिप्रायेणाशंक्य समाधानमाह—समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थं प्रकरणमिति । नियमस्तूपरिष्टादुक्त एवेति बोध्यमित्यलम् ॥

(१) अत एव परस्पराऽपेक्षासत्वादेवेत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु 'विभाषा वृक्षमृगे' तिसूत्रेऽप्राणिनो ग्रहणं व्यर्थमिति चेन्न । तस्य 'जातिरप्राणिनामि'ति सूत्रप्राप्तनित्यद्वन्द्वस्य विकल्पविधानेन सार्थक्यादित्याह—विभाषावृक्ष इति सूत्र इति ।

ननु विभाषा वृक्षमृगेति सूत्रे पशुग्रहणाऽभावे हस्त्यश्वादिनां सेनाङ्गत्वेन 'द्वन्द्वश्च प्राणितूर्य्यसेनाङ्गानामि'त्यनेन नित्यद्वन्द्वो दुर्वारः स्यादित्यत आह—हस्त्यश्वादिषु सेनाङ्गत्वान्नित्ये प्राप्ते पशुग्रहणं विकल्पार्थमिति ॥

ननु उद्भूतावयवभेदविवक्षाऽनुद्भूतावयवभेदविवक्षाभ्यां रुरुपृषतम् रुरुपृषताः शुकबकम् शुकबका इत्यत्र (चार्थे द्वन्द्वः) इत्यनेनैव द्वन्द्वसिद्धौ विभाषावृक्षमृगेतिसूत्रे मृगशकुनिग्रहणं व्यर्थमिति चेन्न । तस्य नियमार्थत्वेन सार्थक्यात्; सचेत्थं नियमः—मृगाणां मृगैरेव द्वन्द्वः, शकुनीनां तैरेवेति ! अन्यैस्तु सहेतरेतरयोग एवेत्याह—मृगाणां मृगैरेवेत्यादि ।

अश्ववडवग्रहणं तु पक्षे नपुंसकत्वार्थमिति । अश्ववडवयोः पशुत्वाद्विकल्पसिद्धौ तयोर्ग्रहणं प्रतिपदविधानार्थम् । तथा च—अश्ववडवमित्येकवद्भावपक्षे 'पूर्ववदश्ववडवौ' इत्येतत्सूत्रं बाधित्वा 'स नपुंसकमि' त्येव भवतीति भावः ।।

ननु 'विप्रतिषिद्धं चानधिकरणवाची'ति सूत्रं व्यर्थम्, उद्भूतावयवभेदविवक्षया इतरेतरयोगद्वन्द्वे द्विवचनादेः, अनुद्भूतावयवभेदविवक्षया समाहारद्वन्द्वे एकवचनस्य च वचनमन्तराऽप्युपपत्तेरिति चेन्न । विरुद्धार्थानां द्वन्द्वस्यैकवद्भावश्चेद्द्रव्यवाचिनामेवेति नियमार्थत्वेन तस्य सार्थक्यादित्याह—**वैकल्पिकः समाहार इत्यादि** । निमफलञ्च शीतोष्णे उदके स्त इत्यत्र द्रव्यवाचित्वादितरेतरयोग एवेति भावः ।।

विप्रतिषिद्धं किमिति । एतद्ग्रहणे अद्रव्यवाचिनामेवद्वन्द्व एकवद्वेति सामान्यतो नियमेऽविरुद्धार्थयोर्द्रव्यवाचिनोरेकवद्भावविधानान्नन्दकपाञ्चजन्यावित्येव स्यान्नतु नन्दकपाञ्चजन्यमित्यतस्तद्ग्रहणमित्याशयेनाह—**इह पाक्षिकः समाहारद्वन्द्वो भवत्येवेति** । अनधिकरणवाचीत्यस्याग्रहणे शीतोष्णे उदके स्त इत्यत्र पाक्षिकसमाहारद्वन्द्वस्याऽनिष्टस्यापत्तिरिति भावः ।

ननु 'आनङ् ऋतो द्वन्द्वे' इत्यस्य लक्ष्याऽनुरोधेन ऋदन्तानां द्वन्द्वे ऋदन्तस्य पूर्वस्याऽऽनङ् स्यादृदन्त उत्तरपद इत्यर्थस्वीकारे पिता त्रावित्यत्राऽऽनङ् न स्यादृन्तानां द्वन्द्वाऽभावादृदन्तोत्तरपदपरत्वाऽभावाच्चेत्याशंक्य समाधत्ते—**पुत्रेऽन्यतरस्यामित्यत इति** । उक्तसूत्रात्पुत्र इत्यस्य मण्डूकप्लुत्याऽनुवर्त्तनेन वाक्यभेदाश्रयणेन ऋदन्तानां द्वन्द्वे ऋदन्तस्य पूर्वस्याऽऽनङ् ऋदन्ते उत्तरपदे ऋदन्तस्य पूर्वस्याऽऽनङ् पुत्रशब्दे इति द्विधार्थकरणान्नोक्तस्थलीया काचिदनुपपत्तिरिति दिक् ।

ननु 'आनङ् ऋतो द्वन्द्वे' इत्यतो द्वन्द्वपदानुवृत्त्यैव सिद्धौ पुनः 'देवता द्वन्द्वेचे'त्यत्र द्वन्द्वग्रहणम्व्यर्थमित्यत आह—**पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यस्य परिग्रहार्थमिति** । येषां सहचरणं प्रसिद्धन्तेषामेव द्वन्द्वे आनङुत्तरपदे इत्येतदर्थन्द्वन्द्वग्रहणम्; तेन ब्रह्मा च प्रजापतिश्चेति विग्रहे ब्रह्मप्रजापतीत्यादावानङ् न । एतयोरेकहविर्भागित्वेन सहचरणं न दृष्टं श्रुतञ्चेति भावः ॥

इति द्वन्द्वः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथैकशेषसमासप्रकरणम् ।

ननु एकशेषस्य द्वन्द्वापवादसङ्गत्यर्थमेतदुत्तरमेकशेषारम्भं प्रदर्शयति—अथैकशेष इति । नचाऽपवादत्याऽपि सङ्गतित्वे,

सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा ।
निर्वाहकैकार्य्यत्वे, षोढा सङ्गतिरिष्यते ॥

इत्यनेन षोढात्वकथनस्य विरुद्धत्वमिति वाच्यम् । अपवादेत्यनेनाऽपि अपवाद्या-ऽपवादकभावरूपप्रसङ्गनिर्वाहकसम्बन्धस्य सूचनेनाऽविरोधात् ॥

वृद्धो यूना तल्लक्षणश्चेदिति । अत्र सूत्रे वृद्धपदेन अपत्यमन्तर्हितं वृद्धमिति पूर्वाचार्य्यपरिभाषितस्य पाणिन्युक्तगोत्राऽपरपर्य्यायस्य ग्रहणम् । न च वृद्धपदेनेदृशस्य ग्रहणे किं प्रमाणमिति वाच्यम् । कृत्रिमेन यूना साहचर्य्यस्यैव चात्र प्रमाणत्वादित्यत एवाह सूले—**गोत्रं शिष्यत इति** । गोत्रयुवप्रत्ययमात्रेति । अत्र प्रत्ययपदस्य प्रतीति-परत्वाद्गोत्रयुवत्वप्रतीतिमात्रेत्यर्थः । तेन गर्गाश्च गार्ग्यायणाश्च गर्गा इत्यस्य सिद्धिः । एवशब्दार्थो मात्रं, तेन प्रत्ययार्थकृत्स्नादेः प्रकृत्यर्थस्य च प्रतीतेर्व्यवच्छेदादाह—कृत्स्नमि-ति । एतदेव विकारलभ्यन्तत्कृत एव विशेषश्चेन्नतु तत्कृतारिक्त इत्यर्थः । सूत्रे तल्ल-क्षणः किमित्यस्य तल्लक्षण एव किमित्यर्थः । प्रत्युदाहरति—**भागवित्तिभागवित्ति-काविति** । भागवित्तस्य गोत्राऽपत्यं भागवित्तिः । अस्मादपत्येऽर्थे इञ् यूनि अर्थे 'वृद्धा-ट्ठक् सौवीरेषु बहुलमि'ति कुत्साया ठकि, तस्य कादेशे द्वितीयस्य सिद्धिः अत्र कुत्सासौ-वीरत्वयोरधिकयोरपेक्षणाद्युवत्वमात्रकृतवैरूप्याऽभावाच्चैकशेष इति बोध्यम् । **कृत्स्नं किं-मिति** । एवकारेण प्रकृत्यर्थस्यापि व्यावृत्तिः किमर्थेति प्रश्नः । उत्तरयति—**गर्गवात्स्या-यनाविति** । अत्र प्रकृत्यंशे वैरूप्यं न गोत्रादिकृतमिति नैकशेषः । तल्लक्षणविशेष इत्येव सामर्थ्यात्तल्लक्षण एवेति लाभे स्पष्टार्थमेवकारग्रहणमिति बोध्यम् ॥

नपुंसकमनपुंसकेनैकवच्चेति । नन्वानन्तर्य्यार्थकचशब्दबलाच्च सूत्रघटकस्या-ऽन्यतरस्यामित्यस्यैकवच्चेत्यनेनैव सम्बन्धो नत्वेकशेषेणेत्यत आह—**तच्चैकवद्धेति** । **अन-पुंसकेनेति किमिति** । एतद्ग्रहणाभावे नपुंसकेनापि द्वन्द्वे एकशेषापत्तिः । शुक्लञ्च, शुक्लञ्च, शुक्ले इति । ननु 'नपुंसकमनपुंसकेनैकवच्चास्याऽन्यतरस्यामि'त्येवं सूत्र-करणेऽपि यत्राऽनेनैकशेषस्तत्रैकवद्भावो भविष्यतीति प्रकृतसूत्रेऽस्य ग्रहणं व्यर्थमिति चेन्न । अनपुंसकेन सहोक्तौ नपुंसकस्यैकशेषस्तस्यैवैकवद्भाव इति बोधनार्थन्तस्याऽऽव-श्यकत्वेन सार्थक्यात् । तेन नाऽन्यसूत्राणां समाहारद्वन्द्वविषये प्रवृत्तिरिति बोध्यम् । ननु 'सरूपाणामि'ति सूत्रस्य तर्हि समाहारविवक्षायामप्राप्त्याऽपवादाऽभावाद्घट-घटमिति समाहारविवक्षायान्द्वन्द्वः प्राप्नोतीति चेन्न । अनभिधानाद्घटघटमिति द्वन्द्वा-ऽप्राप्तेः । एकशेषविषये घटघटमिति द्वन्द्वव्यावृत्त्यर्थमनभिधानस्याऽऽवश्यकत्वाद्द्वन्द्व-मात्रस्यैकशेषविषयेऽनभिधानमाश्रित्यैकशब्दस्याऽनेकार्थत्वाच्चाश्रित्य प्रत्याख्यातमेकशेष-प्रकरणम्भाष्ये । एकशब्दस्यानेकार्थत्वाऽभावे एकशेषाऽऽरम्भेऽपि गार्ग्यावित्यतो गार्ग्या-यणस्य बोधो न स्यात्तस्य तदर्थकत्वाऽभावात् । शुक्लञ्च शुक्ला च शुक्लश्चेति विग्रहे शु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ह्णानीत्येतत्सूत्रोदाहरणम्। तत्रविग्रहवाक्ये पटपदोपादानं शुक्लादिपदानां गुणे पुंस्त्वादृगुणिपरत्वबोधनायेत्यलम्॥

श्वशुरः श्वश्र्वा। ननु पितृशब्देन मातापित्रोः श्वसुरशब्देन श्वश्रूश्वशुरयोर्लक्षणया बोधसम्भवादिदं पिता मात्रेति च सूत्रद्वयं व्यर्थम्। नच यथा सरूपाणामित्यादिसूत्रसमूहस्य द्वन्द्वव्यावृत्यर्थमावश्यकत्वं तथैतत्सूत्रद्वयमपि द्वन्द्वनिवृत्यर्थमावश्यकमिति वाच्यम्। पक्षे द्वन्द्वस्यापीष्टापत्तेः। एवञ्च तदवस्थैवोक्तसूत्रद्वयस्य वैयर्थ्यशंकेति चेन्न। पितृश्वशुरशब्दयोरिव मातृश्वश्रूशब्दयोः केवलयोर्द्वन्द्वविषये प्रयोगव्यावृत्तये सूत्रद्वयस्यावश्यकत्वात्। नच द्वन्द्वविषये तादृशप्रयोगस्याऽनभिधानादेव वारणसम्भवादनारम्भणीयमेव सूत्रद्वयमिति वाच्यम्। अनभिधानाऽऽश्रयणेन प्रत्याख्यानस्याऽनौचित्यादिति भावः॥

त्यदादीनि सर्वैर्नित्यम्। अत्र सूत्रे द्विपर्यन्तानामिति नियमो न प्रवर्त्तते; अहञ्च भवांश्च आवामिति भाष्योदाहरणात्। उक्तनियमप्रवृत्तौ तु अस्मच्छब्दस्य द्विपर्यन्तानामित्येतन्मध्येऽसत्वात्तस्यैकशेषानापत्त्या भाष्योदाहरणाऽसङ्गतिरिति भावः।

इत्येकशेषसमासः॥

अथ सर्वसमासशेषप्रकरणम्।

वृत्तिनिरूपणप्रस्तावादाह—कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तय इति। परार्थाऽभिधानं वृत्तिरिति। परशब्देन परपदार्थो गृह्यते। अर्थशब्देन स्वस्यार्थो गृह्यते, परेण पदार्थेन युक्तो यः स्वस्याऽर्थः स परार्थस्तस्य योऽभिधाजन्योपस्थितिस्तत्करणत्वमिति तदर्थः। इतरपदार्थान्वितस्वार्थविषयकाऽभिधाजन्योपस्थितिजनकत्वमिति फलितोऽर्थः।

यद्वा परेण प्रधानशब्देन शब्दान्तरार्थस्याऽभिधानं विशेषणत्वेन ग्रहणं तत्करणमित्यर्थः। यत्रत्यप्रधानपदेनेतरविशेषणकस्वार्थस्यैवोपस्थितिस्तत्करणमिति यावत्।

यद्वा परेणऽप्रधानशब्देनाऽन्यशब्दार्थस्य विशेष्यत्वेन ग्रहणमित्यर्थः। वृत्तिरिति शेषः। साचाऽवयवशक्तिसहकृतसमुदायशक्तिसाध्या अवयवशक्तिर्लोकसिद्धा। शास्त्रकल्पिता च समुदायशक्तिरिति। तद्धितादिप्रत्यये समुदायस्य वृत्याश्रयत्वादेषामौपचारिको वृत्तित्वव्यवहारः प्राचाम्। सा च वृत्तिः समर्थःपदविधिरिति परिभाषा लभ्या, तत्र समासतद्धितयोः पदोद्देश्यकविधित्वस्य स्पष्टत्वान्मानान्तरसिद्धैकार्थीभावस्य सत्त्वाच स्पष्टैव परिभाषाप्रवृत्तिः। उपपदनिमित्तकानां कृतामपि स्पष्टमेव पदविधित्वम्। तत्साहचर्य्येणाऽन्यत्रापि पदविधित्वं बोध्यम्। अत एव पाचकादीनां क्रियाकारकभावसम्बन्धप्रवृत्तिनिमित्तकत्वमूलकः क्रियाशब्दत्वव्यवहारः। एकशेषेऽपि द्वन्द्वस्याऽनुवर्त्तनादेतद्विषये एकशेषविधानादेकार्थीभावस्याऽऽवश्यकत्वम्।

वस्तुतस्तु—परार्थाऽन्वितस्वार्थोपस्थापकत्वाऽभावादेकशेषस्य वृत्तित्वे मानाऽभावः। शिष्टपदेन स्ववृत्त्यैव तत्तत्समूहार्थोपस्थानस्य भाष्ये स्पष्टप्रतिपादनात्। एकशेषस्य वृत्तित्वाऽभावादेव 'समर्थः पदविधिरि' त्यस्याऽधिकारत्वपक्षे नोक्त एकशेषसङ्ग्रहो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भाष्ये इत्यवसेयम् । सनादिषु क्यजादेः सुबन्ताद्विधानेन स्पष्टमेव पदविधित्वमिति । स्वभावत एव वृत्त्यवृत्त्योः सिद्धत्वाद्वावचनं न कार्य्यमिति तत्प्रत्याख्यानपरभाष्यप्रमाण्यात्सुलभ एवैकार्थीभावः सनीति बोध्यम् । प्रातिपदिकप्रकृतिकणिचाप्येकार्थीभावः सुघट एवेति । वाक्यमिति । तत्र तत्समासघटकपदानान्तत्तत्समासप्रवृत्तियोग्यविभक्त्यन्तानां पृथक्प्रयोगरूपमित्यर्थः । संज्ञाविषयसमासे वाक्येन संज्ञाऽनवगमेऽपि वृत्तिघटकपदज्ञापनायासमस्यमानपदार्थबोधकंवाक्यप्रयोगो भवत्येव । नित्यसमासव्यवहारस्तु तस्य वाक्यस्य वृत्तिसमानार्थत्वाऽभावाद्गौणो बोध्यः । अविग्रह इति । लौकिकविग्रहरहित इत्यर्थः । नित्याऽधिकारीयसमासे समासघटकपदानां व्यपेक्षाया अभावेन लौकिकवाक्याऽभावात् । एवञ्च विग्रहप्रदर्शनफलम्बोध्यम् । अस्वपदेति । समस्यमानयाचत्पदाघटित इत्यर्थः । समासविभाजकोपाधिगणनाया आवश्यकत्वादाह—सुपां सुपा तिङा नाम्नेत्यादि । अथ तिङामित्यतः प्राक्सर्वत्र तिङामित्यस्य सम्बन्धः । अत्र सुपां तिङेत्यनेनैव तिङा सुबन्तेनेत्यस्य लाभात्समासस्य पञ्चविधत्वमेव युक्तम् । उभयत्रापि सुप्सिङ्घटितत्वस्याऽविशिष्टत्वादित्यलम् ।

इति सर्वसमासशेषः ॥

अथ समासान्तप्रकरणम् ।

ऋक्पूरब्धूरिति—अ अनक्षे इतिच्छेदः, अ इति लुप्तविभक्तिकसौत्रो निर्देश इति भावः ॥

ननु सुष्ठु आपो यस्मिन्निति विग्रहे अप्शब्दान्ततवेन 'ऋक्पूरब्धूरि' त्यनेन समासान्तोऽप्रत्ययः स्यादिति चेन्न 'न पूजनादि, ति तन्निषेधात् । तथा च 'द्व्यन्तरुपसर्गेभ्योऽप ईदि'ति नेत्वापत्तिरित्याशयेनाह—**कृतसमासान्तग्रहणान्नेह सुविति** ॥

कृष्णोदक्पाण्डु' संख्यापूर्वाया भूमेरजिष्यते । 'संख्याया नदीगोदावरीभ्यां चे'ति वार्तिकद्वयन्नाऽपूर्वं किन्तु 'अच् प्रत्यन्ववपूर्वात्सामलोम्नः' इत्यत्राऽजितियोगविभागात् सिद्धमेव, एवञ्च योगविभागेनैवं सिद्धत्वाद्वार्तिकद्वयं नारम्भणीयमिति केचित् । केचिच्च भाष्ये योगविभागस्यादर्शनादुक्तवार्त्तिकद्वयोदाहरणानां पृषोदरादित्वात्सिद्धिरित्याहुः ।

इति समासान्ताः ।

अथाऽलुक्समासप्रकरणम् ।

अलुगुत्तरपदे—पदे इत्येव सिद्धे उत्तरग्रहणसामर्थ्यादुत्तरपदशब्दस्य समासचरमावयवे रूढत्वम् । तथा च समासचरमावयवे परे पञ्चम्यादीनामलुगिति तत्तत्सूत्राणामर्थः । 'पञ्चम्याः स्तोकादिभ्यः' इत्यादेरारम्भान्नायं विधिः किन्त्वधिकार एवेत्याह—**अलुगधिकारः प्रागानङः, उत्तरपदाधिकारस्त्वाऽऽपादपरिसमाप्तेरिति** ।

पूरण इति वक्तव्यम् । पूरणप्रत्ययान्ते उत्तरपदे आत्मञ्छब्दप्रकृतिकतृतीयाया अलुगिति तदर्थः । ननु उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणमित्यस्य 'हृदयस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हृल्लेखे'त्यत्र लेखग्रहणज्ञापितस्य सत्त्वात्तदन्तविध्यभावात्पूरणप्रत्ययान्त इत्यर्थो न स्यादिति चेन्न । आत्मन्शब्दात्पूरणे प्रत्ययासम्भवेन तदन्तग्रहणस्याऽऽवश्यकत्वादुक्तार्थस्य सुलभत्वात् । एतदुदाहरणे हेताविति प्रकृत्यादिभ्य इति तृतीया, सुप्सुपेति समासः ॥

ननु प्रकृतिविकृतिभावस्य विरहेण रन्धनाय स्थाली इत्यत्रेव, 'आत्मनेपदम्' 'आत्मनेभाषे'त्यत्र समासो न स्यादित्यत आह—चतुर्थीतियोगविभागात्समास इति । अलुग्विधानसामर्थ्यादपीह समासः क्वचित् इत्यपि बोध्यम् ॥

गवियुधिस्थिरः—ष्ठा धातोः 'अजिरशिशिर' इत्यौणादिकसूत्रेण किरचि स्थिरशब्दो निष्पन्नः । अत्र सात्पदाद्योरित्यनेन निषेधे प्राप्ते एतदारम्भः, अनेन षत्वे गविष्ठिरो युधिष्ठिर इति सिध्यति । ननु लुकं बाधित्वादन्तरङ्गत्वाच्चाऽऽदेशे 'हलदन्तात्सप्तम्याः संज्ञायामि' त्यनेनैवाऽलुक् सिद्ध्यतीति किमर्थं सूत्रमिदमिति चेन्न । (अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते) इति न्यायेनाऽवादेशात्पूर्वं लुक्प्राप्त्या हलदन्तादित्यस्याऽप्राप्त्याऽस्यावश्यकत्वादित्याशयेनाह—अत्र गवीति वचनादेवाऽलुगिति ॥

इत्यलुक्समासः ।

अथ समासाश्रयविधिप्रकरणम् ।

घरूपकल्पचेलड्ब्रुवगोत्रेति—घरूपकल्पप्रत्ययेषु परेषु चेलडादिषु चोत्तरपदेषु भाषितपुंस्काद्विहितस्य ङ्यन्तस्याऽनेकाचो ह्रस्व इत्यर्थः । ननु घादीनां प्रत्ययत्वात्प्रत्ययग्रहणपरिभाषया तदन्तविधिर्दुर्वार इति चेन्न । लेखग्रहणेनोत्तरपदाधिकारे क्वचित्प्रत्ययग्रहणे तदन्तविध्यभावज्ञापनात् । इत्थंहि ज्ञापनप्रकारः—यदि प्रत्ययग्रहणे तदन्तग्रहणं स्यात्तदाऽणः प्रत्ययत्वात्ततस्तदन्तविधावणन्तरूपोत्तरपदे हृदादेश इत्यर्थे लेखशब्देऽप्यादेशस्य सौलभ्येन लेखग्रहणस्य वैयर्थ्यं स्पष्टमेव । न च घञन्तलेखशब्दस्य प्रयोगघटकत्वं यत्र तत्राऽप्यादेशार्थं लेखग्रहणस्याऽऽवश्यकतया कथं तद्वैयर्थ्योद्भावनमिति वाच्यम्, लेखग्रहणस्योक्तार्थज्ञापकत्ववर्णनपरभाष्यप्रामाण्याद् घञन्तलेखशब्दोत्तरपदकपूर्वपदस्य प्रयोगस्याऽनभिधानादिति भावः ॥

हृदयस्य हृल्लेखेति—अत्र सूत्रेऽणन्तस्यैव लेखशब्दस्य ग्रहणं ननु घञन्तस्य, अण्प्रत्ययसाहचर्यात्, अत एव घञन्तरूपोत्तरपदे हृदयलेख इत्येव रूपं नत्वस्मिन् हृदादेशः। नन्वणन्तलेखशब्दग्रहणेऽण्ग्रहणेनैव सिद्धे लेखग्रहणं व्यर्थमिति चेन्न । उत्तरपदाधिकारे तदन्तविधिर्नास्तीति ज्ञापनेन तस्य सार्थक्यात् । ज्ञापनप्रकारश्च प्रागेवोक्त इति भावः ॥

इको ह्रस्वोऽङ्यो गालवस्य—ननु सूत्रे गालवग्रहणं विकल्पेन ह्रस्वविधानार्थमेव तिष्ठति तच्चेत्पूर्वसूत्रात् 'एकहलादौ पूरयितव्येऽन्यतरस्यामि'त्यस्मादन्यतरस्यामित्यनुवृत्त्यैव सिद्धमिति निष्फलमेव तद्ग्रहणमित्यत आह—गालवग्रहणं पूजार्थमिति ।

सम्प्रसारणस्य—उत्तरपदे सम्प्रसारणस्य दीर्घ इत्यर्थः । ननु कौमुदगन्धीपुत्र इत्यत्र 'इको ह्रस्वोऽङ्यो गालवस्ये' ति ह्रस्वो दुर्वारः । नच कृते ह्रस्वे दीर्घविधानं व्यर्थं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्यादिति वाच्यम् । तस्य ह्रस्वस्य वैकल्पिकत्वेन पक्षे सावकाशत्वात् । एवञ्च ह्रस्वापत्तिस्तदवस्थैवेत्यत आह—**व्यवस्थितविभाषया ह्रस्वो नेति** । इति प्राञ्चः ।

शेखरकृतस्तु—ग्रामणिकुलमित्यत्र ह्रस्वस्याऽवकाशः, ह्रस्वस्य वैकल्पिकत्वादेतदभावे कौमुदगन्धीपुत्र इत्यत्र सम्प्रसारणस्य सावकाशस्ततो ह्रस्वप्रसङ्गे उभयप्राप्तौ परत्वात्सम्प्रसारणदीर्घत्वमेवेति भाष्ये स्पष्टमित्याहुः ।

ननु ष्यङः प्रत्ययत्वेन प्रत्ययग्रहणपरिभाषया तदादिपदोपस्थितौ पूर्वपदरूपविशेष्यान्तरसद्भावात्तदादिविशेष्यकतदन्तविध्यभावे पूर्वपदविशेष्यकतदन्तविधौ तदादेर्भेदसम्बन्धेन तदन्तेऽन्वये तदाद्यभिन्नं यत्ष्यङन्तं पूर्वपदं तस्य सम्प्रसारणमिति सम्प्रसारणविधाकस्य ष्यङः सम्प्रसारणं पुत्रपत्योरित्यस्याऽर्थे परमकारीषगन्ध्येत्यस्य ष्यङन्तपूर्वपदत्वस्य सत्त्वेऽपि यस्मात् ष्यङ् विहितस्तदादित्वाऽभावात्सम्प्रसारणं न स्यादित्यत आह—**स्त्रीप्रत्यये चानुपसर्जने नेति** । कोऽअर्थस्तावदस्याः परिभाषाया इति पूर्वपक्षे प्रक्रान्तेऽत्र श्रीमद्गुरवः । लक्ष्येऽनुपसर्जनस्त्रीप्रत्ययस्य सद्भावेऽपि तत्र तदादेरप्रसङ्गेन उत्सर्गापवादयोः समानदेशत्वभङ्गेन च अनुपसर्जने स्त्रीप्रत्यये न तदादिविधिरिति न तावदेतदर्थः । सम्प्रसारणविधायकशास्त्रघटकष्यङ्पदस्याऽनुपसर्जनपरमकारीषगन्ध्याघटकष्यङ्बोधकत्वात्तदादिनियमाऽभावे ष्यङन्तपूर्वपदस्य सम्प्रसारणमित्यर्थेऽतिकारीषगन्ध्या पुत्र इत्यत्राऽपि सम्प्रसारणस्य दुर्वारत्वेन, उक्तसूत्रघटकस्य ष्यङ्पदस्योपसर्जनस्याऽपि बोधकत्वान्निषेधाऽप्रवृत्त्या तदादिनियमेन परमकारीषगन्धीपुत्र इत्यत्राऽपि सम्प्रसारणाऽप्रसङ्गेन च, प्रत्ययग्रहणपरिभाषाऽपवादत्वादत्राऽपि ग्रहणपदसम्बन्धेनाऽनुपसर्जनस्त्रीप्रत्ययबोधके तत्पदघटितशास्त्रे तदादिविधिर्नेत्यर्थोऽपि नेति चेदुच्यते—ष्यङः सम्प्रसारणमिति सूत्रे ष्यङ्पदे आवृत्तिः, एकं ष्यङ्पदमनुपसर्जनबोधकमपरमुपसर्जनबोधकम् । तत्राऽनुपसर्जनबोधके तदादिनियमोऽनया वार्यते, ततश्चाऽनुपसर्जनष्यङन्तपूर्वपदस्य ह्रस्व इत्यर्थे परमकारीषगन्धीपुत्र इत्यत्र भवति सम्प्रसारणम् । उपसर्जनष्यङन्ततात्पर्यके ष्यङ्पदे तदादिनियमादुपसर्जनष्यङन्ततदादिपूर्वपदस्य ह्रस्व इत्यर्थेऽतिकारीषगन्ध्या पुत्र इत्यत्र पूर्वपदस्य तदादित्वाऽभावादुपसर्जनवाक्यस्य ष्यङ उपसर्जनत्वादनुपसर्जनवाक्यस्याऽप्रसङ्गाच्च नाऽतिप्रसङ्ग इत्याहुरित्यलम् ॥

समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु—उत्तरपदे समानस्य स आदेशः छन्दसि मूर्धादिरूपोत्तरपदे परे नाऽसाविति तदर्थः । ननु उत्तरपदशब्दस्य समासचरमावयवे रूढत्वात्पक्षादिशब्दानां समासचरमाऽवयवत्वाऽभावेन तद्रूपोत्तरपदे चादेशाऽप्राप्त्या सपक्षः साधर्म्यमित्यादि न स्यादित्यत आह—**समानस्येतियोगो विभज्यते इति** । अत्र योगविभागो भाष्ये नोपलभ्यत इत्यरुचेराह—**अथवा सहशब्दः सदृशवचनोऽप्यस्तीति** । तथा च सहशब्देन समासे 'वोपसर्जनस्ये'ति सादेश इति भावः ।

ननु 'पुरगामिश्रकासिध्रके'ति दीर्घनिर्देशेनाऽसंज्ञायां दीर्घाऽभावात्संज्ञायामेव णत्वमित्यस्य फलितत्वात् 'पूर्वपदात्संज्ञायामि'त्यनेनैव णत्वसिद्धौ पुनः कृतदीर्घस्य पुरगादिपञ्चकस्य णत्वार्थनिर्देशो व्यर्थं इत्यत आह—**तेषां कृतदीर्घाणां णत्वविधौ निर्देशो नियमार्थं इति** । तथाचायं नियमः—कृतदीर्घेभ्यः पुरगादिभ्य एव परस्य वनशब्दघट-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कनकारस्य णत्वं नाऽन्येभ्य इति, नचैभ्यो वनस्यैव णत्वं नाऽन्यस्येति विपरीतनियमः कुतो नेति वाच्यम् । वनाऽतिरिक्तोत्तरपदे पुरगादीनां दीर्घान्तत्वाऽसम्भवेन विपरीतनियमाऽप्राप्तेरिति भावः ।

ननु अग्रेशब्दस्याऽसंज्ञात्वात् 'पूर्वपदात्संज्ञायामग' इत्यस्याप्राप्त्या णत्वार्थमस्य ग्रहणमावश्यकमेवेत्यत आह—**अग्रेशब्दस्य तु विध्यर्थं इति** । निर्देश इति शेषः । नच गकारव्यवधानेन 'पूर्वपदात्संज्ञाया'मित्यस्याऽप्राप्त्या पुरगाशब्दग्रहणस्याऽपि विध्यर्थत्वसम्भवात्तस्य नियमार्थत्वोक्तिर्न युक्तेति वाच्यम् । अग इत्यस्य पञ्चम्यन्तत्वाऽभ्युपगमेन गान्तात्पूर्वपदात्परस्य नस्य णत्वं नेति व्याख्यानेन पुरगाशब्दस्याऽकारान्तत्वेनाऽग इति निषेधाऽप्राप्त्या पूर्वसूत्रेणैव सिद्धत्वसम्भवान्नियमार्थत्वोक्तेर्युक्तत्वात् । अत एव अग इत्यस्य ऋगयनमित्येकमेवोदाहरणं दत्तमित्यलम् ॥

ननु वनस्याऽग्रे इति विग्रहेऽग्रेवणशब्दस्याऽधिकरणशक्तिप्रधानत्वात्प्रथमा न स्यादिति चेन्न । 'अभितः सोर्थोऽऽन्तर्भूतः प्रातिपदिकार्थः सम्पन्न' इति भाष्येण प्रथमोपपत्तेरित्याशयेनाह—**प्रातिपदिकार्थमात्रे प्रथमेति** ।

ननु पानशब्दस्य क्रियावाचकत्वात्क्षीरशब्देन तस्य समानाऽधिकरणत्वाऽभावेन क्षीरं पानं येषामित्युपपन्नमित्यत आह—**कर्मणि ल्युडिति** । 'कृत्यल्युटो बहुलमि'त्यत्र बहुलग्रहणादिति भावः । पीयते इति पानमिति विग्रहः । कर्मणि ल्युटा निष्पन्नस्य पानशब्दस्य द्रव्यवाचित्वेन क्षीरशब्देन सामानाऽधिकरण्यान्नानुपपत्तिरिति ।

ननु मापान्वपतस्तच्छीलौ पुरुषौ मापवापिणावित्यादौ (उत्तरपदत्वे चापदादिविधौ प्रतिषेधः) इति निषेधस्य जागरूकत्वाद्वापिन्नित्यस्योत्तरपदरूपप्रातिपदिकत्वाऽभावेन पूर्वपदेनोत्तरपदस्याक्षेपात्पूर्वपदस्थनिमित्तात्परस्योत्तरपदरूपप्रातिपदिकान्तस्थनकारस्य णत्वमिति, णत्वविधायकस्य 'प्रातिपदिकान्तनुम्विभक्तिषु चे'त्यस्याऽर्थे णत्वं न स्यादिति चेन्न । उत्तरपदशब्दस्य समासचरमाऽवयवे रूढत्वेन वापिन्नित्यस्य समासचरमाऽवयवत्वेनोत्तरपदत्वाऽक्षततया णत्वसिद्धेरिति भावः ॥

ननु पूर्वपदस्थनिमित्तात्परस्य प्रातिपदिकान्तस्थनकारस्य णत्वमित्यर्थे गर्गभगिनीत्यत्रण त्वं दुर्वारम्; नकारस्य भगिन्निति प्रातिपदिकान्तस्थत्वादित्याशङ्क्य समाधानवार्त्तिकमवतारयति—**उत्तरपदं यत्प्रातिपदिकं तदन्तस्यैव णत्वमिति** । उत्तरपदरूपप्रातिपदिकान्तनकारस्यैव णत्वम्भवतीत्यर्थः । तथा चोत्तरपदशब्दस्य समासचरमाऽवयवे रूढत्वेनेहोत्तरपदं भगिनीशब्दो न तु भगिन्निति तस्य प्रातिपदिकत्वेऽप्युत्तरपदत्वाऽभावान्न णत्वाऽऽपत्तिरिति भाव इत्येतदभिप्रायेणैव मूले गर्गाणां भगिनीति विग्रहो दर्शित इति । उक्तवार्त्तिके ज्ञापकं घटयति—**अत एव नुम्ग्रहणं कृतमिति** । पूर्वपदाक्षिप्तोत्तरपदेन प्रातिपदिकस्य विशेषणादेवेति हेत्वर्थः । अन्यथाऽङ्गस्य नुम्विधानादस्याङ्गस्यैव भागत्वादुत्तरपदस्य तत्त्वाऽभावान्नुम उदाहरणे व्रीहिवापाणीत्यादौ प्रातिपदिकान्तेत्येव णत्वोपपत्तौ प्रयोजनाऽन्यथोपपत्त्या नुम्ग्रहणं व्यर्थं सज्ज्ञापयति पूर्वोक्तवार्त्तिकमिति । वक्ष्यमाणप्रयोजनार्थंनुम्ग्रहणस्यावश्यकत्वेन ज्ञापकत्वेन ज्ञापकत्वाऽसम्भवात्तद्विघटयति—**किञ्चेति** । प्रहिण्वन्नित्यादौ हिवेर्नुमो णत्वार्थमपीति । एवाऽर्थकोऽत्राऽपिः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

[णत्वार्थमेवेत्यर्थः। अयम्भावः—नुम उदाहरणे व्रीहिवापाणीत्यादावङ्गस्य नुम्विधानात्त-स्याङ्गभागत्वेन |प्रातिपदिकान्तेतिणत्वप्राप्तिसम्भवः, प्रहिण्वन्नित्यत्रत्यप्रहिणु इत्य-स्याऽप्रातिपदिकत्वेन तेन तदप्राप्त्या तदर्थं नुम्ग्रहणं कर्त्तव्यमेवेति ॥

पदव्यवायेऽपि। माषकुम्भवापेन। चतुरङ्गयोगेनेति। ननु माषकुम्भस्य वापः, चत्वार्यङ्गानि यस्य तेन योग इति विग्रहे उत्तरपदत्वे चाऽपदादिविधाविति प्रत्ययलक्षण-निषेधात्कुम्भाऽङ्गयोः|पदत्वस्य [दुर्लभत्वेन पदव्यवायेऽपीति निषेधाऽप्रवृत्त्या णत्वापत्ति-[र्दुर्वारेति चेन्न। प्रत्यासत्त्या उत्तरपदस्य कार्यित्व एवोक्तनिषेधवार्त्तिकप्रवृत्तेः। अपदा-दिविधाविति पर्युदासेन पदान्तविधावेव तत्प्रवृत्तेश्च। नन्वेवमपि माषकुम्भस्येत्यादेर्वापा-दिनिरूपितकारकत्वाद्गतिकारकोपपदानामित्यनेन वापादिभ्यः सुबुत्पत्तेः प्राक् समासे [तेषां पदत्वं [दुर्लभमितिसप्तमीसमासेन व्याख्याने णत्वनिषेधाऽसिद्धिरिति वाच्यम्; तस्या अनित्यत्वेनात्र सुबुत्पत्त्यनन्तरमेव समासेनादोषात्।

यत्तु 'कुमति चे'ति सूत्रे भाष्ये माषकुम्भवापेनेत्यत्र षष्ठीतत्पुरुषोत्तरपदकषष्ठीतत्पुरुषे 'कुमति चे'त्यनेन नित्यणत्वेन भवितव्यम्। षष्ठीतत्पुरुषे प्रातिपदिकान्तेति विभाषयेत्युक्तं तत् णत्वप्राप्तिनिरूपणमिति बोध्यम्।

यत्तूक्तसूत्रस्थभाष्यादयं पदव्यवायेऽपीति निषेधः 'उपसर्गादसमासेऽपा'त्यादेरेव तेन [प्रावनद्धमित्याद्येवास्योदाहरणमिति तन्न, पदव्यवायेऽपीत्येतच्छेषभूतस्य (अतद्धित) इति वार्त्तिकस्याऽऽर्द्रगोमयेणेत्यादिभाष्योक्तोदाहरणाऽसङ्गत्यापत्तेरित्यलम्।

विष्किरः शकुनौ वा। वृत्तिकारमते विष्किरः शकुनौ विकिरोवेति सूत्रपाठ इति स्वमतेनाशङ्कते—वावचनेनैव सुड्विकल्पे सिद्ध इति। तस्याऽपीति। विकिरशा-ब्दस्याऽपीत्यर्थः। भाष्यविरोधादिति। इत्थं हि भाष्यम्—'विष्किरः शकुनौ' विकि-रो वेति वक्तव्यम्, न वक्तव्यम्, शकुनिवाच्ये वैकल्पिकः|सुट् तदतिरिक्ते नित्यम्, तत्तर्हिव-क्तव्यम्, न वक्तव्यम्, न वावचनेन शकुनिरभिसम्बध्यते किन्तर्हि निपातनमभिसम्बध्यते शकुनिवाच्ये विष्किर इति वा निपातः, एतद्भाष्येण वृत्तिकारमताऽभिप्रेतसूत्रपाठस्य तच्छङ्कासमाधानयोश्च स्पष्ट एव विरोध इति भावः॥

इति समासाश्रयविधिप्रकरणम्।

अथ तद्धितप्रकरणम्।

अवसरसङ्गत्या तद्धितप्रकरणमारभते—समर्थानां प्रथमाद्वा। अत्र सूत्रे पदत्रयम्। प्रत्येकं पदानां स्वरितत्वात्प्राग् दिश इत्येतदवधि यावदधिकारः। पदत्रये स्वरितत्वप्र-तिज्ञाप्रयोजनं तु कस्मिंश्चिन्निवर्त्तमानेऽपि अपरस्य निवृत्त्यभावः। यथा प्राग्दिश इत्यत्र समर्थानां प्रथमादित्यनयोर्निवृत्तिः, वेत्यस्याऽनुवृत्तिः। ननु समर्थानामिति व्यर्थम्, समर्थः पदविधिरित्यनेनैव गतार्थत्वात्। नच पदविधित्वाऽभावान्न तेन गतार्थतेति वाच्यम्। 'घकालतनेषु'इ'त्यलुग्विधानसामर्थ्यात्सुबन्तात्तद्धितोत्पत्तेः सिद्धान्तितत्वात्तस्य पदविधि-त्वस्य सुलभत्वादित्यत आह—सामर्थ्यमिति। समर्थशब्दः शक्तपर्यायः; शक्तत्वञ्च—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अर्थप्रतिपादकत्वम्। तच्च परिनिष्ठितस्यैव सम्भवतीत्यत आह—कृतसन्धिकार्यमिति। नहि 'सु उत्थित' इत्यस्य कल्पनयाऽप्यर्थवत्त्वम्। सूत्रे समर्थानामिति निर्धारणे षष्ठी समर्थानाम्मध्ये प्रथमादित्यर्थः। प्रथमत्वञ्च तत्तत्सूत्रेषु प्रथमोच्चारितशब्दप्रतिपाद्यत्वमेव। एवञ्चानेकसमर्थसम्भव एवाऽस्य सम्बन्ध इति॥

तस्यापत्यम्। तस्येति न स्वरूपग्रहणं किन्तु षष्ठ्यन्तमात्रोपलक्षणमित्यत आह—षष्ठ्यन्तादिति। पञ्चम्यर्थस्याऽध्याहारः। अथवा अनुकरणात्पञ्चम्याः सौत्रो लुगिति बोध्यम्॥

ननु उपगु अ इति स्थितौ गुणादेशस्य पितृव्यादौ साऽवकाशत्वात् 'ओर्गुणः' इत्येतं बाधित्वा परत्वात् 'अचो ञ्णिति' इति वृद्धिप्रसङ्गः। गुणे च कृतेऽवादेशे च 'अत उपधायाः' इति वृद्धिप्रसङ्गश्च स्यादित्यत आह—आदिवृद्धिरन्त्योपधावृद्धी बाधत इति। 'तद्धितेष्वचामादेः' इदं सूत्रमुक्तसूत्राभ्यां परमिति परत्वात्तयोरनेन बाधः। अन्त्योपधावृद्ध्योः, गौः, पाचकः, इत्यादाववकाशः। आदिवृद्धेस्तु सौश्रुतः इत्यादाववकाशः। औपगवः; त्वाष्ट्रो जागत इत्यादावुभयप्राप्तौ परत्वादादिवृद्धिरेवेति भावः। नचादिवृद्ध्या परत्वादन्त्योपधावृद्ध्योर्बाधेऽपि (पुनः प्रसङ्गविज्ञानात्सिद्धम्) इति न्यायेन पुनः कुतो न ते इति वाच्यम्। अत्र लक्ष्याऽनुरोधात् (सकृद्गतो विप्रतिषेधेन यद्बाधितं तद्बाधितमेवे)त्यस्यैवाऽऽश्रयणात्। अनुशतिकादिगणे पुष्करसच्छब्दपाठस्योक्तार्थे ज्ञापकत्वं बोध्यम्। तथाहि—पुष्करसच्छब्दात्पौष्करसादिरित्यस्य सिद्ध्यर्थमनुशतिकादिपूक्तशब्दपाठः। आद्युपधावृद्धिभ्यामुक्तप्रयोगसिद्धावुक्तगणे उक्तशब्दपाठो व्यर्थीभूतो ज्ञापयति, आदिवृद्धिरिति। तथा च, आदिवृद्ध्योपधावृद्धेर्बाधादुक्तप्रयोगाऽसिद्ध्या तदर्थमुक्तगणे तत्पाठस्याऽऽवश्यकत्वेन स्वांशे चारितार्थ्यं जातम्। न च पुष्करसदा चरतीत्यर्थे ठकि पौष्करसादिक इत्येतत्प्रयोगसिद्ध्यर्थमनुशतिकादिपूक्तशब्दपाठस्याऽऽवश्यकत्वम्। न चोपधावृद्ध्यैवोक्तप्रयोगसिद्धौ तत्र पाठो व्यर्थ एवेति वाच्यम्। उपधावृद्धेर्ञ्णित्येव विधानादिति वाच्यम्। पुष्करसच्छब्दाट्ठोऽनभिधानात्। उक्तज्ञापकेन सत्यपि सम्भवे बाधनं भवतीत्यवश्यमाश्रयणीयम्भवतीति बोध्यम्। ननूक्तज्ञापनेऽपि जागत इत्यादावुपधावृद्धेर्बाधोऽस्तु, औपगव इत्यत्रादिवृद्धिप्रवृत्त्यवसरे उपधावृद्ध्यप्राप्त्या कथन्तद्बाध इति चेन्न। जागत इत्यादावुपधावृद्धिबाधस्य निर्णये जाते कुत्रचित्कालान्तरप्राप्ताया अप्युक्तवृद्धेर्बाधस्य समुचितत्वादिति भावः।

ननु इदमर्थेऽपत्यसमूहविकारादीनामन्तर्भावादपत्येऽपि 'तस्येदमि'ति सूत्रेणाऽणः सिद्धौ किमर्थं 'तस्याऽपत्यमि'ति सूत्रम्। नचास्य 'अत इञ्' इत्याद्यर्थमावश्यकमिति वाच्यम्! तस्य तदर्थकत्वेनाऽऽवश्यकत्वेऽपि तत्रैव पाठस्य युक्ततया योगविभागस्य नैरर्थक्यादित्याशङ्क्य समाधत्ते—तस्येदमित्यपत्येऽपि बाधनार्थं कृतम्भवेदिति। तस्येदमित्येतद्बाधकस्य 'वृद्धाच्छः' इति सूत्रस्य बाधनार्थं तस्याऽपत्यमिति पृथक्कृतमिति तद्भावः। ननु अपत्यचतुरर्थीपर्यन्तेभ्योऽन्योऽर्थः शेष इति स्वीकारेण तस्येदमित्येतत्सूत्रविहितस्याऽणः 'वृद्धाच्छः' इत्येतद्विहितस्य छस्य च शैषिकत्वादपत्यार्थे प्रवृत्त्यभावात्कथन्तद्बाधनार्थत्वं योगविभागस्येत्यत आह—उत्सर्गः शेष एवाऽसौ वृद्धाऽन्यस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रयोजनमिति । उक्ततत्तत्प्रकृत्यर्थान्वितापत्याद्यर्थस्यैवोक्तत्वादुपगवादेस्तन्निन्नत्वेन शेषत्वात्तत्रापवादप्रवृत्तिरस्त्येवेति । तस्यापत्यमिति योगविभागे तु उपगवपत्यत्वस्याऽनेनोक्तत्वाच्छेषत्वाऽभावेनाऽपवादस्य प्रसङ्ग एव नास्तीति अपवादाऽप्रवृत्तिरूपोऽपवादः । ननु उपगवादेरवृद्धत्वेन वृद्धाद्विहितस्य छस्य स्वत एव प्रसङ्गो नास्तीत्याशङ्कायामाह— वृद्धाऽन्यस्य प्रयोजनमिति । भान्वादिवृद्धप्रातिपदिकेभ्यः छाऽभावः प्रयोजनमिति भावः ॥

ननु अन्तरङ्गत्वात्सन्धौ कृतायामेव प्रत्ययोत्पत्तिरिति व्यर्थं समर्थानाम्प्रथमाद्वेति सूत्रस्थं समर्थग्रहणमित्याशयेनाऽऽशङ्कते—कृतसन्धेः किमिति । समाधत्ते—अकृतव्यूहपरिभाषया साबुत्थितिर्माभूदिति । अयम्भावः—तदसत्त्वे कृतसन्धिकार्यात्तद्धितप्रत्यय इत्यर्थाऽभावादुक्तपरिभाषया वृद्धौ सत्यामन्तरङ्गदीर्घस्य निमित्तविनाशसङ्गावात्पूर्वमेतदप्रवृत्त्याऽनिष्टाऽऽपत्तिरिति तदावश्यकं तस्मिन्सति कृतसन्धेस्तद्धितोत्पत्त्या सुतरामिष्टसिद्धिरिति । समर्थग्रहणेन ज्ञापितेयम्परिभाषेति हरदत्तप्रभृतयः । लोकतः सिद्धेति केचित् ॥

ननु 'तस्यापत्यमि'त्यत्र निर्दिष्टस्य पदद्वयस्य मध्ये प्राथमिकस्यैव प्रकृतिसमर्थकत्वेनाऽपत्यस्याऽतत्त्वात्प्रकृत्याकाङ्क्षायाम्प्राथमिकस्यैव ग्रहणेन प्रथमादिति व्यर्थमित्याशयेनाऽऽशङ्कते—प्रथमात्किमिति । समाधत्ते—अपत्यवाचकादिति । अयम्भावः, प्रथमादित्यस्याऽसत्त्वे यथा तस्याऽपत्यमित्यादिसूत्रविहितप्रत्ययस्य षष्ठ्यन्तादभ्युपगतिस्तथैवाऽपत्यवाचकदेवदत्तादिशब्दात्प्रत्ययः स्यादिति शङ्का स्यादिति तद्व्यावृत्त्यर्थं प्रथमादित्यावश्यकमिति । ननु यद्यपि उपगोरपत्यमिति विग्रहवाक्येऽपत्यवाचकस्य देवदत्तादेरप्राथम्यान्न ततः प्रत्ययापत्तिस्तथापि अपत्यमुपगोरिति वाक्ये तस्य प्राथम्येनोक्तापत्तिस्तदवस्थैवेति चेन्न । पूर्वसूत्रादनुवृत्तस्य समर्थादित्यस्य सामर्थ्यान्नियतत्वादत्र लक्षणाऽपेक्षस्यैव प्राथम्यस्य ग्रहणाद्विग्रहवाक्यापेक्षस्य तस्याऽनियतत्वाद्ग्रहणेनाऽदोषात् । षष्ठ्यर्थे मा भूदिति । इन्द्रो देवताऽस्य हविष इति विग्रहे ऐन्द्रं हविरिति प्रथमान्तात्प्रत्ययोत्पत्तिवत्, उपगुरपत्यमस्य देवदत्तस्येति विग्रहे औपगवो देवदत्त इति भवतु परं देवदत्तोऽपत्यमस्योपगोरिति विग्रहे दैवदत्तिरुपगुरिति माभूदित्यर्थः ।

ननु तद्धितस्याऽपवादत्वान्नित्यं समासबाधकत्वम् । न च तद्धितस्य विकल्पतया पक्षे समासस्याऽपि सम्भवाद्बाधकत्वकथनं न युक्तमिति वाच्यम् । 'पारे मध्ये षष्ठ्या वा' इत्यत्रत्यवाग्रहणज्ञापितस्य यत्रोत्सर्गापवादौ महाविभाषा विकल्पते तत्राऽऽपवादविनिर्मुक्तोत्सर्गस्याऽप्रवृत्तिरित्यस्य सत्त्वात्पक्षे समासाऽप्राप्तेरित्याह—दैवयज्ञि इति सूत्रादन्यतरस्यां ग्रहणानुवृत्तेः समासोऽपीति ॥

अपत्यं पौत्रप्रभृतिगोत्रम् । ननु पौत्रादेरपत्यत्वाऽव्यभिचारादपत्यग्रहणमन्तराऽप्यपत्यरूपपौत्रादेर्गोत्रसंज्ञा स्यादेवेति व्यर्थमपत्यग्रहणमित्यत आह—अपत्यत्वेन विवक्षितमिति । पौत्रादीनामपत्यत्वेन विवक्षायामेव गोत्रसंज्ञा स्यात्पौत्रत्वादिना विवक्षायां सा मामूदित्यर्थमपत्यग्रहणम् । तेन औपगव इत्यादावप्यणो गोत्रसंज्ञासिद्धिः । अणोऽपत्यत्वमेव शक्यतावच्छेदकन्तु पौत्रत्वादिकम् । इतरथा गोत्राऽधिकारस्थयञाद्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्थस्यैव गोत्रसंज्ञा स्यान्नत्वण इति। नचाऽपत्याऽधिकारे गोत्रयुवसंज्ञाकरणसामर्थ्यादपत्यस्य लाभात्तेनैवोक्तप्रयोजनसिद्धौ प्रयोजनाऽभावाद्व्यर्थमपत्यग्रहणमिति वाच्यम्। 'ते तद्राजाः' इत्येतत्सूत्रघटकतत्पदेन 'जनपदात् क्षत्रियादञ्' इत्येतत्सूत्रविहिताऽञादीनामेव ग्रहणेन गोत्रयुवसंज्ञाप्रकरणेन व्यवधानादञादेः पूर्वप्रत्ययानामग्रहणेनाऽपत्याधिकारपाठसामर्थ्यस्योपक्षीणतयाऽपत्यस्याऽसम्बन्धशङ्काव्यावृत्त्यर्थं पुनरपत्यग्रहणस्याऽऽवश्यकत्वादिति भावः॥

ननु 'एकस्मिन् गोत्रे' इदं सूत्रमव्यर्थम्। नच तत्राऽनेकप्रत्ययव्यावृत्त्यर्थमावश्यकं सूत्रमिति वाच्यम्। युगपदेकस्मिन् गोत्रेऽनेकप्रत्ययानामप्रसक्तेरित्याशङ्क्य सूत्रारम्भफलं प्रदर्शयति—गोत्रे स्वैकोनसंख्यानां प्रत्ययानां परम्परेति। स्वयं गोत्रन्तदपेक्षया एकोनसंख्यानां प्रत्ययानां तृतीये द्वयोः चतुर्थे त्रयाणां, पञ्चमे चतुर्णाम्परम्परा प्रसज्यत इति तदर्थः। तथा हि—उपगुशब्दात्तृतीये वाच्ये द्वयोरणिञोः प्रत्यययोरापत्तिः। तस्मादेवोक्तशब्दात्पञ्चमे वाच्ये चतुर्णामणिञ्फगिञां प्रत्ययानाम्परम्परेति। नच 'यस्येति च' इति सूत्रेणाऽणाऽदेर्लोपेनाऽविद्यमानत्वादणिञादीनाम्प्रत्ययानां परम्परेत्युक्तेः कथं सङ्गतिरिति वाच्यम्। अणन्तादिञुत्पत्तिः। इञन्तात्फक उत्पत्तिरित्युत्पत्तिमात्राऽभिप्रायेण प्रत्ययपरम्परेत्युक्तेः सुसंगतेः।

यद्वा स्वद्व्यूनसंख्येभ्योऽनिष्टोत्पत्तिः प्रसज्यते। स्वं गोत्रन्तदपेक्षया द्व्यूनसंख्येभ्यः प्रकृतिभूतेभ्यः प्रातिपदिकेभ्योऽनिष्टप्रत्ययोत्पत्तिरित्यर्थः। अत्र पक्षे उपगोस्तृतीये वाच्ये एकास्मादौपगवादिञनिष्टः प्राप्नोति चतुर्थे द्वाभ्यां, पञ्चमे त्रिभ्य इत्यादीतिभावः। अत्राऽनिष्टोत्पत्तिमात्रं न त्विष्टाऽसिद्धिरित्यर्थः। अत्र पक्षे उपगुशब्दादणेष्टसिद्धावपि औपगवादिञ्निवृत्त्यर्थं नियमार्थमिदं सूत्रम्। ननु नियमार्थकस्य सूत्रस्यारम्भेऽपि गोत्रे एकस्यैव प्रत्ययस्य करणान्नियमेनाऽबाधादनन्तराऽपत्यप्रत्ययान्ताद्गोत्रे प्रत्ययो दुर्वारः। नच गोत्रपदेन लक्षणयाऽपत्यसमुदायः सच परमप्रकृतेरेवेति वाच्यम्। अपत्यमित्यनुवृत्त्यैव सिद्धौ गोत्रग्रहणवैयर्थ्यापत्तेरिति चेन्न। गोत्रग्रहणस्य भाष्यकृता प्रत्याख्यातत्वेनोक्तप्रत्ययस्येष्टापत्तेः।

यद्वा गोत्रे बोध्ये एक एव शब्दः प्रत्ययः प्रकृतिर्नत्वनेकशब्द इत्यर्थः। यदि प्रत्ययान्तात्प्रत्ययः स्यात्तर्हि नैकशब्दः प्रत्ययप्रकृतिः स्यादिति,

यद्वा एकशब्दः प्रथमवाची प्रथमः शब्दो गोत्रे प्रत्ययमुत्पादयतीत्यर्थः। प्रथमत्वञ्च सर्वमूलत्वमित्येतत्सर्वं स्पष्टम्भाष्ये। अपत्यं पितुरेव स्यादिति—तथाच—

आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियान्त्वमी।
आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे॥ इत्यमरः।

मुख्यपक्षमाह—ततः प्राचामपीतिचेति—पित्रपेक्षया प्राचां पितामहप्रपितामहादीनामपीति तदर्थः। 'पङ्क्तिविंशति' इत्यत्र भाष्ये न पतन्त्यनेनेत्यपत्यमिति व्युत्पत्तेः प्रदर्शनाद्बाहुलात्करणे यदा निष्पन्नस्याऽपत्यशब्दस्य क्रियानिमित्तत्वन्नतु पुत्रपर्यायत्वम्। यस्य यन्निमित्तमपतनं तस्य तदपत्यमितिफलितम्। पितामहादीनामपतने पौत्रादेरपि हेतुत्वेन तेषामपत्यत्वम्भवति॥ मतभेदेन तद्वान्यै इति—प्रथमपक्षे प्रत्ययमालाव्या-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वृत्तये, द्वितीये स्वद्य नूसंख्येभ्योऽनिष्टोत्पत्तिनिवृत्तये इत्यर्थः । सूत्रमेतत्तथोत्तरमिति-स्पष्टमित्यलम् ।

नियमार्थमिदं सूत्रमिति । अयम्भावः—अनन्तराऽपत्ये मुख्यः सम्बन्धेऽप्रवृत्त्या प्रथमपक्षे तत्तत्पितृवाचकादेव प्रत्ययःस्यान्न तु मूलभूतात्, तथा च—औपगवाऽपत्येनोप-गोर्मुख्यसम्बन्धाऽसद्भावादिहाऽप्राप्त्या तदर्थं सूत्रस्याऽऽवश्यकत्वेन विध्यर्थत्वन्नियमार्थ-त्वाऽभावेनौपगवशब्दात्प्रत्ययो दुर्वार इति चेन्न । गोत्रे बोध्ये क्रमतोऽनेकप्रत्ययो दुर्वार एवाऽपत्यप्रत्यय इति सूत्रस्यार्थं औपगवशब्दस्यापत्यप्रत्ययान्तत्वे पुनस्ततोऽपत्यप्रत्य-यानुपपत्त्याऽगत्या परम्परासम्बन्धस्वीकारादुपगोरेव प्रत्ययोत्पत्त्यौपगवात्तदनुत्पत्तेरिति ।

इत्यपत्याधिकारः ॥

अथ चातुरर्थिकप्रकरणम् ।

ननु (वामदेवाड्ड्यड्ड्यावि)त्येवमस्तु सूत्रम्, वामदेवशब्दादुक्तसूत्रेणोक्तप्रत्ययविधानेन (यस्येति चे)तिलोपेनैव वामदेव्यमिति सिद्धे सूत्रे ड्यड्ड्ययोर्डित्करणम्व्यर्थमिति चेन्न । डि-त्करणाभावे 'ययतोश्चातदर्थे' इत्यत्रत्ययञ्चयासुक्तसूत्रविहितयोर्यतोर्ग्रहणापत्त्या ययतो-श्चेति सूत्रेण नञःपरस्योत्तरपदस्यान्तोदात्तत्वमित्यर्थकेनोक्तस्वरस्य वामदेव्यशब्दे दुर्वार-तया तद्व्यावृत्तिपुरस्सरमव्ययपूर्वपदस्वरार्थं डित्करणस्यावश्यकत्वात् । नच सत्यपि डित्वे कुतो नोक्तस्वरविधायकसूत्रप्रवृत्तिरिति वाच्यम् । एतड्डित्करणसामर्थ्याज्ज्ञापिताभ्यां (नि-रनुबन्धग्रहणे न साऽनुबन्धकस्य) (तदनुबन्धकग्रहणेनाऽतदनुबन्धकस्ये)ति परिभाषाभ्या-न्तदप्रवृत्तेरित्येवाह—

सिद्धे यस्येति लोपेन किमर्थं ययतौ डितौ ।
ग्रहणं मा तदर्थे भूद्वामदेव्यस्य नञ्स्वरे ।। इति ।

(पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन) इत्यत्र तव्यग्रहणेन तव्यतोऽग्रहण-मिति पूर्वपरिभाषाफलम् । अञ्ञ चञोऽग्रहणमिति द्वितीयपरिभाषायाः फलम्बोध्यम् ।

ननु वास्त्रो रथ इतिवत् छात्रो रथ इत्यपि स्यात् छत्रैः परिवृतो रथ इत्यर्थे प्रकृतसू-त्रेणाऽण्प्रत्ययविधानादित्याशङ्कां समाधत्ते—समन्ताद्वेष्टितः परिवृत उच्यते । तेनेह न । छत्रैः परिवृतो रथ इति । अयम्भावः—रथाच्छादनाय वस्त्रकम्बलादिभिरेव सम-न्तात् (सर्वं) वेष्टनसम्भवान्न तु छत्रादिभिरिति न ततोऽण्प्रत्यय इति ॥

ननु पाण्डुकम्बलशब्दान्मत्वर्थीयेनप्रत्ययविधानात्पाडुकम्बलीति सिद्धौ सूत्रमिदं व्य-र्थमिति चेन्न । सूत्राभावे पाण्डुकम्बलेन परिवृत इत्यर्थेऽण्प्रत्ययस्याऽपि दुर्वारतया तन्नि-वृत्त्यर्थं सूत्रस्यावश्यकत्वादित्याह—मत्वर्थीयेनैव सिद्धे वचनमणो निवृत्त्यर्थमिति ।

कौमाराऽपूर्ववचने । ननु निर्देशोऽयमनुपपन्नः, अपूर्ववचने कौमारो निपात्यते इत्यर्थे कौमारोत्तरविभक्तिसकारस्य रुत्वयत्वयलोपेषु कौमार अपूर्ववचने इत्यस्यैव सिद्धिः, सन्धेरप्रसक्तेरत आह—कौमार इत्यविभक्तिको निर्देश इति-तथा च सन्धौ बाधका-भावान्निर्देश उपपन्न इति भावः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु सूत्रेऽपूर्ववचन इत्यस्य भावप्रधाननिर्देशत्वादित्याह—अपूर्वत्वे निपातनमिति । स्त्रिया एवापूर्वत्वमिष्यते न पुरुषस्य, पुरुषस्तु अपूर्वभार्यो भवतु मा वेति नाग्रहः ॥

इसुसुक्तान्तात्कः । ननु इसुसुक्तात्क इत्येव सूत्रकरणेऽप्यधिकृताङ्गविशेषणत्वादेव तदन्तविधिना तान्तादित्यर्थलाभः स्यादेवेत्यन्तग्रहणं व्यर्थं सञ्ज्ञापयति प्रत्ययोपदेशकाले यस्तान्तस्तस्मात्परस्य ठस्य कादेशो यथा स्यादिति । ज्ञापनफलं तु माथितिक इत्यत्र ठस्येकादेशे यस्येति लोपे च तान्तत्वेऽपि कादेशाऽभावरूपम् । स्पष्टञ्चेदं 'ठस्येक' इति सूत्रे कैयटे । केचित्तु इकःस्थाने कादेशस्य सन्निपातपरिभाषयैव वारणसम्भवादन्तग्रहणं हेयमेवेत्याहुः ॥

ननु इसुसुगिति सूत्रे सामान्यत इसुसोर्ग्रहणे आशिष्घटकस्येसोऽपि ग्रहणात्ततः परस्यापि ठस्य कादेशापत्त्या आशिषिक इति प्रयोगो न सिद्ध्येदत आह—इसुसोः प्रतिपदोक्तयोर्ग्रहणान्नेहेति । (लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमि)ति परिभाषया प्रतिपदोक्तयोरेवेसुसोर्ग्रहणादाशिष्घटकस्येसोऽतथात्वान्नोक्तदोषावकाश इति भावः ।

मतोश्च बह्वजङ्गात्—ननु मतोर्बह्वच इत्येव सूत्रकरणेऽपि वैयधिकरण्यसम्बन्धेन बह्वचो विहितो यो मतुप् तदन्तादणित्यर्थे नैवेष्टसिद्धाविहाङ्गग्रहणं व्यर्थमित्याशङ्कां समाधत्ते-अङ्गग्रहणं बह्वजिति तद्विशेषणं यथा स्यान्मत्वन्तविशेषणं माभूदिति । सम्भवति सामानाधिकरण्ये वैयधिकरण्यमन्याय्यमित्यभियुक्तोक्त्या सत्यङ्गग्रहणेन बह्वजित्यङ्गविशेषणमेव नतु मत्वन्तविशेषणम् । असत्यङ्गग्रहणे तु मत्वन्तविशेषणमेव स्यादेवञ्च आहिमतमित्यादावणा दुर्वारत्वं स्यादिति भावः ।

ननु ढ्लोपसूत्राल्लोपपदानुवर्तनाल्लोपसिद्धाविह लुग्ग्रहणं व्यर्थमिति शङ्कां निराकरोति-लुग्ग्रहणं सर्वलोपार्थमिति ।

इति चातुरर्थिकप्रकरणम् ।

इति मैथिलवंशोद्भवस्य ठक्कुरोपनामकश्रीकनकलालशर्म्मणः कृतौ फक्किकारत्नमञ्जूषायां तद्धितप्रकरणं सम्पूर्णम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीदुर्गामाधवगणेशाः ।

फक्किकारत्नमञ्जूषा ।

उत्तरार्द्धम् ।

भव्यप्रदा निखिलभक्तजनस्य नित्यम्
देवासुर-प्रभृति-सेवितपादपद्मा ॥
संग्रामशत्रुहतिंपूरितदेवकृत्या
दुर्गाम्बिकाऽस्तु विपुलं कुशलं विधत्ताम् ॥ १ ॥

अथ तिङन्ते भ्वादिप्रकरणम् ।

ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मंगलमाचरणीयमितिशिष्टोक्त्या 'ग्रन्थमध्येऽपि मङ्गलकरणस्यावश्यकत्वाद् ग्रन्थमध्ये कृतस्य मङ्गलस्य शिष्यजनानामानुषङ्गिकमङ्गलार्थमुपनिबद्धः-(१)श्रौत्रार्हन्तीति-श्रोत्रियस्य भाव इत्यर्थे श्रोत्रियशब्दात् (हायनान्तयुवादिभ्योऽणि)ति सूत्रे (श्रोत्रियस्य यलोपश्चे)ति वार्त्तिकेन अणि यकारस्य लोपे, (यस्येति चे) त्यनेनेकारलोपे श्रौत्रमिति सिद्धयति । श्रोत्रियत्वमिति तदर्थः । अर्हतो भाव इत्यर्थे (गुणवचनब्राह्मणादिभ्यः कर्मणिचे)ति सूत्रे 'अर्हतो नुम्चे'त्युक्त्या ष्यञि नुमि च पित्वान्ङीपि (हलस्तद्धितस्ये)ति यलोपे आर्हन्तीति सिद्धयति । योग्येति तदर्थः । श्रौत्रं च आर्हन्ती च श्रौत्रार्हन्ती ताभ्यां वित्तैः श्रौत्रार्हन्तीचणैः । (तेन वित्त) इत्यनेन चणपि सिद्धिः । श्रोत्रियत्वयोग्यत्वाभ्यां प्रसिद्धैरित्यर्थः । किञ्च गुण्यः प्रशस्तगुणयुक्तैरित्यर्थः । [रूपादाहतप्रशंसोर्यबि]ति सूत्रेऽन्येभ्योऽपि दृश्यते इत्युक्त्या गुण्या ब्राह्मणा इत्यस्य भाष्यादावुदाहरणत्वेन तत्सिद्धिः । महान्तश्च ते ऋषयः महर्षयस्तैस्तथोक्तैः ।

अहर्दिवमिति—प्रत्यहमित्यर्थः । [अचतुरविचतुर] इत्यादिना निपातनात्सिद्धिः । तोष्टूय्यमान इति—स्तौतेर्यङन्ताच्छानचि रूपम् । अगुणोऽपीत्यत्रापिशब्देनाऽऽपाततो(२)विरोधं द्योतयति । वस्तुतस्तु स्तुतिप्रयोजकीभूतानन्तकल्याणगुणानां श्रुति-

---

(१) श्रौत्रार्हन्तीचणैर्गुण्यैर्महर्षिभिरहर्दिवम् ।
तोष्टूय्यमानोऽप्यगुणो विभुर्विजयतेतराम् ॥ १ ॥

इति श्लोकस्वरूपम् । यं गुणहीनं सगुणं च विभुं वेदाध्ययनकर्तृत्व-योग्यताविशिष्टाः सत्वादिगुणशालयश्च महर्षयः प्रतिक्षणमतिशयेन स्तुवन्ति स विभुर्व्यापकः परमेश्वरः सर्वोत्कृष्टत्वेन वर्तत इति तदर्थः ।

(२) एकस्मिन्नगुणत्वसगुणत्वयोः स्थित्यसम्भवेन स्तुतिविषयस्याऽगुणस्य विभोरपि शब्दबलात्सगुणात्वाऽऽपादनाद्विरोधः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्मृतिसिद्धत्वेऽपि वियदादिवद्व्यावहारिकत्वात्तदभावस्य पारमार्थिकत्वेन न विरोधः । विजयतेतरामिति-वीतिपृथक् पदम् । [तिङश्चे]ति तरप्याम्, ननु विजयते इत्यस्याऽतिङन्तत्वेनाऽप्रातिपदिकत्वेन च तरप् न स्यात्; नच [सह सुपे]त्यत्र सहेति योगविभागेन विशब्दस्य तिङन्तेन समासे प्रातिपदिकत्वस्य सुलभत्वेन तरपोऽपि सौलभ्यमेवेतिवाच्यम् । तिङन्तोत्तरपदसमासस्यापि छन्दस्येव विधानाद्, किञ्च विजयत इत्यस्य प्रातिपदित्वाङ्गीकारे सोरुत्पत्तिः, लिङ्गसर्वनामताऽभ्युपगमे नपुंसकत्वात्सोर्लुक्यपि [ह्रस्वो नपुंसके] इति ह्रस्वापत्तेः । नच जयत इत्यस्य तिङन्तत्वेऽपि तस्य विपदसापेक्षत्वेनाऽसामर्थ्यात्समासाप्राप्त्या कथं तरविति वाच्यम् । उपसर्गाणां (१)द्योतकत्वेनोक्तशङ्कानुदयेन तदुपपत्तेः । नियमेन स्वार्थसाकांक्षेतरार्थवाचकशब्दभिन्नार्थवाचकशब्दस्यापेक्षा हि सामर्थ्याऽभावप्रयोजिका सेह नास्ति उपसर्गाणां द्योतकत्वात् । तरबन्तार्थं प्रति तिङन्तार्थस्य प्राधान्येन (प्रधान)न्यायेन प्रधानस्य सापेक्षत्वेऽपि वृत्तिर्भवत्येवेति भावः । (२)पूर्वार्धे इति—ननु पूर्वार्द्धेऽपि तृतीयाऽध्यायस्य क्विनः [स्पृशोऽनुदके क्विन्] इत्यनेन व्युत्पादनात्तुर्य्यपञ्चमाध्यायवर्त्तिन इत्येतावन्मात्रप्रतिपादनमसङ्गतमिव प्रतिभातीति चेन्न। यत्र ते प्राधान्येन कथिता इति तदभिप्रायेण प्रसङ्गात्तृतीयाध्यायस्थप्रत्ययकथनेनाऽप्यक्षतेः । ननु उणादिप्रत्ययानां तृतीयाध्यायगोचरत्वाऽभावेन तृतीयाध्यायगोचराः प्रत्ययाः कथ्यन्ते इति ग्रन्थकर्तुः प्रतिज्ञा नानन्दोत्पादिनीति चेन्न । [उणादयो बहुलमि]ति सूत्रस्य बाधितत्वेन तेषामपि तृतीयाध्यायगोचरत्वाक्षतेरिति संक्षेपः ॥

वर्त्तमाने लट्—ननु वर्त्तमानत्वस्य शब्दप्रयोगाधिकरणक्षणवृत्तित्वरूपत्वेन क्रियायाश्च पूर्वापरीभूताऽवयवसमुदायरूपत्वेनावयवानाञ्चाशुविनाशित्वात्तादृशसमुदायस्य निरुक्तवर्त्तमानत्वस्य स्थिरसम्बन्धिनोऽनुपपन्नाद्वर्त्तमानक्रियावृत्तेर्धातोरित्यर्थः सर्वथाऽसम्भवीति चेन्न । वर्तमानकालक्रियावृत्तेर्धातोरित्यर्थे तात्पर्यात् । नच प्रारब्धापरिसमाप्तत्वघटितस्यैव कालगतस्यापि वर्त्तमानत्वस्य विवक्षायामपि पूर्वोक्तानुपपत्तेस्तादवस्थ्यमेवेति वाच्यम् । बौद्धपूर्वापरीभूताऽवयवकसमुदायाऽधिकरणस्य जन्यकालस्य सम्भवात् । वर्त्तमाने लडित्यादिसूत्रविहितलकाराणां वाचकत्वद्योतकत्वयोर्बहुविवादाध्यसिततत्वम् । तत्र तेषाम्बहुत्वेन तत्र शक्तौ गौरवात्प्रकृतावेव शक्तिकल्पना ज्यायसी, ते च द्योतका एवेति तत्वम् । वर्त्तमानकालत्वञ्च प्रयोगोच्चारणाधिकरणत्वे सति प्रारब्धाऽऽपरिसमाप्तक्रियोपलक्षिततत्वम् । ह्यस्तनीम्प्रारब्धाऽऽपरिसमाप्तिक्रियासादायाऽतिव्याप्तिव्यावृत्यर्थमुक्तविशेषणम्, भूतभविष्यद्भिन्नत्वं वा तत्वम् ॥

---

(१) द्योकत्वेनेति । द्योतकत्वं नाम स्वसमभिव्याहृतपदनिष्ठवृत्त्युद्बोधकत्वम् । समन्वयो यथा, अनुभूयते सुखं साक्षात्क्रियते गुरुरित्यादौ स्वम् अनु साक्षादिति च तत्समभिव्याहृतपदं भूकृपदं तन्निष्ठवृत्तेरुद्बोधकत्वं द्योतकत्वमनुसाक्षादित्यनयोरस्तीति तयोस्तत्वम्। एवं प्रकृते विजयते इत्यत्रापि वीत्युपसर्गस्य द्योतकत्वं वोध्यमिति भावः ।

(२) पूर्वार्द्धे कथितास्तुर्यपञ्चमाध्यायवर्तिनः ।
प्रत्यया अथ कथ्यन्ते तृतीयाऽध्यायगोचराः ॥

इति श्लोकाकारः । चतुर्थपञ्चमाध्यायस्थप्रत्ययाभिधानोत्तरतृतीयाध्यायस्थप्रत्ययाभिधानं करोमीत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लः कर्मणि च भावे—ननु लाघवात् लकाराणां कृतावेव (१)शक्तिरभ्युपेया; न तु कर्तरि, तत्र तदभ्युपगमे गौरवस्य प्रतिभासमानत्वात् प्रथमान्तपदेनैव कर्तुर्लाभाच्च । प्रकृत्यर्थप्रत्ययार्थयोः सहार्थत्वे प्रत्ययार्थस्यैव प्राधान्यादाख्यातार्थे धात्वर्थस्य विशेषणत्वम् । आख्यातार्थे च प्रथमान्तार्थस्य विशेषणत्वम् । अनुकूलत्वमाश्रयत्वञ्च सम्बन्धः । तथा च चैत्रः पचतीत्यादौ विक्लित्यनुकूलव्यापाराऽनुकूलकृतिमांश्चैत्र इति बोधः । रथो गच्छतीत्यादौ रथस्याचेतनत्वेन यत्नशून्यत्वादाख्यातस्य व्यापारे आश्रये वा (२)लक्षणेत्याहुस्तार्किकाः ।

तत्तुच्छम् । युष्मदस्मदोर्लकारेण सति सामानाधिकरण्ये एव पुरुषव्यवस्थोपपत्त्या लकाराणां कृतौ शक्त्यभ्युपगमे कृत्याश्रयस्य कर्तृत्वेन लकारेण युष्मदस्मदोरसामानाधिकरण्येन तदनुपपत्तेः । लस्थानिकादेशभूततिबादिभ्यः कृतिमात्रबोधवत्तत्स्थानिकादेशभूतशतृशानजादीनामपि लादेशाऽविशेषेण तेभ्यः कृतिमात्रबोधापत्तेश्च । नचाऽऽश्रयाश्रयिभावेन कर्मणि सम्प्रदाने च कृतेरन्वयात्तेभ्यः कृतिमात्रबोध इष्ट एवेति वाच्यम् । (३)(नामार्थयोरभेदातिरिक्तः सम्बन्धोऽव्युत्पन्नः) इति व्युत्पत्तेर्जागरूकत्वेनाऽऽश्रयाऽऽश्रयिभावेनान्वयाऽनुपपत्तेः । नच (फलमुखगौरवं न दोषोत्पादकमि)ति न्यायसद्भावाच्छत्रादीनां कर्तरि शक्तिस्तिबादीनां कृतावेव सेति वाच्यम् । लाघवात्स्थानिन एव वाचकत्वं नत्वादेशानां तेषां बहुत्वेन गौरवमिति तव पक्षः । तथा च तिबादीनां शत्रादीनां च स्थानिस्मारकत्वेन लिपिस्थानीयत्वं बोधकत्वं तु लकारस्यैव तस्य च लकारस्य शत्राद्यन्ते कर्तरि शक्तत्वेन तिबादीनां कृतिमात्रं बोधकत्वाऽनुपपत्तेः । नच लकाराणामनेकार्थत्वेन न काचिदनुपपत्तिरिति वाच्यम् । (अन्यायश्चानेकार्थत्वमि)ति न्यायस्य जागरूकत्वात् ।

न च (लः कर्मणि)इति सूत्रे कर्तृकर्मपदयोर्भावप्रधानत्वेन कर्तृत्वं कृतिः कर्मत्वं फलं तयोः शक्तौ सूत्रस्वारस्यम् । कर्मप्रत्ययान्ते पच्यते ओदनो देवदत्तेनेत्यादौ देवदत्तनिष्ठकृतिजन्यव्यापारजन्यविक्लित्तिमानोदन इति बोधः । 'कर्तरि कृदि' तिसूत्रे कर्तरीतिपदस्य धर्मिप्रधानतया शत्रादीनां कृत्याश्रये शक्तिरिति वाच्यम् । कर्तरि कृदिति सूत्रस्थकर्तृग्रहणस्यैव 'लः कर्मणी'त्यत्र चकारेणाऽनुवृत्तत्वाद् भावप्रधानेऽस्वारस्यात् । (स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वमि)ति न्यायेन शत्रादीनां स्थान्यर्थेन निराकांक्षत्वेनाऽऽकांक्षितविधानस्यैव ज्या-

---

(१) शक्तिरिति । ननु कस्तावच्छक्तिपदार्थ इति जिज्ञासायामुच्यते—वैयाकरणनये वाच्यवाचकभावात्मकसम्बन्ध एव शक्तिपदार्थः । उक्तं च नागेशेन मञ्जूषायाम्—तस्मात्पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावाऽपरपर्यायेति । सम्बन्धान्तरमित्यस्य वाच्यवाचकभावरूपसम्बन्ध इत्यर्थः । गदाधरमते तु अर्थनिरूपितपदनिष्ठसंकेतलक्षणोभयात्मकवृत्तिरेव शक्तिपदार्थः ।

(२) लक्षणेति । तार्किकमते—स्वशक्यसम्बन्धरूपो लक्षणापदार्थः । वैयाकरणनयेऽप्रसिद्धायाः शक्तेरेवाभ्युपगमात् लक्षणा नास्त्येव । तदुक्तं नागेशेन मञ्जूषायाम्—शक्तिर्द्विविधा प्रसिद्धाऽप्रसिद्धा चेति ।

(३) नामार्थद्वयस्याऽभेदसम्बन्धेनैवान्वयो भवति; न तु तदतिरिक्तसम्बन्धेन यथा नीलो घट इत्यादौ नीलघटयोः । नीलाऽभिन्नो घट इति बोधः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यस्त्वमिति न्यायेन कर्तरि कृदित्यनेन शक्तिग्रहाऽभावात् । न च नामार्थयोरभेदान्वयाऽनुरोधेन शतृशानजादीनां कर्तरि शक्तौ न कोऽप्युक्तदोष इति वाच्यम् । पचति कल्पं पचतिरूपं देवदत्त इत्याद्यनुरोधेन तिङ्क्ष्वपि कर्तुर्वाच्यत्वस्यैव समुचितत्वात् । किञ्च कृतेर्लकारवाच्यत्वे रथो गच्छतीत्यादावाऽऽश्रये लक्षणाऽभ्युपगतौ गौरवापत्तिः । सिद्धान्ते कर्तरि प्रत्यये कर्तुरभिहितत्वं कर्मणि प्रत्यये तु तस्यैव तत्त्वम् । इदानीं कृतौ प्रत्यये तस्या एवाऽभिहितत्वेन कर्तुरनभिहितत्वादभिहितत्वाऽनभिहितत्वव्यवस्थोच्छेदापत्तिश्च । नच, अनभिहितसंख्याके विभक्तिरिति (अनभिहिते) इत्यर्थकरणेन न दोष इति वाच्यम् । कृत्तद्धितसमासैः संख्याऽभिधानस्याऽप्रसिद्धत्वात् । किञ्च (स्थालीस्थे यत्ने पचिना कथ्यमाने स्थाली पचती)ति (कारके) इत्यधिकारसूत्रस्थभाष्यप्रयोगाद्व्यापारसामान्यस्य यत्नस्याऽपि धातोरेव लाभात् अनन्यलभ्यस्यैव शब्दार्थत्वेन कृतौ शक्तेस्सर्वथाऽसम्भवादित्यलम् ॥

भू सत्तायाम् । धातुसूत्रमिदम् । सत्तायामर्थे भूशब्दः साधुरिति तदर्थः । ननु बहूनां सत्त्वात्तान्विहाय भूधातोरेव प्रथमोपादाने को हेतुरिति चेन्न । (१)(अशोकवाटिका) न्यायेन तस्यादावुपादानात् । वस्तुतस्तु भूशब्दस्य महाव्याहृतिरूपत्वेनाऽनायासमङ्गलार्थमादौ तदुपादानमिति बोध्यम् ॥

अतो दीर्घो यञि । (तुरुस्तुशम्यमः सार्वधातुके) इत्यतोऽनुवृत्तस्य सार्वधातुकस्याऽभावे केशवः, अङ्गेत्यादौ दीर्घापत्तिः । केशशब्दात् (केशाद्वोऽन्यतरस्यामि)ति वप्रत्ययः । अङ्गशब्दात्पामादित्वान्नः । नच (शृङ्गवृन्दाभ्यामारकन्) (हृदयाच्चालुरन्यतरस्यामि) त्युभयत्राऽकारोच्चारणसामर्थ्यात्तद्धिते दीर्घाऽप्रवृत्तिज्ञापनान्न दोष इति वाच्यम् । उक्तरीत्योक्तकल्पनापेक्षया क्लृप्तसार्वधातुकसम्बन्धस्यैव ज्यायस्त्वमेवेति ज्ञापने तयोर्ज्ञापकत्वमिति तदाशयात् । नच सुपि चेति सूत्रस्य सार्वधातुकसम्बन्धाऽभावेऽधातुप्रत्यये यदि दीर्घस्तर्हि सुप्येवेति नियमार्थत्वेनोक्तस्थलीयापत्त्यभावेन तदनुवृत्तिर्निष्फलैवेति वाच्यम् । सुपि चेत्यस्याऽभावे यज्वभ्यां युवभ्यामित्यादावतो दीर्घो यञीति दीर्घापत्तेर्दुर्वारत्वात्तन्निवृत्त्यर्थन्तस्यावश्यकत्वेन नियमत्वायोगादुक्तस्थले दोषस्य तादवस्थ्यात् । नच (नलोपः सुपिति) सूत्रेण दीर्घे नलोपाऽसिद्ध्या न दोष इति वाच्यम् । यञादित्वमात्रस्य निमित्ततावच्छेदकत्वेन तस्य सुप्त्वव्याप्यत्वाऽभावात्सुप्त्वतद्व्याप्यधर्मावच्छिन्ननिमित्तकार्याऽप्राप्त्या नलोपः सुपिति सूत्राऽप्रवृत्तेरिति संक्षेपः ॥

ननु अत आदित्येव सिद्धे दीर्घग्रहणं व्यर्थमिति चेन्न । दीर्घ एव यथास्यादित्येव नियमार्थत्वेन तस्य सार्थक्यात् । अत एव पचामीत्यादौ [अनन्त्यस्यापि प्रश्नाख्यानयोरि]ति प्लुतो नेति । नचाऽनन्त्यस्य पदस्य टेरिति तत्सूत्रार्थे कथन्तत्र तत्प्राप्तिरिति वाच्यम् । दीर्घग्रहणसामर्थ्यादनन्त्यविषय एव तत्सम्बन्धेन वाक्ययोः क्लृप्तसम्बन्धत्यागे बीजाऽभावात् । तेन वाक्यस्थानन्त्यस्य पदस्याचः प्लुतः स्यादनन्त्यपदस्य च टेरिति तदर्थः । यत्तु आदिति कृतेऽपि तपरकरणसामर्थ्यात्प्लुताऽभावस्य सिद्धत्वेन व्यर्थमेव दीर्घग्रहणमिति के-

---

(१) अशोकरोपणवाटिकानिर्माणयोर्मध्ये लाघवादशोकनिर्माणमेव प्राक् युक्तमिति तदभिप्रायः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चित्तन्न तथा सति करिष्यामीत्यत्रोदात्तस्य स्यशब्दस्याऽऽन्तरतम्यात्प्राप्तस्याऽप्युदात्तत्वस्य बाधापत्तेरित्यलम् ॥

परोक्षे लिट् । परोक्षत्वञ्च साक्षात्कृतमित्येतादृशविषयताशालिज्ञानाविषयत्वम् । यद्विषयताशालिज्ञानानन्तरं साक्षात्कृतमित्याकारिका ज्ञाननिष्ठविषयताशालिनी विलक्षणा प्रतीतिर्भवति तादृशविषयतानिरूपकं यद् ज्ञानं तद्विषयत्वमित्यर्थः । तच्च ज्ञानमिन्द्रियत्वावच्छिन्नकरणताकं ज्ञानम् । तच्च सन्निकृष्टविषयकमेवेति सन्निकर्षाप्रयोज्यत्वं लब्धमिति परोक्षत्वं स्फुटमेवेति । ननु (क्रिया नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूता न शक्या पिण्डीभूता निदर्शयितु) मिति भाष्यात्क्रियाया अतीन्द्रियत्वेन न परोक्षे इति व्यावर्त्तकमिति—चेन्न । पिण्डीभूता (समुदायभूता) यास्तस्या निदर्शयितुमशक्यत्वेऽप्यवयवशः साक्षात्कृतमिति प्रतीतिविषयत्वसम्भवात् । अन्यथा पश्य मृगो धावतीत्यत्र धावनक्रियाया दर्शनकर्मता न स्यादिति । व्यापाराऽऽविष्टानामपि साधनानामेवेह परोक्षत्वस्य विवक्षणान्नोक्तदोषः । अयं पपाचेत्यनुरोधेन व्यापारानाविष्टानामित्यपि वदन्ति केचित् । स्वक्रियायाः स्वप्रत्यक्षत्वात् (१)व्यातेने किरणावलीमुदयनः । (२)चक्रे सुबन्धुः इत्यादयः प्रयोगा असंगता एव । व्यासङ्गादिना स्वक्रियायाः प्रत्यक्षत्वोपपादनेऽप्यनद्यतनातीतत्वयोरभावेन तदर्थकस्य लिटोऽप्यसम्भवादिति दिक् ॥

नित्यत्वाद्वुक् गुणवृद्धी बाधत इति । गुणे वृद्धौ वा (अचः परस्मिन्नि) ति स्थानिवद्भावाद् भूशब्दत्वेन वुकः प्रवृत्त्या कृताकृतप्रसंगित्वेन नित्यत्वमिति भावः । ननु[शब्दान्तरस्य प्राप्नुवन्विधिरनित्यः] इति परिभाषया वुग्विधायकस्यानित्यसूचनान्नित्यत्वाद्वुगिति कथनं न सङ्गतिमाप्नोतीति चेन्न । लक्ष्यानुरोधेनाऽत्रोक्तपरिभाषाया अप्रवृत्तेः । नच गुणवृद्ध्योः कृतयोरपि [द्विर्वचनेऽचि] इत्यनेन स्थानिरूपातिदेशाद्वुकः प्रवृत्तौ बाधकाऽभावान्मूलोक्तमसमञ्जसमिति वाच्यम्। प्रक्षालनाद्धि पङ्कस्येति न्यायेन स्थानिरूपातिदेशपक्षानभ्युपगमेन द्वितीयार्थे वुकः प्राग्गुणवृद्ध्योरप्राप्त्या मूलोक्तस्य सामञ्जस्यात् ॥

भवतेरः । प्रयोगे दृष्टानाम्भुवामनुकरणाद् भूशब्दात् (इक्श्तिपौ धातुनिर्देशे) इति श्तिपि रूपसिद्धिः । ननु शपः कर्त्रर्थे विधानेन श्तिपोऽकर्त्रर्थत्वात्तदप्राप्त्या रूपन्नोपपद्येतेति चेन्न । (उपसर्गात्सुनोती)त्यादिनिर्देशात् (लोपः पिबतेरीच्चे)ति निर्देशाच्च श्तिप्प्रत्ययस्य कर्त्रर्थत्वाऽभावेऽपि विकरणप्रवृत्तेःसुलभत्वात् । श्तिपः कर्तृवाचकत्वाऽभावेऽपि भावक-

---

(१) वैशेषिकदर्शनस्य किरणावलीव्याख्यायामुदयनाचार्यस्यायं श्लोकः—

अर्थानां प्रविवेचनाय जगतामन्तस्तमः शान्तये
सन्मार्गस्य विलोकनाय गतये लोकस्य यात्रार्थिनः ।
तत्तत्तामसभूतमातय इमां विद्यावतां प्रीतये
व्यातेने किरणावलीमुदयनः सत्तर्कतेजोमयीम् ॥

(२) सुबन्धुकविकृतवासवदत्तानामगद्यकाव्ये कवेरिदं पद्यम्—

सरस्वतीदत्तवरप्रसादश्चक्रे सुबन्धुः सुजनैकबन्धुः ।
प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिर्निबन्धम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्मणोरपि प्रवृत्तिः । केचित्तु—श्तिपः शकारोच्चारणसामर्थ्यादकर्त्रर्थेऽपि शपि रूपसिद्धिः । नच शकारोच्चारणाऽभावे तिप आर्द्धधातुकत्वेन प्रकृते ब्रवीतिरित्यत्र चेडापत्तेर्दुर्वारत्वात्तद्व्यावृत्त्यर्थं शकारोच्चारणमावश्यकमिति वाच्यम् । शकाराऽभावे तिप आर्द्धधातुकत्वेऽपि (तितुत्रे) ति सूत्रेणेण्निषेधाच्छकारोच्चारणस्यैतद्व्यावर्त्तकत्वेन वैयर्थ्यस्य स्पष्टत्वात् एवञ्च शकारोच्चारणस्यैतद्व्यार्त्तकत्वेन वैयर्थ्यस्य स्पष्टत्वात् । एवञ्च शकारोच्चारणसामर्थ्यादेवात्र शपः प्रवृत्त्या रूपमिति वदन्ति ॥

अनद्यतने लुट्—अत्रानद्यतनत्वं नाम, अतीताया रात्रेः पश्चार्द्धेनाऽऽगामिन्या रात्रेः पूर्वार्द्धेन सहितो दिवसोऽद्यतनस्तद्भिन्नोऽनद्यतन इति ॥

ननु (पुगन्तलघूपधस्य चे)त्यत्र सार्वधातुकार्द्धधातुकयोरित्यस्याङ्गविशेषणत्वे सार्वधातुकार्द्धधातुकाऽव्यवहितस्याङ्गस्येको गुणो भवतीत्यर्थकरणे भिनत्तीत्यत्रापि गुणापत्तिः । तयोरिको विशेषणत्वे तु भेत्तेत्यत्राऽपि गुणो न स्यात्तकाररूपस्यैकवर्णस्य व्यवधानेन सार्वधातुकाव्यवहितत्वाऽभावदित्याशंक्य समाधत्ते—येन नाऽव्यवधानं तेन व्यवहितेऽपि भवतीति—यद्वर्णकर्तृकव्यवधानशून्यत्वं न सम्भवति तद्वर्णव्यवधानेऽपि भवतीति तदर्थः । तथाच सूत्रसार्थक्यायैकवर्णव्यवधाने प्रवृत्तावप्यनेकवर्णव्यवधानेऽप्रवृत्त्या भेत्तेत्यत्र गुणो जातः, भिनत्तीत्यादौ तदभावश्च । (दीधीवेवीटामि)त्यत्रत्येड्ग्रहणस्यैवात्र ज्ञापकत्वम् । तथाहि अस्मिन्निषेधसूत्रे गुणाऽभावार्थमेवेटो ग्रहणम् । उक्तरीत्या गुणाऽभावोपपादनेन व्यर्थमेवेटो ग्रहणम्, ज्ञापिते तूक्तार्थे सर्वं समञ्जसमिति दिक् ॥

ननु भवतादित्यनुपपन्नम्, तुहिस्थानिकादेशभूतस्य तातङो ङित्त्वेन तस्याऽनेकाल्त्वेऽपि आनङादाविव बाधकस्य (ङिच्चे)त्यस्य सद्भावात्तेनाऽन्त्यस्थाने तातङ्प्रवृत्तेर्बोधनादिति चेन्न । अनन्यफलकङित्वे आनङादौ चरितार्थस्योक्तशास्त्रस्य गुणवृद्धिप्रतिषेधसम्प्रसारणादिफलकतातङ्ङित्वे मन्द इव प्रवृत्तो(अनेकाल्शि)त्यनेन परेण बाधात् । अनङादौ ङित्त्वस्याऽन्त्यादेशातिरिक्तफलन्नास्ति । नच सर्वादेशे गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थत्वम्, गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थत्वे सति सर्वादेशत्वमित्युभयोः परस्परापेक्षणादन्योन्याश्रय इति वाच्यम् । (एरु)रि)त्येतदनन्तरं (तिह्योस्तादाशिष्यन्यतरस्यामि]ति न्यासे इकारस्याऽनुवृत्त्यैव सिद्धौ ङित्त्वस्य सर्वादेशत्वविधानार्थत्वकल्पनयोक्तदोषाऽयोगादित्याशयेनाह—अनेकाल्त्वात्सर्वादेशः । यद्यपि ङिच्चेत्यादि ॥

प्रवर्तनायां लिङ् इत्येव सुवचम् । चतुर्णां ग्रहणं प्रपञ्चार्थमिति । अत एव

अस्ति प्रवर्तनारूपमनुरूपं चतुर्ष्वपि ।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ॥
न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा
विध्यादीनामुपादानं चतुर्णामादितः कृतम्

इति भूषणग्रन्थः सङ्गच्छते । प्रवर्त्तनात्वञ्च, प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम्, तच्चेष्टसाधनत्वस्यास्तीति तदेवाऽर्थादिष्टसाधनत्वमेव विध्यर्थः ॥

ननु लिङो ङित्त्वात्तत्स्थानिकादेशे च स्थानिवद्भावेन ङित्त्वस्यानयनादचारितार्थ्ये (अवयवेऽचरितार्थो विधिः समुदायस्योपकारक)इति न्यायेन समुदाये तत्त्वादिष्टसिद्धौ पुनर्या

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुटो ङित्त्वविधानं व्यर्थमित्याशंङ्क्य समाधत्ते—ङित्त्वोक्तेर्ज्ञायते क्वचिदनुबन्धकार्येपीत्यादि—अयम्भावः, ञित्वविधानसामर्थ्यात् न ल्यपीति ज्ञापकज्ञापितस्य क्वचिदनुबन्धकार्येऽनल्विधाविति विधेधाप्रवृत्तिरूपस्य क्वाचित्कत्वबोधनेन टित्वोगित्वयोरनतिदेशेन वक्ष्यमाणेत्यत्र (टिड्ढाणञि)ति ङीप्सिद्धिः । ननु (ङिच्च पिन्ने)ति भाष्यादुक्तज्ञापनासम्भवात्तत्रत्यदोषस्तदवस्थ एवेत्यरुचेराह—श्नः शानचः शित्वमपीति—वक्ष्यमाणेत्यत्र स्फुटतयोपपादनादलमिहोपपादनेन ॥

ननु सामान्यशास्त्रस्य विशेषशास्त्रेण बाध इत्यभियुक्तोक्त्या सुटो विशेषविहितत्वेन (१) येन नाप्राप्तिन्यायेन सुटा यासुड्बाधः स्यादित्यत आह–सुटा यासुड् न बाध्यत इति । विषयभेदादिति–विषयभेदेन बाध्यबाधकभावाऽभावादत एव(असम्भव एवापवादत्वमिति वार्त्तिककृदुक्तिः सङ्गच्छते) । सत्यपि सम्भवे बाधनम्भवति यथादधिदानात्प्राक् तदुत्तरम्वा तक्रदानेन दधिदानबाधः, अत एव तिसृणामित्यत्राचिरादेशेन नुटो बाधः कुतो नेत्याशंक्य न तिसृचतस्रिति ज्ञापकेन न नुडिति समाहितम्, तथाच प्रकृते पूर्वप्रदर्शितदोषस्तदवस्थ एवेति वाच्यम् । यासुट् परस्मैपदेष्वित्यत्र विषयसप्तम्या अङ्गीकारात्परस्मैपदविषयतायामेव लिङो यासुड्विधानेन तदानीं सुटोऽप्राप्त्या बाध्यबाधकभावाऽभावात अत एव लिङोयासुट् तकारथकारयोः सुडित्युक्तं दीक्षितेन । विषयभेदादित्यस्य प्राप्तिविषयभेदात्प्राप्तिक्षणभेदादित्यर्थः । वस्तुतस्तु (यासुड्विषये सीयुटः प्रतिषेधो वक्तव्य) इति वार्त्तिकेन प्रकृते बाध्यबाधकभावाऽभावकल्पनम् । यौगपद्यासम्भवरूपविप्रतिषेधाऽभावान्न परत्वेन सुटा यासुड्बाध इत्याहुः केचित् ॥

ननु (लिङः सलोपोऽनन्त्यस्ये) त्यनेन सार्वधातुकलिङ्सम्बन्धिनोऽन्त्यभिन्नसकारस्य लोपविधानात्सुटो लिङ्स्थानिकादेशावयवत्वेन विधीयमानत्वेन तल्लोपेऽपि यासुटः सकारस्याऽतथात्वाल्लोपो न स्यादिति चेन्न । अवयवाऽवयवस्यापि समुदायम्प्रत्यवयवत्वमित्याश्रयणात्सुटोऽपि लिङ्भक्तत्वेन तदीयसकारलोपोपपत्तेः । नच (लक्ष्ये लक्षणं सकृदेव प्रवर्त्तते) इति न्यायस्य जागरूकत्वाद्यासुट्सकारलोपो न स्यादिति वाच्यम् । लक्ष्यभेदेन तदुपपत्तेरित्याशयेनाह–सकारद्वयस्यापि निवृत्तिरिति ॥

ननु 'अतो येय' इत्यत्रानुवृत्तसार्वधातुकग्रहणाभावे चिकीर्ष्यादित्यत्रार्द्धधातुकेऽपीयापत्तिः । नच (अतो लोप) इत्यनेनाकारलोपेऽतःपरत्वाऽभावादेवेय् न स्यादिति वाच्यम् । (२)मध्येऽपवादन्यायेन पूर्वविधेरतो लोप इत्यस्य बाधात्तत्रोक्तापत्तेर्दुर्वारत्वादित्याह–सार्वधातुके किम्, चिकीर्ष्यादिति—अयम्भावः, चिकीर्ष्यादित्यत्रेय्विधानेन चरितार्थस्यातो येन इत्यस्य (अतो दीर्घो यञि) इत्यनेन बाधाद्दीर्घस्यैव दुर्वारतया भवेदित्यत्रेय् न स्यादित्यतिव्याप्तिदोषपरिहाराय सार्वधातुकग्रहणमावश्यकमिति भावः ॥

ननु णत्वविधायकशास्त्रे संहिताधिकारात्संहिताविवक्षणे णत्वं तदविवक्षणे णत्वाऽ

---

(१) येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति—इति न्यायस्वरूपम् । यत्कर्तृकावश्यप्राप्तौ यस्य विधेरारम्भः स विधिस्तस्य (अवश्यप्राप्तस्य) बाधको भवतीत्यर्थः ।

(२) मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरानिति न्यायस्वरूपम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भाव इति विकल्परूपसिद्धौ विभाषाग्रहणं व्यर्थमिति चेन्न । असमस्तेष्वप्युपसर्गेषु संहितायां नित्यत्वज्ञापनेन चरितार्थत्वादित्याह—इहोपसर्गाणामसमस्तत्वेऽपि संहिता नित्येति ।।

तदुक्तम्—

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥

ननु (इजादेश्च गुरुमतोऽनृच्छः) इत्येतत्सूत्रविहिताऽऽम्घटकमकारस्य हलन्त्वेनेत्संज्ञा स्यादत आह—आमो मकारस्य नेत्त्वमिति—यद्यत्र मकारस्येत्संज्ञा स्यात्तदा आस्-धातोः कास्धातोश्चाऽऽम्विधानं व्यर्थं स्यात्तत्रापीत्संज्ञा दुर्वारत्वादिति तत्सामर्थ्यादित्संज्ञा-ऽभावकल्पनेन न प्रकृतेऽपि काप्यापत्तिः । नच मित्त्वादन्त्यादचः परत्वसामर्थ्यादसञ्जातवि-रोधिन्यायेन सवर्णदीर्घस्यैव बाधोऽस्त्विति वाच्यम् , सवर्णदीर्घबाधापेक्षया इत्संज्ञाबाध-स्यैव समुचितत्वात् ॥

ननु (कृञ्चानुप्रयुज्यते) इत्यतः कृञोऽनुवृत्त्यैव सिद्धे (आम्प्रत्ययवत्कृञोऽनुप्रयोगस्ये)-त्यत्रत्यकृञ्ग्रहणं फलाभावाद्व्यर्थं सज्ज्ञापयति भवत्यन्यस्याऽप्यनुप्रयोगः तेन (कृभ्वस्ति-योगे सम्पद्यकर्तरि च्विः) इत्यत्र कृशब्दमादाय कृञ्प्रत्याहाराश्रयणेन कृभ्वस्तीनाम-नुप्रयोगलाभः । तेषां कृभ्वस्तीनां क्रियासामान्यवाचकत्वेनाऽऽम्प्रकृतीनां क्रियाविशेषवा-चित्वेन तदर्थयोरभेदान्वयः । सामान्यविशेषयोर्घटो नीलघट इत्यादौ विधेयांशेऽधिकाव-गाहिशाब्दबोधस्य नवीनैरभ्युपगमात् । नचोक्तरीत्या कृभ्वस्तिलाभे सम्पदोपि प्रत्याहा-रान्तर्गतत्वेन लाभात्कुतो न प्रयोग इति वाच्यम् । तस्य तथात्वेऽप्यनन्वितार्थत्वेनाऽप्र-योगात् । तथाच, एधांचक्रे इत्यादित एककर्तृकभूतानद्यतनपरोक्षकालिकवृद्ध्यभिन्नक्रियेति शाब्दबोधः ॥

ननु अङ्गेन प्रत्ययाक्षेपः किमर्थ इत्यभिप्रेत्याशङ्कते—प्रत्यये किमिति—उत्तरयति—वव्रश्चेति—अयम्भावः । प्रत्ययग्रहणाऽभावे (उरदि)त्यस्य परनिमित्तकत्वाऽभावात्स्था-निवत्त्वाऽभावेन (न सम्प्रसारणे सम्प्रसारणमि)तिनिषेधाऽप्रवृत्त्या सम्प्रसारणापत्तिः, सति प्रत्ययग्रहणे तु नेति । उरदत्वस्य परनिमित्तत्वसिद्ध्यर्थत्वादेव भगवता भाष्यकृताऽऽ-सप्तमसमासेरङ्गाधिकार उक्तः । आसप्तमसमाप्तेरङ्गाधिकारे भाष्यप्रामाण्यादङ्गसंज्ञायाः प्रत्ययनिमित्तत्वेन तद्द्वारा (उरदि)त्यस्य परनिमित्तत्वमिति भावः । नचाङ्गसंज्ञाद्वारा निमित्तत्वमित्यस्याङ्गसंज्ञाम्प्रति प्रत्ययस्य निमित्तत्वेनोरदत्वम्प्रति निमित्तत्वमित्यर्थो वाच्यः, सच न युक्तः, प्रत्ययस्य साक्षान्निमित्तत्वानुपपादनादिति वाच्यम् । प्रत्यय इत्य-स्यावृत्त्योक्तार्थस्य युक्तत्वादिति ।

एकाच उपदेशेऽनुदात्तात्—ननु एकाजनुदात्तयोस्सत्त्वादुपदेशपदं क्वाऽन्वेतीत्या-शङ्कायामाह—उपदेश इत्युभयान्वयीति—मध्ये पाठात् (देहलीदीप) न्यायेन [काका-क्षिगोलक] न्यायेन वोभाभ्यां सम्बध्यत इत्यर्थः । नचानुदात्तपद एव सम्बन्धोऽस्तु एकाचि मास्त्वसाविति वाच्यम् । तथा सति पिपक्षति विभत्सतीत्यादावीण्निषेधाऽनापत्तेः । नचै-काचि पद एव सम्बन्धोस्तु मास्त्वनुदात्तपदे तत्सम्बन्ध इति वाच्यम् । सत्येवं कर्तुं हर्तु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मिति तुमन्नन्ते इण्निषेधाऽनापत्तेः। इत्युभयत्रोपदेशपदसम्बन्ध आवश्यक इति भावः॥
एकाचः किमिति—ननु एकाज्ग्रहणाऽभावे जंघनितेत्यादौ यङ्लुगन्ते निषेधस्य दुर्वारत्वेन व्यर्थमेव तदिति वाच्यम्। [स्थालीपुलाक] न्यायेन वक्ष्यमाणपरिभाषाज्ञापनेन तस्य सार्थक्यात्। तदाह—(१)श्तिपाशपानुबन्धेनेत्यादि-नच [श्न्युः किती] त्यत्रैकाज्ग्रहणस्यानुवृत्त्यर्थत्वेन कथमुक्तार्थे ज्ञापकत्वमिति वाच्यम्। तथा सति लक्ष्यानुसारेणैवोक्तनिषेधज्ञापनादित्याहुर्र्वाचीनाः। नव्यास्तु, एकाज्ग्रहणमुत्तरार्थमित्युक्तवता भाष्यकृता [एकाच उपदेश] इत्यत्रैकाज्ग्रहणस्यानवश्यकत्वं बोधितम्। नचेह किञ्चिद् न्रपो इतीति भाष्येणोत्तरार्थस्याप्यैकाज्ग्रहणस्येह करणं युक्तमिति वाच्यम्। भाष्यकृतैवाऽत्रैकाज्ग्रहणस्य वैयर्थ्योपपादितत्वात्। नच हन्तिरूपोपदेशे वधादेशस्यैकाच्त्वान्निषेधः स्यादेवेति वाच्यम्। साक्षादुपदेशसम्भवे परम्परोपदेशग्रहणे मानाभावेनादोषात्। नच श्तिपा शपेत्याद्युक्तज्ञापने ज्ञापकभूतैकाज्ग्रहणस्योत्तरार्थतया ज्ञापकत्वाऽभावाज्ज्ञापनासम्भवेन कथं यङ्लुकि तत्कार्याप्रवृत्तिरिति वाच्यम्। यङ्लुकश्छान्दसत्वेन छन्दसि दृष्टस्यैवाऽनुविधानेन सर्वेष्टसिद्धेरिति दिक्॥

ननु अनयोः पूल्योः कटं कुर्वित्यादौ यथा उभयपूलनिर्मितकटपदोत्तराम्विभक्तिगतैकत्वविवक्षणं तथैवाऽत्र इत्यत्रङस्विभक्तिगतैकत्वस्य विवक्षणादेकत्वस्य संख्यात्वेन विशेषणतया लक्ष्यानुरोधेन मत्वर्थलक्षणया एकाज्वतो ग्रहणेन च सिद्धे व्यर्थमेकग्रहणमिति चेन्न। तस्योपदेशत्वावच्छेदेनैकाचो ग्रहणमिति बोधनेन सार्थक्यात्। तेन नावधीदित्यादौ निषेधः स्यान्युपदेशे एकाच्त्वेऽप्यादेशोपदेशेऽनेकाच्त्वात्। नच [अर्द्धं नपुंसकम्] [आकडारादेका संज्ञा] इतिसूत्रद्वयस्थनपुंसकग्रहणैकाज्ग्रहणाभ्यां ज्ञापितस्य[सूत्रे लिङ्गवचनमतन्त्रमि]त्यस्य सत्त्वात्कथमुक्तप्रकारोपपत्तिरिति वाच्यम्। साक्षादुपदेशग्रहणेन चरितार्थत्वसम्भवे परम्परोपदेशाङ्गीकारे बीजाऽभावात्॥

आदेशश्चेह वैरूप्यसम्पादक एव गृह्यते। शसिदद्योः प्रतिषेधवचनाज्ज्ञापकादिति—अयम्भावः [अत एकहल्मध्येऽनादेशादेर्लिटि] इत्यत्राऽनादेशघटकाऽऽदेशपदेन विरूपत्वसम्पादकस्य ग्रहणम्। प्रमाणञ्चात्र शसिदद्योः प्रतिषेधवचनमेव, तथाहि, तत्रोपदेशपदेनोक्तरूपाग्रहणे स्वरूपस्याऽऽप्यादेशस्य ग्रहणापत्त्या यस्याऽङ्गस्य लिण्निमित्त आदेशो न भवतीत्युक्तसूत्रस्याथ शस्धातोर्ददधातोश्चापि लिण्निमित्तस्याऽऽदेशस्य सत्त्वादेवाऽप्राप्त्या निषेधो व्यर्थः सन्नुक्तार्थं ज्ञापयतीति॥

ननु उखधातोर्लिटि द्वित्वे हलादिः शेषे उत्तरखण्डाद्यवयवोकारस्य लघूपधगुणे उवङि (अतो गुणे) इतिपररूपे उवोखेति रूपसिद्धिः, अत्र पररूपात्प्राक् (इजादेश्चे)त्याम् कुतो नेत्याशङ्कां समाधत्ते—सन्निपातपरिभाषया [इजादेरि]त्याम्नेति—द्वयोः सम्बन्धस्सन्निपातस्तल्लक्षणजायमानो विधिः स्वातिरिक्तसम्बन्धविघातकशास्त्रे निमित्तं न भवतीत्यर्थः। तथाच प्रकृतिप्रत्यययोर्यः पूर्वापरीभावः सम्बन्धस्तल्लक्षणजायमानो लघूपधगुणविधिः स्वातिरिक्तलिट्परत्वसम्बन्धविघातके आमि न निमित्तम्, आमि सति लिट्परत्वव्याघातः स्प-

(१) श्तिपा शपाऽनुबन्धेन निर्दिष्टं यद्गणेन च।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ष्ट एव । इजादेरित्यत्र गुल्मानिति नित्ययोगे मतुपो विधानान्नित्यं यो गुल्मानित्यर्थे एध वृद्धावित्यादावेवाऽऽम् न तु प्रकृते तत्प्रसक्तिरित्यन्ये ॥

ननु ऊखतुरित्यत्र पूर्वं कृते सवर्णदीर्घे तस्य पूर्वान्तवद्भावेनाऽभ्यासत्वेन (ह्रस्व) इत्यनेन कुतो न पुनर्ह्रस्व इत्यत आह—इह सवर्णदीर्घस्याऽभ्यासग्रहणेनेति—अयम्भावः । (वार्णादाङ्गं बलीयः) इत्यनया परिभाषयाऽन्तरङ्गमपि सवर्णदीर्घं बाधित्वा पूर्वं कृते ह्रस्वे ततो दीर्घे (लक्ष्ये लक्षण) न्यायेन न पुनर्ह्रस्वापत्तिः । न च पिष्टपेषणवद्ध्रस्वस्य ह्रस्वविधानस्य वैयर्थ्येन तच्छंकोत्थापनं निर्मूलमेवेति वाच्यम् । पर्जन्यवल्लक्षणप्रवृत्तेः सिद्धान्तसिद्धत्वेन फलाऽभावेऽप्यङ्गाऽवयवाऽभ्यासरूपस्थानिनि विधीयमानह्रस्वप्रवृत्तेरनिवार्यत्वात् । नच स्योन इति भाष्यकृदुक्तोदाहरणादुक्तपरिभाषाऽनित्यत्वादप्रवृत्त्या द्वित्वनिमित्तको यो बहिरङ्गह्रस्वस्तदपेक्षयाऽन्तरङ्गसवर्णदीर्घस्यैव प्रवृत्त्या पुनरुक्तदोषस्तदवस्थ एवेति वाच्यम् । (षत्वतुकोरसिद्ध) इत्येतद्घटकतुग्ग्रहणेनाऽन्तरङ्गपरिभाषाया अप्यनित्यत्वाद्ध्रस्वस्यैव परत्वात्प्रवृत्तेरिति ग्रन्थकर्तुराशयः । नव्यास्तु, अभ्यासविकारे बाध्यबाधकभावाऽभावाद्ध्रस्वदीर्घयोरेकदा प्राप्तौ (लक्ष्ये लक्षण) न्यायान्न पुनर्ह्रस्व इत्याहुः । उक्तपरिभाषया ह्रस्वहलादिशेषयोः समावेशे उक्तन्यायेन न पुनरसाविति केचित् ।

ननु कृसृभृ इत्येषां प्रकृत्याश्रयस्य (एकाच उपदेशेऽनुदात्तादि)ति निषेधस्य प्राप्तत्वात् वृङ्वृञोस्तु उदात्तत्वेन (श्र्युकः किती)तिप्रत्ययाश्रयस्य निषेधस्य प्राप्तत्वाच्च, ग्रहणं व्यर्थम् । भारद्वाजनियमप्रापितेण्निषेधाय स्तुद्रुवादीनां सार्थक्यमित्याह—क्रादीनां चतुर्णां ग्रहणं नियमार्थमिति—नियमाकारस्तु मूल एव स्फुटत्वादत्र नोक्तः । अव्यवहितोत्तरत्वसम्बन्धानवच्छिन्नधातुत्वावच्छिन्नप्रकारतानिरूपितविशेष्यताप्रयोजकप्रत्ययघटितशास्त्रत्वं प्रकृत्याश्रयत्वम् । थावानिति । नञ्वाशब्दान्यतरप्रापित इत्यर्थः । तेन षिधू इत्यस्य सिषेधिथेत्येकमेव । यत्तु (अनन्तरस्य विधिर्वा भवति प्रतिषेधो वे)ति न्यायेन प्रक्रमाद्वा नञ्प्रापितस्यैव नियमस्तेनोक्तधातोरुभयमिति तन्न । (उपदेशेऽत्वत)इति सूत्रे नित्यानिट इत्यस्याञ्जिर्व्यावर्त्य इत्यर्थपरभाष्यासङ्गतिः । यदि च वाप्राप्तानियमो न स्यात्तदा तत्राऽप्यूदित्वप्रयुक्तविकल्पस्य सद्भावात्तदसङ्गतिः । मम तु क्रादिनियमेन नित्य इडिति भावः । नान्येभ्य इति—तेन बभूविवेत्यादेः सिद्धिः । नियमाकारे प्रकृत्याश्रयः प्रत्ययाश्रयः इत्युक्तन्तत्र विचार्यते । अस्तु नाम प्रकृत्याश्रयनिषेधस्य नियमः वृग्रहणस्य ववर्थेत्यत्राप्राप्तनिषेधप्रापकत्वेन प्रत्ययाश्रयस्य नियमासम्भवात् । थलोऽकित्वेन न तत्र प्रत्ययाश्रयनिषेधप्राप्तिः । वृञ उदात्तत्वेन नापि प्रकृत्याश्रयनिषेधप्राप्तिः । न चैवमपि वृञो नियमार्थत्वमस्त्विति वाच्यम् । तस्य विशेषरूपेणाऽत्राग्रहणात् । यद्यपि विशेषरूपेण तत्र वृञोऽपि न ग्रहणं तथाप्यप्राप्तनिषेधप्राप्तिफलकत्वेन वृञ एव ग्रहणम् । एवञ्च (श्र्युकः किति) इति निषेधो दुर्वार एवेति चेदुच्यते, (बभूथाततन्थे) ति सूत्रे छन्दसि ववर्थेति निपातनेन भाषायां वृञस्थल इटः स्वीकर्तव्यत्वाद्वृग्रहणस्य थलविषयत्वाऽयोगेन वमादीनां च कित्वेन नियमस्य सुस्थत्वात् ॥

ननु संज्ञाशास्त्रस्य कार्यकालपक्षे न पृथग्वाक्यार्थबोधः किन्तु विधिवाक्येन सहैवेति सिद्धान्तः । तथा च (सन्वल्लघुनि) इति संज्ञाशास्त्रमेकाचो द्वेऽङ्गसंज्ञेति सहितमुपस्थितम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ततश्च, अङ्गाभिन्नैकाच्कर्मकं यद्द्विरुच्चारणं तत्र पूर्वोऽभ्याससंज्ञः स चाऽभ्यासः चङ्परकणिपरकलघुपरकः सन्वद्भवतीत्यर्थ इति माधवमतम् । तदाह—(१)**संज्ञायाः कार्यकालत्वादिति**—अजजागरदित्यत्र सन्वद्भाववारणाय वार्तिककृता (जागर्तेः प्रतिषेधो वक्तव्यः) इति वार्तिकमारब्धम्, भाष्यकृता तु तत्प्रत्याख्यातम् । माधवमते सन्वद्भावस्य तत्राऽप्राप्त्या तदुभयमपि विरुद्धमित्याह । **ऊर्णा दीर्घ इति**—तेन और्णुनवदित्यस्य सिद्धिः । नात्र सन्वद्भावोपयोगो णौ कृतादेशस्य स्थानिवद्भावेन निषेधेन वा नुशब्दद्वित्वे सत्यभ्यासेऽवर्णाऽभावात् । **अर्थापयताविति**—अर्थमाचष्ट इत्यर्थे णिच्यापुगागमे ततः चलेश्चङि दीर्घे (सन्वत्)इतीत्त्वे च, आर्तीथपदिति सिद्धम् । **चकास्तौ तूभयमिदमिति**—चङ्परे णौ यल्लघु इति व्याख्याने न स्यात् । चङ्परे णौ यदङ्गमितिव्याख्याने तु स्यात्, तेन अचचकासत् अचीचकासदिति रूपद्वयं सिद्धम् । ननु येनोभयार्थेनोक्तरूपद्वयसिद्धिस्तदर्थद्वयं कथं लभ्यत इत्याह—**णेर्विशेष्यं सन्निहितमिति**—अत्र किम्प्रमाणमित्याकांक्षायामाह—**इति व्याख्याविकल्पस्य कैयटेनैव वर्णनादिति**—चङ्पर इत्यावर्त्यं अग्लोपविशेषणत्वेन योजितस्य फलमाह-**णेरग्लोपेऽपि सम्बन्ध इति**—श्रिद्रुस्रुपरतोऽग्लोपित्वासम्भवेनात्रापि चङ्पर इत्येतावतैव णाविति लभ्यत इत्यवसेयम् । **अगितामपि सिद्धये इति**—पचिकमिशकिप्रभृतीनामित्यर्थः । इत्संज्ञकानां लोपो न णिचं प्रतीक्षत इत्याशयः ॥

ननु अयधातोरात्मनेपदित्वात्ततश्शानचो विधानस्यैव युक्तत्वाच्छतृप्रत्ययासम्भवेन (२)(उदयति विततोर्ध्वरश्मिरज्वावि)ति माघश्लोके उदयतीति प्रयोगोऽनुपपन्न इत्यत आह-**इट किटकटीत्यत्रेति** । कटीत्यत्र इधातोः प्रश्लेषादयतिरूपस्य सम्भवेनोक्तकाव्यप्रयोग उपपन्नः । पक्षान्तरेणोपपत्तिप्रकारमाह–यद्वा[**अनुदात्तेत्त्वलक्षणमात्मनेपदमनि-**

---

(१) संज्ञाया कार्यकालत्वादङ्गं यत्र द्विरुच्यते ।
तत्रैव दीर्घः सन्वच्च नानेकाक्ष्विति माधवः ॥ १ ॥
चकास्त्यर्थापयत्यूर्णोत्यादौ नाङ्गं द्विरुच्यते ।
किन्त्वस्यावयवः कश्चित्तस्मादेकाक्ष्विदं द्वयम् ॥ २ ॥
वस्तुतोऽङ्गस्यावयवो योऽभ्यास इति वर्णनात् ।
ऊर्णौ दीर्घोऽर्थापयतौ द्वयं स्यादिति मन्महे ॥ ३ ॥
चकास्तौ तूभयमिदं न स्यात्स्याच्च व्यवस्थया ।
णेर्विशेष्यं सन्निहितं लघुनीत्यङ्गमेव वा ॥ ४ ॥
इति व्याख्याविकल्पस्य कैयटेनैव वर्णनात् ।
णेरग्लोपेऽपि सम्बन्धस्त्वगितामपि सिद्धये ॥ ५ ॥
इति व्याख्यातकारिकासंग्रहः ।

(२) उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् ।
वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम् ॥
इति श्लोकाकारः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्यामि]ति अत्र ज्ञापकं चक्षिङो ङित्करणम् । तथा हि, चक्षिङो ङित्करणाऽभावेऽनुदात्तत्वादेवात्मनेपदसिद्धौ व्यर्थन्तदुक्तार्थं ज्ञापकम् । अस्य भाष्येऽदृष्टत्वात्पूर्वप्रकारेणैवोपपाद्यः। तदस्वीकर्तृणान्न एव स इति भावः ॥

ननु प्यायधातोर्लिटि (लिटि धातोरनभ्यासस्य)(लिड्यङोश्चे)ति सूत्राभ्यां युगपद्द्वित्वपीभावयोः प्राप्तौ परत्वाद्द्वित्वं बाधित्वाप्यायः पीभावे (सकृद्गतौ यद्बाधितं तद्बाधितमेव) इति न्यायेन पुनर्द्वित्वं न स्यादित्यत आह–पुनः प्रसङ्गविज्ञानात्पीशब्दस्य द्वित्वमिति–घटादिगणे येऽन्यविकरणा अनूद्यन्ते तेषां तत्तत्प्रयुक्ता एव विकरणाः । ये तु भ्वादिस्था एवानूद्यन्ते स्वतन्त्रा वा पठ्यन्ते तेषां शबेव । तेषु च येऽन्यत्राऽधीता इह पठ्यन्ते तेषामर्थनियमः । येत्विहैव पठ्यन्ते तेषामुपसर्गादिनाऽर्थान्तरपरत्वेपि मित्त्वमस्त्येवेति धातुवृत्त्यादिषु स्थितं तदेतद्ध्वनयन्नुदाहरति–विघटयतीति । ननु घटधातोर्मित्त्वे (कमलभवनोद्घाटनं) (१)प्रविघाटयितेत्यादयःप्रयोगा नोपपद्यन्त इतिचेन्न । चौरादिकस्यामितो घट सघात इति धातोरुक्तरूपाऽभ्युपगमेनोपपत्तेः। नच भ्वादिस्थस्यैवोक्तधातोरत्रार्थान्तरे मित्त्वार्थमनुवादाद्दोषस्तदवस्थ एवेति वाच्यम् । अहेतौ स्वार्थे णिचि ज्ञपादिपञ्चातिरिक्ताश्चुरादयो मितो नेत्यर्थक (नाऽन्ये मितोऽहेताविति) निषेधात् । अनुवादसामर्थ्येन मित्त्वबाधकल्पनापेक्षया स्वतन्त्रकल्पनस्यैव न्याय्यत्वात् । नच चुरादिपठितस्यैव घटधातोः षित्त्वार्थमिहानुवाद इति वाच्यम् । तथासति तत्रैव घटिषिति पठितुं युक्तत्वात् । ण्यासश्रन्थेति युचा एव प्राप्त्या षित्वे फले विशेषाऽभावाच्चेति भावः ॥

हलादिः शेषापवाद इति—यथास्थानिकहलादिः शेषापवाद इत्यर्थः। नचाऽभ्यासविकारे बाध्यबाधकभावाऽभावादिदमसंगतमेवञ्च वस्यैव सम्प्रसारणापत्तिरिति वाच्यम्। लिट्यभ्यासस्योभयेषामित्यत्रोभयेषांग्रहणसामर्थ्यात्सामान्यत एवाऽभ्यासलोपाभ्यासस्म्प्रसारणविषये तन्नायाऽप्रवृत्तिज्ञापनेनेहादोषात् । सम्प्रसारणं तदाश्रयञ्च कार्यं बलवदिति तूक्तसूत्रस्थोभयग्रहणवैर्थ्यापत्त्यां तत्सूत्रभाष्य एव प्रत्याख्यातमिति तदुपन्यासः केषाञ्चिद्युक्त एवेति दिक् ॥

केचिद्दृघटादौ [अत्स्मृदृत्वर] इति सूत्रे दीर्घस्थाने ह्रस्वं पठन्ति तन्नेति माधव इति । सूत्रे दीर्घान्तपाठस्यैव सर्वसम्मतत्वाद्दृघटादावपि दीर्घान्त एव सर्वैः पठ्यते । यद्ययं ह्रस्वान्तः स्यात्तदा दृदृ इति धातुद्वयेन दद्रतुरिति रूपद्वयसिद्धौ (शृदृप्रां ह्रस्वो वे) ति वैकल्पिकह्रस्वविधायके दृग्रहणस्याऽऽनर्थक्यं स्यात् । न च विदारणेऽर्थे रूपद्वयसिद्ध्यर्थं तत्र दृग्रहणस्यावश्यकत्वेन कथं वैयर्थ्यमिति वाच्यम् । धातूनामनेकार्थत्वेन समीहितरूपोपपत्तेरिति तदाशयः ॥

श्रा पाके, श्रै इति कृतात्वस्य श्रा इत्यादादिकस्य च सामान्येनानुकरणम् ।

---

(१) किरातार्जुनीयकाव्ये २ सर्गे भारवेरयं श्लोकः—
अभियोग इमान्महीभुजो भवता तस्य कृतावधेः ।
प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिव ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

[(१) लुग्विकरणालुग्विकरणयो रलुग्विकरणस्य] (२) लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति परिभाषाभ्यामिति—(स्वरतिसूति) इत्यत्र सूङिति पठितेनापि रूपद्वयोपपत्तौ सूतिसूयत्योः पृथग्ग्रहणं व्यर्थं सत्पूर्वपरिभाषां ज्ञापयति। द्वितीया तु न्यायसिद्धा। यद्यप्युक्तपरिभाषाद्वयस्य परस्परविरोधादिहाप्रवृत्तावपीष्टसिद्धिस्तथापीहोभयोरविशेषात्प्रवृत्तिरपि युक्तैवेति भावः॥

ननु निशामनशब्दस्य शम आलोचन इत्यस्मान्निष्पन्नत्वेन विचारार्थकत्वाद्दर्शनार्थकत्वं न स्यादित्यत आह—निशामनं चाक्षुषज्ञानमिति माधव इति-(अन्यमते ज्ञापनञ्च तदर्थः। ननूक्तशब्दस्यैतदर्थकत्वाभ्युपगन्तॄणाम्मते (श्लाघह्नुङ् स्था) इत्यत्र ज्ञीप्स्यमानो बोधयितुमभिप्रेत इति वृत्तिग्रन्थे सङ्गतेऽपि मारणादिकञ्च तस्यार्थः। एवञ्च माधवमतेऽप्युक्तग्रन्थस्य सङ्गतिः। ननु ज्ञाधातोर्ज्ञपधातोश्च णौ मित्वाद्ध्रस्वेन भाव्यमित्याशंकते—कथं विज्ञापना भर्तृष्विति—समाधत्ते—माधवमते चाक्षुषज्ञाने मित्वाऽभावादिति। एवञ्च ज्ञाधातोर्बोधनेऽर्थे ज्ञापयति, ज्ञपेस्तु ज्ञपयतीति माधवमते रूपद्वयं बोध्यम्॥ ननु अनुपसर्गस्यैव ज्वलादेर्वैकल्पिकमित्वं सोपसर्गस्य तु नित्यमेव एवञ्च प्रज्वालयतीत्यनुपपन्नमित्याह—कथं तर्हि प्रज्वालयति उन्नामयतीति। उत्तरयति—घञन्तात्तत्करोतीति णाविति।

ननु (नोदात्तोपदेश) इति प्रतिषेधात्क्रमेर्घञि क्रम इत्येवं नतु क्राम इति तथा च संक्रामयतीत्यनुपपन्नमित्याह-कथं संक्रामयतीति—समाधानमाह-'मितां ह्रस्व' इतिसूत्रे-वाचित्तविराग इत्यतो वेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणादितिवृत्तिकृदिति। एवञ्च क्वचित् णौ मितां ह्रस्व इत्यस्य न प्रवृत्तिरिति भावः। एतेन

इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम्।
रजोविश्रामयन् राज्ञां धुर्यान् विश्रमयेति सः॥

इति व्याख्यातम्। घञन्तात्क्रमशब्दात्प्रज्ञाद्यणि क्रामशब्दं स्वीकृत्य ततस्तत्करोतीति णाव्युक्तप्रयोगसिद्धिरिति केचित्।

ननु (न कम्यमिचमामि) त्यनेन दर्शनार्थे शाम्यतेर्मित्वाभावविधानेन दर्शनातिरिक्तार्थे मित्वाद्वक्ष्यमाणप्रयोगानुपपत्तिरित्याह—कथं तर्हि (३) निशामय तदुत्पत्तिमिति—चौरादिकस्य शम आलोचने इत्यस्योक्तरूपम्। नचैवं रीत्योक्तप्रयोगनिष्पत्तावपि

---

(१) स्वरतिसूतीतिसूत्रे सूङिति वक्तव्ये सूतिसूयत्योः पृथङ्निर्देशो हि परिभाषायां कैयटमते ज्ञापकः। अस्याः कार्यं साहचर्यपरिभाषया सम्पाद्य भाष्ये नेयं पठिता।

(२) लक्षणानुसन्धानपूर्वकं विलम्बोपस्थितिकं लाक्षणिकम्। तत्तद्विभक्तिविशेषाद्यनुवादेन विहितः शीघ्रोपस्थितिकः प्रतिपदोक्तस्तयोर्मध्ये प्रतिपदोक्तस्यैव ग्रहणम्। विलम्बोपस्थितिकत्वशीघ्रोपस्थितिकत्वयोरेव परिभाषायां वीजत्वम्। भुवश्च महाव्याहृतेरित्यत्र महाव्याहृतिग्रहणादनित्या चेयम्।

(३) सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः।
निशामय तदुत्पत्तिं विस्तराद्गदतो मम॥

अयं दुर्गासप्तशत्याः प्रथमश्लोकः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नार्थसङ्गतिरिति वाच्यम् । (१)शाम्यतिवद्धातूनामनेकार्थत्वात्तत्सङ्गतेरिति भावः ॥

ननु पै धातोर्लुङि अपासीदितीष्टरूपं न स्यात् (घुमास्थे) त्येतद्विहितेत्वापवादस्य 'एर्लिङी'त्येत्वस्य 'गातिस्थे'ति सिज्लुकश्च प्राप्तेरिति चेन्न । (लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमि)ति परिभाषयाऽऽत्वनिष्पन्नस्य वा इत्यस्य लाक्षणिकत्वात्ततः प्रतिपदोक्तस्य तस्य तत्तत्सूत्रे ग्रहणबोधनेनाऽनुपपत्तेरभावादित्याह—घुमास्थेतीत्वं तदपवाद एर्लिङीत्येत्वमिति ।

आदादिकोऽयमिति हरदत्तः फले तु न भेद इति । ननु गाधातोर्लेटि तत्स्थाने आतामि शपि गा आतामिति स्थितौ (वार्णादाङ्गं बलीयः) इति परिभाषया वर्णनिमित्तककार्यादङ्गनिमित्तककार्यस्य बलवत्त्वबोधनेन 'आतो ङितः' इत्यस्य दीर्घात्प्रागेव प्रवृत्तौ फलभेदस्य स्पष्टत्वात्तन्मूलोक्तमयुक्तमिति वाच्यम् । स्योन इति भाष्योदाहरणादुक्तपरिभाषानित्यत्वेन फलभेदाभावेन मूलोक्तस्य युक्तत्वात् । नचोक्तधातोश्शानचि मुकि फलभेद इति वाच्यम् । वार्णशास्त्रीयस्थानितासमानाधिकरणस्थानिताकत्वरूपसमानकार्यित्व एवोक्तपरिभाषाप्रवृत्त्यभ्युपगमेनादोषादिति भावः ॥

ननु (नेर्गदे)ति सूत्रे मारूपस्य ग्रहणात्तस्मिन्नुत्तरपदे उपसर्गस्थनिमित्तात्परस्य नस्य णत्वविधानादिह शिद्विषये आत्वाप्राप्त्या मारूपत्वाऽभावेनाऽशिद्विषये आत्वेऽपि तस्य लाक्षणिकत्वादग्रहणेन च गामादाग्रहणेष्वविशेषेऽपि मीनातिमिनोतीत्यादिना कृतात्वयोरपि ग्रहणापत्त्या तदनङ्गीकारेण च सर्वथा णत्वस्य दुर्लभत्वात्प्रणिमयते इति न स्यादत आह—अत्र घुप्रकृतिमाङिति पठित्वा ङितो माप्रकृतेरपि ग्रहणस्येष्टत्वादिति । घुश्च प्रकृतिश्च माङ्चेति द्वन्द्वे कस्य प्रकृतिरित्याकांक्षोदये सामीप्यात्पूर्वोत्तरयोरेवेति (दाधाघ्वि)ति सूत्रभाष्ये सिद्धान्तितत्वेन प्रणिदयत इत्यत्रेव तत्रापि णत्वं सुलभमिति दिक् ॥

षत्वपक्षे णत्वमिति । नन्विदमनुपपन्नं षत्वस्य पदद्वयापेक्षत्वाद्बहिरङ्गत्वेनासिद्धत्वादिति चेन्न । धातूपसर्गयोः कार्यमन्तरङ्गमित्यभियुक्तोक्त्या षत्वस्यान्तरङ्गत्वबोधनेन प्राक् प्रवृत्तेः । (पूर्वं धातूपसर्गेण युज्यते पश्चात्साधनेने)ति भाष्यमपि तत्र मानम् । पूर्वं धातोः साधनेन योगः पश्चादुपसर्गेणेति मतान्तरे तु नैव णत्वमित्यलम् ॥

ननु व्येञो लिटि णलि (न व्यो लिटी)त्यात्वनिषेधे द्वित्वे परत्वाद्धलादिः शेष इत्यनेनाऽभ्यासाऽवयवयकारस्य लोपे सम्प्रसारणाऽप्राप्त्या विव्यायेति रूपन्न स्यादत आह—परमपि हलादिः शेषं बाधित्वा यस्य सम्प्रसारणमिति—अत्र प्रमाणं (लिट्यभ्यासस्योभयेषामि)त्यत्रोभयग्रहणम् । वच्यादीनां ग्रह्यादीनाञ्च ग्रहणार्थमेव सूत्रे तद्ग्रहणमनुवृत्त्यैव सिद्धे व्यर्थं तद्ग्रहणं ज्ञापयति परमपीति भावः ।

इति भ्वादयः ॥

---

(१) यथा शाम्यतेर्निशामयतीत्यादौ दर्शने प्रयोगस्तथा चौरादिकशमधातोरपि श्रवणे वृत्तिर्भविष्यतीत्यर्थः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ तिङन्तेऽदादिप्रकरणम् ।

ऋतेरीयङ्—'वञ्चिलुञ्च्यृतश्चे'ति निर्देशात् 'कमेर्णिङ्' इति निर्देशाच्च इका निर्दिष्टस्तान्तोऽयं धातुर्नत्विकारान्तः । यत्तु ईयङोदीर्घोच्चारणात्तान्तोऽयं धातुः, इदन्तत्वे हि सवर्णदीर्घणैव सिद्धेरियङमेव कुर्यादिति, तन्न, 'एनरेकाच'इति याणापत्तौ सवर्णदीर्घस्य दुर्लभत्वात् । न च ऋतेर्यङ्विधौ (अकृत्सार्वे)ति दीर्घोपपत्तेरीयङ् विधानं तान्तत्वे लिङ्गं स्यादेवेति वाच्यम् । यङ्विधौ 'सन्यङोरि'ति द्वित्वापत्तोरिति भावः ॥

ननु जघस् अतुसिति स्थितौ 'गमहने'त्युपधालोपे तस्य 'अचः परस्मिन्नि'ति स्थानिवत्त्वेन व्यवधानात् खर्परत्वाऽभावाच्चर्त्वाऽप्राप्त्या जक्षतुरिति न सिद्ध्येदत आह—**गमहनेत्युपधालोपस्तस्य चर्विधिं प्रतीति**—'न पदान्त' सूत्रेण चर्त्वम्प्रतिस्थानित्वनिषेधात्सर्वमुपपन्नमिति भावः ॥

नतु हन्तेर्लोटि मध्यमपुरुषैकवचने हौ तस्मिन् 'हन्तेर्जः' इत्यनेन हनो जादेशे 'अतोहेः' इति हेर्लुग् दुर्वार इति शंकां सामाधत्ते-**अभीयतया जस्यासिद्धत्वाद्धेर्न लुगिति** । यत्तु सन्निपातपरिभाषयाऽपि हेर्लुको व्यावृत्तिः सम्भवतीति तन्न । 'अतोहेः' इत्यारम्भसामर्थ्यादुक्तपरिभाषाऽप्रवृत्तेरिति ॥

वधादेशोऽदन्त इति—तेनाऽऽदेशोपदेशकालेऽनेकाच्त्वेन अवधीदित्यत्र 'एकाच' इतिण्निषेधस्याऽप्रवृत्तावपि 'अतो हलादेः' इत्यनेनेडादौ सिचि प्राप्ताया वृद्धेरल्लोपस्य स्थानिवत्त्वेन व्यवधानाद्व्यावृत्तिरिति भावः ॥

अयं दर्शनेऽपीति—'विश्वारूपा अभिचष्टे शचीभिः' इत्यत्र दर्शनार्थत्वेन व्याख्यातत्वादिति भावः । **नुम् तु न अन्तेदित इति व्याख्यानादिति**—'इदितो नुम् धातोरि'ति नुम्विधौ 'गोः पदान्ते' इत्यतोऽन्त इत्यास्यानुवृत्त्याऽन्त्यावयवेकारेत्संज्ञकधातोरेव नुमिति भावः । एवञ्च नुमागमशंकोच्छेदाय चक्षिङ इकारस्थाने अकार एव वक्तुमुचित इति ॥

नतु अनुदात्तत्वेनैव तङः सिद्धौ ङकारोच्चारणं व्यर्थमित्यत आह—**ङकारस्त्विति** । इदं माधवाऽनुरोधेन । एतस्य मूलोक्तपरिभाषायां ज्ञापकत्वेन भाष्येऽनुपन्यासात्स्फायन्नित्यादिप्रयोगा असाधव एवेति परे ।

अत्र भाष्ये ख्शादिरयमादेश इति—अयम्भावः 'चक्षिङ ख्याञ्' इत्यनेन न चक्षिङः ख्याञादेशः किन्तु ख्शाञादेश एव, तेन पुंख्यानमित्यत्र न 'पुमः खय्यम्परे' इति रुत्वमित्यादि सन्धावेवोक्तम् । असिद्धकाण्डे (शस्य योवेति स्थितमि)नि तेन णत्वप्रकरणान्तरमिति शेषः । अत एव शकारेण व्यवायान्न 'कृत्य च' इत्यनेन पर्याख्यानमित्यत्र णत्वम् । नापि सुप्रख्येन निर्वृत्तं सौप्रख्यं तत्र भवः सौप्रख्यीय इत्यत्र यत्वासिद्धत्वेन 'धन्वयोपधादि'ति वुञ् किन्तु छप्रत्यय एवेत्यलम् ॥

नतु 'ईशीड्जनां सेध्वयोरि'त्येकयोगकरणेनैव प्रयोजनसिद्धे पृथग्योगकरणं व्यर्थमित्यत आह—**योगविभागो वैचित्र्यार्थ इति** । ध्वे इत्यस्य पूर्वयोगेऽपकर्षः । से इत्यस्योत्तरत्रानुवृत्तिरित्येवं विचित्रबोध इत्यर्थः । नच ईशेध्वे इडभावाय योगविभागस्यावश्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

-क्ततया वैचित्र्यार्थकथनमयुक्तमिति वाच्यम् । भाष्यविरोधात् । ईड्जनोर्ध्वे चेति भाष्यसम्मतपाठः ॥

ननु शासेराङ्पूर्वकत्वस्य नित्यत्वेन प्रशास्महे इत्यस्यानुपपत्त्या

इदं कविभ्यः पूर्वेभ्यो नमो वाकं प्रशास्महे ।
विन्देम देवतां वाचममृतामात्मनः कलाम् ॥

इति कविप्रयोगस्य का गतिरित्यत आह—आङ्पूर्वत्वं प्रायिकमिति । अत एवोक्तकविप्रयोगसङ्गतिः । नच प्रशास्महे इत्यत्रेच्छारूपार्थप्रतीत्यभावान्नास्य धातो रूपमिति वाच्यम् । धातूनामनेकार्थत्वात् । वचनं वाकः, वचेर्घञ् । नमोवाकं नमस्कारमिति यावत् । प्रशास्महे कुर्महे इति यावत् ॥

ननु लिङ्स्थानिकादेशस्य तिपः पित्त्वात्तस्य च(यडागम) परिभाषया याऽसुट्विशिष्टे सत्त्वात्तस्मिन् 'उतो वृद्धिर्लुकी'त्यनेन वृद्धिर्दुर्वारेत्यत आह—इह उतो वृद्धिर्न । भाष्ये पिच्च ङिन्न ङिच्च पिन्नेति व्याख्यानादिति—सार्वधातुकमपिदित्यस्यावृत्याऽस्य लाभः । ननु पूर्ववाक्येन ङित्त्वमपि दुर्लभमत आह—विशेषविहितेन ङित्वेन पित्त्वस्य बाधादिति ॥

ननु ऊर्णोतेर्लिटि णुशब्दस्य द्वित्वे उत्तरखण्डे णकारश्रवणं दुर्वारमत आह—नुशब्दस्य द्वित्वमिति—उपदेशे न एव न तु णः' स तु 'रषाभ्यामि'त्यनेन भवति, तस्य द्वित्वदृष्ट्याऽसिद्धत्वान्नुशब्दस्यैव द्वित्वम्' यद्बुद्ध्या शास्त्रप्रवृत्तिस्तदीयद्वितीयप्रयोगस्यैव साधुत्वान्वाख्यानान्नोत्तरखण्डे णकारश्रवणं पूर्वोच्चारेण व्यवधानाच्च न शास्त्रेण णत्वप्रसक्तिरिति भावः । ननु (पूर्वत्रासिद्धीयमद्वित्वे) इति परिभाषया णत्वस्यासिद्धत्वाऽभावबोधनाण्णकारस्यैव द्वित्वेनोत्तरखण्डे तच्छ्रवणं दुर्वारमेवेत्यत आह-(१) पूर्वत्रासिद्धीयमद्वित्वे इति त्वनित्यमिति—पूर्वत्रासिद्धमित्यधिकारे भवमित्यर्थः । गहादेराकृतिगणत्वाच्छः । यत्पूर्वत्राऽसिद्धीयं शास्त्रं तत्राद्वित्वे इत्यस्योपस्थितिस्तस्य च पुर्वत्रेत्यनेनान्वयाद्द्वित्वभिन्ने पूर्वत्र कर्त्तव्ये इदमसिद्धमित्यर्थः । द्वित्वं त्वन्यत्रासिद्धम्भवत्येव । अत्र द्वित्वशब्देनाविशेषात्षाष्ठाष्टमिकयोर्ग्रहणम् । परिभाषाऽनित्यत्वे प्रमाणमाह—उभौ साभ्यासस्येति—अन्यथा अन्धातोः 'अनिते' रित्यनेन कृतणत्वस्य द्वित्वे प्राणिणत् प्राणिणिषतीत्यादिसिद्धौ व्यर्थं सदुक्तसूत्रं परिभाषाऽनित्यत्वे ज्ञापकमिति भावः ॥

ननु 'एतेर्लिङि' इत्यनेनोपसर्गात्परस्येणोऽणो ह्रस्वविधानादभोयादित्यत्रापि ह्रस्वो दुर्वार इत्याशंक्य समाधत्ते—उभयत आश्रयणे नान्तादिवदिति—यथा द्वयोरेकः प्रेष्यस्ताभ्यां युगपद्भिन्नदेशकाय प्रेरितोऽविरोधार्थी न कस्यापि करोति कार्यन्तद्वत् पूर्वपरशब्दाभ्यामन्तादिशब्दाभ्याञ्च विरोधस्य स्फुटत्वाद्विरुद्धातिदेशस्य युगपदसम्भव इति भावः । नैतद्विषये स्थानिवद्भावप्रवृत्तिः, आनुमानिकस्थान्यादेशभावे विशिष्टस्य स्थानित्वेऽपि प्रत्येकं तयोः स्थानित्वे मानाभावात् वर्णयोरेव श्रौतस्यान्यादेशभावविधानाच्चेति बोध्यम् । नच भान्तस्य (एकदेशविकृत) न्यायेनोपसर्गत्वात्परादिवद्भावेनेकारस्ये-

(१) द्वित्वभिन्ने पूर्वत्र कर्त्तव्ये परशास्त्रमसिद्धमित्यर्थः । अत्र ज्ञापकं तु पूर्वत्रासिद्धमित्यधिकारभवं शास्त्रमेवेति । अनित्यत्वे ज्ञापकवर्णनं च मूले एव स्पष्टमिति बोध्यम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

णत्वाद्ध्रस्वो दुर्वार एवेति वाच्यम् । परिच्छिन्नपरिमाणार्थवाचकद्व्यादिद्रोणादिशब्दानां न्यूनाधिक्योरप्रवृत्तिवत्सर्वाद्युपादानेन क्रियमाणसंज्ञायाः शास्त्रव्यापारं विना न्यूनाधिकयोरप्रवृत्तिवच्च परिच्छिन्नपरिमाणे तदप्रवृत्त्या दीर्घविशिष्टे भान्ते च लौकिकन्यायेनोपसर्गत्वाऽभावादुपसर्गसंज्ञायाः परिच्छिन्नपरिमाणप्रादिगतत्वादिति भावः । अन्येतु लक्ष्यानुसारात्क्वचिदुक्तन्यायानाश्रयणाददोषः इत्याहुः ॥

ननु ब्रूतेर्लोटि सिपि 'ब्रुवः पञ्चानामि' त्याहादेशे आह सिप इति स्थितावाहः स्थानिवत्त्वेन ब्रूत्वात्ततः परस्य सिपः 'ब्रुव इडि'-ति इट् दुर्वार इत्यत आह—आत्थेत्यत्र झलीति थत्वविधानान्न भवतीति । 'आहस्थः' इत्यनेन सिप्रूपे झलि हस्य थविधानसामर्थ्यादिण् नेति कल्प्यते । अन्यथा सतीडागमे झलादित्वाभावात्तदप्राप्त्या आत्थेति रूपं न स्यादिति भावः ॥

ननु ब्रूतेर्लोटि तत्स्थाने मिपि तस्मिन्ब्रुवो गुणे मिप आनि तस्मिन्नवादेशे स्थानिवद्भावेन मिपः पित्त्वस्याऽऽनौ सुलभत्वादुक्तसूत्रेणेड्दुर्वार इत्यत्र आह—ङिच्च पिन्नेत्यपित्वादिणनेति । (ङच्च पिन्न पिच्च ङिन्ने)ति भाष्याद्विशेषविहितेनादिष्टङित्त्वेन पित्त्वस्य बाधात्पित्त्वाभावादेव नासाविति भावः ॥

ननु 'द्विर्वचनेऽचि' इत्यनेन द्वित्वनिषेधादिङ एव द्वित्वे उत्तरखण्डस्य गाऽऽदेशे अधीगे इति स्यान्नत्वधिजग इत्यत आह—लावस्थायामिति । एवञ्च गादेशस्य लिटो निमित्तत्वेन द्वित्वनिमित्ताज्निमित्तत्वाऽभावाद् द्विर्वचनेऽचीत्यस्याऽप्राप्त्या नोक्ताऽऽपत्तिरिति भावः । विवक्षिते चेति—लिटोविवक्षायामेवादेश इत्यर्थः । भाष्यकृन्मतमेतत्, एतन्मते त्वनैमित्तिकत्वेन सुतरामेव नोक्तसूत्रप्रवृत्तिरिति ॥

ननु पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेत्यभियुक्तोक्त्या अन्तरंगत्वाद्गुणादेः प्रागेव सवर्णदीर्घे यणि अध्ययै इति न स्यादत आह—गुणायादेशयोः कृतयोरुपसर्गस्य यणिति । अयम्भावः, 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेत्यस्य सुट्कात्पूर्व' इत्यत्र भाष्ये सिद्धान्तितत्वात्पूर्वं गुणादिरेव । ननु एतत्सिद्धान्तपक्षे भाष्यकृता स्वेनैव तत्रैवाऽरुचिः प्रदर्शितेत्यरुचेराह—'शेरध्ययने वृत्तमि'ति निर्द्देशाद्वेति । एतन्निर्देशान्न दीर्घाऽभावः कल्प्यते किन्तु भाष्यकृदुक्त एव । अपूर्वार्थकल्पनापेक्षया भाष्यसम्मतपक्षकल्पनस्यैव ज्यायस्त्वात् । नच [वार्णादांगं बलीयः] इति परिभाषयैव दीर्घव्यावृत्तिरिति वाच्यम् । समानाश्रय एवोक्तपरिभाषाऽप्रवृत्तेरिति दिक् ॥

अडागमे सत्यनेकाच्त्वाद्यणिति—कृताकृतप्रसंगित्वमात्रेणाऽटो नित्यत्वादियङ् बाधित्वाऽऽट् । अत एवाऽपरितोषात् असिद्धत्वादियङ एवौचित्यमित्यभिप्रायेण वा केचिदित्युक्तम् । लावस्थायामेवाडिति पक्षे तु यणेवेत्यलम् ॥

ननु 'तनादिकृञ्भ्य उः' इत्यस्य स्थाने 'तनादेरुः' इत्येव सूत्रकरणात्कृञोऽप्युप्रत्ययः स्यादेव सूत्रे कृञ्ग्रहणं व्यर्थमित्यत आह—तनादित्वादेव सिद्धे इति । तनादिसाहचर्येण तद्गणस्यैव कृञोऽत्र ग्रहणं क्रियासामान्यवाचित्वेनान्वययोग्यत्वात्तस्यैवात्रानुप्रयोगः । एवञ्च कृञ्ग्रहणं व्यर्थं सद्गणकार्यस्यानित्यत्वे ज्ञापकम् । तथा च विश्वसेदित्यत्र न शपो लुगिति । भाष्यकृता तु कृञ्ग्रहणस्य प्रत्याख्यातत्वाज्ज्ञापितेऽपि तस्य चारितार्थ्याऽभावाच्चात्रार्थे तात्पर्यं न युक्तम् । उक्तप्रयोगस्त्वार्षत्वादेव समाधेय इत्यलम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ख्याधातुः सार्वधातुकमात्रविषय इति—अत्र प्रमाणमाह-(सस्थानत्वं नमः ख्यात्रे) इति वार्तिकम् । नमः ख्यात्रे इत्यत्र सस्थानत्वं वक्तव्यम् । अन्यथा 'शर्परे विसर्जनीय' इत्यनेन विसर्गः स्यादिति तदभिप्रायः । आर्द्धधातुकेऽप्यस्य प्रयोगे छृदन्तेऽस्मिन्परे 'शर्परे विसर्जनीय' इत्यस्याऽप्रवृत्त्या 'कुप्वोरि'ति जिह्वामूलीयो दुर्वार एव स्यात् । कुप्वोरित्यस्य 'विसर्जनीयस्य स' इत्यस्यापवादत्वमजानतो वार्तिककृत उक्तिरिति न वाच्यम् । ख्याञादेशस्य खशादित्वप्रयोजनगणनावसरे एव तदुक्तेरिति । संख्यातीति प्रयोगस्तु नास्त्येव । संख्येति प्रयोगस्तु न्यासकृन्मते ख्याञा देशस्येति बोध्यमिति ॥

चर्करीतं चेति—चर्करीतमिति यङ्लुकः संज्ञा, तेन सामर्थ्यात्तदन्तग्रहणम् । अदादाविति । तेन यङ्लुगन्ताच्छपेव नतु तत्तद्गणप्रयुक्तः श्यनादिः । शपो लुक् च, परस्मैपदिन उपक्रम्य पाठादस्य परस्मैपदित्वमेवेति ।

इत्यदादिप्रकरणम् ॥

अथ तिङन्ते जुहोत्यादिप्रकरणम् ।

ननु आलोपस्य स्थानिवत्त्वाज्झपन्तत्वाऽभावेन धत्त इत्यादावपि भष् भावो न स्यादत आह—वचनसामर्थ्यादालोपस्य न स्थानिवत्त्वमिति।। अन्यथोपायसद्भावाद्वचनसामर्थ्यकल्पनं न युक्तमित्याह—वस्तुतस्तु पूर्वत्रासिद्धे न स्थानिवदिति । एवञ्च वामनादीनां वचनसामर्थ्याश्रयणं व्यर्थमेवेति भावः ॥

ननु 'विज इडि' ति सूत्रे सामान्यतो विजधातोरुपादानादर्थनिर्देशाभावाच्चैतद्गणपठितस्यापि धातोस्तत्र ग्रहणात्ततः परस्येटो ङित्वविधानाल्लुडादौ गुणनिषेधः स्यादत आह—ओविजीत्यस्यैव तत्र ग्रहणादिति । व्याख्यानात्तौदादिकस्य रौधादिकस्यैव च ग्रहणान्नेह काप्यनुपपत्तिरिति भावः ॥

पेय इति—ऋधातोर्लिङि द्वित्वेऽभ्यासस्येत्वे इयङि उत्तरखण्डे गुणे रपरत्वे हल्ङ्यादिलोपे विसर्गे आटि वृद्धौ रूपम् । लावस्थायामडिति पक्षेऽपि 'बहुलं छन्दस्यमाङि' सूत्रे बहुलग्रहणात्तदुत्तरमत्राऽऽट् 'बहुलं छन्दसी'त्येव सिद्धे 'अर्तिपिपर्त्योश्चे' त्यत्रार्त्तिग्रहणज्ञापकेन लोके प्रयोगेऽपि छान्दसप्रकरणे पाठात्क्वचिदेव लोके साधुत्वमिति बोध्यम् ।

इति जुहोत्यादिप्रकरणम् ॥

अथ तिङन्ते दिवादिप्रकरणम् ।

ननु सूधातोर्लिटि तत्स्थाने थासि तस्य से द्वित्वे उवङि सुषुव् से इति स्थितौ 'स्वरति सूति' इत्यनेन प्राप्तस्य वैकल्पिकेडागमस्य पुरस्तात्प्रतिषेधारम्भसामर्थ्यात् 'श्र्युकः किती' ति निषेधेन क्रादिनियमादिटि सुषुविषे इत्यादि सिद्धमिति भावः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्ञाजनोर्जा—ज इति ह्रस्वोच्चारणेऽपि 'अतो दीर्घो यञि' त्रि दीर्घं जानातीत्यादि-सिद्धौ जाग्रहणस्य (अङ्गवृत्तौ पुनर्वृत्तावविधिः) इत्येतज्ज्ञापकत्वम्, तेन पाधातोः पिबादेशे कृते न गुणः । पिबादेशस्यादन्तत्वाश्रयणेन गुणवारणन्तु समाधानान्तर-मिति भावः ॥

ननु 'शल इगुपधादनिटः क्स' इत्यनेन क्सस्य सिद्धत्वे तत्सूत्रविहितक्सस्य किं फलमित्यत आह—पुषाद्यङपवाद इति ॥

ननु श्लिष इत्येतद्विहितक्सस्य पुषादिसूत्रविहिताङपवादत्ववच्चिणपवादत्वमपि स्या-दत आह-पुषाद्यङपवादो न तु चिणः पुरस्तादपवादन्यायादिति। (१)(पुरस्ता-दपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरानि) ति तत्स्वरूपम् । तथा च पुरस्तादपवादस्य क्सस्य अनन्तरस्याङ एवापवादत्वं न तूत्तरस्य चिण इति भावः ॥

ननु 'आलिङ्गने' इत्यस्य (अनन्तरस्य विधिर्वा भवति प्रतिषेधो वे) ति न्यायेन श्लिष इत्येतद्विहितक्सस्य नियमत्वमेव स्यादत आह—योगविभागसामर्थ्याच्छल इगुपधादित्यस्याप्ययं नियम इति । यदि श्लिष इति प्राप्तक्सस्यैव नियमः स्यात्तदा योगविभागस्य वैयर्थ्यमेव स्यादिति भावः ॥

इति दिवादिप्रकरणम् ॥

अथ तिङन्ते स्वादिप्रकरणम् ।

बभूथाततन्थेति—ननु क्रादिनिषेधादेव सिद्धे ववर्थग्रहणं निगमे एवेति नियमार्थ-न्तदाह—तेन भाषायां थलीडिति ।

श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वेति व्याकरणान्तरमिहाप्याश्रीयत इति । 'सदेः परस्य लिटी' ति सूत्रस्थः (परिषस्वजे) इति भाष्यप्रयोगः, 'अत एक हलि, ति सूत्रस्थो (देभतुरि)ति भाष्यप्रयोगश्चेह मानम् । (दम्भेश्चे)ति 'अत एके' ति सूत्रस्थं वार्त्तिकम् ॥

इदं कित्त्वं पिदपिद्विषयकमिति सुधाकरादय इति—अत्रारुचिबीजन्तु श्र-न्थिग्रन्थीत्येव लिट्पदस्य कित्पदस्य च कर्त्तव्यतापत्त्या गौरवरूपम् । मम तु व्याकरणा-न्तरेऽपि असंयोगादिति कित्प्रकरण एवैतदिति तयोरकर्त्तव्यत्वं स्पष्टमेव । अत एव भाष्ये प्रथमोपस्थितणलं विहाय देभतुरित्युदाहृतं दम्भेश्चेत्येत्वविधायके इत्यलम् ॥

इति स्वादिप्रकरणम् ।

---

(१) प्रथमोपस्थितापवादशास्त्राणि पश्चादुपस्थितविधिशास्त्राणि बाधन्ते इति परिभाषा-र्थः । पूर्वोपस्थितानन्तरबाधेन चारितार्थ्यसम्भवे पश्चादुपस्थितबाधे मानाभाव एवात्र बीजम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ तिङन्ते तुदादिप्रकरणम् ।

ननु रमित्यस्य मित्त्वादन्त्यादचः परत्वेन विधानात् (रस्जो रोपधयोरमन्यतरस्यामि)तिसूत्रे रोपधयोरिति षष्ठीनिर्देशो व्यर्थ इत्यत आह—स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिरिति । अयम्भावः, स्थानं हि प्रसङ्गः । तेन रोपधयोः प्रसंगे रम् प्रयुज्यत इत्यर्थः । प्रयुज्यमानो रम् मित्त्वादन्त्यादचः पर एव । देशान्तरे यस्य विधानं नास्ति तस्य स्थानिदेश एव विधानं युक्तम् । स्थानषष्ठीनिर्देशसामर्थ्याच्च देशान्तरे प्रयुज्यमानस्यापि रमो रोपधोर्निवर्त्तकत्वम् । तस्मात् श्नमः प्रत्ययागमत्वे इव रमादेशागमत्वे द्वेऽपीष्टे इति ॥

ननु आशीर्लिङि सम्प्रसारणं बाधित्वा परत्वाद्रमि(सकृद्गति) न्यायेन सम्प्रसारणाऽभावे (१)(पुनः प्रसङ्गविज्ञानात्सिद्धमि)ति न्यायेन सम्प्रसारणेऽपि आद्गुणे भर्ज्यादित्यापत्तिरित्यत आह [क्ङितिरमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेनेति । सम्प्रसारणरमोर्भृज्जति भ्रष्टेत्यादावनवकाशादिति भावः । कृताकृतप्रसङ्गित्वमात्रेण सम्प्रसारणस्य नित्यत्वमपि सुवचम् । नच ऋकारान्तर्गतरेफमादाय रमोऽपि नित्यत्वमिति वाच्यम् । वर्णग्रहणे वर्णैकदेशाग्रहणस्य भाष्ये स्पष्टत्वादिति दिक् ॥

ननु यस्य तुकि तस्य श्चुत्वेन चकारे लिटि द्वित्वेऽभ्यासकार्ये 'ऋच्छती' ति गुणे त्रिहल्त्वान्नुट् न स्यादत आह—द्विहल्ग्रहणस्याऽनेकहल्उपलक्षणत्वान्नुडिति ॥ न द्विहल्ग्रहणस्यानेकहल्उपलक्षणत्वे प्रमाणाभावात्कथन्तत्र नुडिति वाच्यम् । अदुपधस्य चेदश्नोतेरेवेति नियमाद्द्विहल्ग्रहणस्य प्रत्याख्यानं कुर्वतो भाष्यकारस्यैव तत्र प्रमाणत्वेन तदुपपत्तेः । न च (२) (वार्णादाङ्गं बलीयः) इति परिभाषया गुणे तुकोऽप्राप्त्या त्रिहल्त्वाऽभावादुक्ताऽनुपपत्त्यभावेन द्विहल्ग्रहणस्यानेकहल्उपलक्षणत्वाऽभ्युपगमो व्यर्थ एवेति वाच्यम् । 'च्छ्वोः शूडनुनासिके चे'त्यत्र सतुङ्निर्देशेनोक्तपरिभाषायास्तुग्विषयेऽनाश्रयणादिति दिक् ॥

म्रियतेर्लुङ्लिङोश्च । ङित्त्वं स्वारार्थमिति । 'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमि'त्यनेन 'माहि मृते'त्यत्र ङितः परस्य लादेशसार्वधातुकस्यानुदात्तत्वे कृते धातोरुदात्तत्वम् । सत्यङित्वे तु प्रत्ययस्योदात्तत्वे धातोरनुदात्तत्वं स्यात् । न च सिज्लोपस्यासिद्धत्वाल्लसार्वधातुकस्य ङितः परत्वस्य दुरुपपादत्वात्कथं तस्यानुदात्तत्वमिति वाच्यम् । ङित्त्वसामर्थ्येन सिज्लोपस्यासिद्धत्वाऽभावज्ञापनात् । अमृतेत्यत्राऽडागमस्यैवोदात्तत्वेन नान्यत्किञ्चित्प्रयोजनं मृङो ङित्त्वस्येति तत्राऽट्वारणाय माङः प्रयोगे 'तिङ्ङतिङ' इति तिङन्तनिघातेऽपि ङित्त्वं व्यर्थमेवेति हिशब्दप्रयोगः, तत्प्रयोगे तु 'हि चे' त्यनेन तिङन्तनिघातनिषेधादिष्टस्वरसिद्धिरित्यलम् ॥

---

(१) तुल्यबलपुरुषद्वयस्यैको भृत्यः पर्यायेण कार्यसम्पादको भवति न युगपन्नानादिक्षु च कार्ये प्रेषितः, तथा लक्ष्यप्रयोजनस्यापि शास्त्रद्वयस्य कुत्रचिल्लक्ष्ये युगपत्प्रवृत्त्यसम्भवेनाऽप्रतिपत्तौ सत्यां परविध्यर्थमिदं विप्रतिषेधसूत्रम् । कृते च तस्मिन् पूर्वशास्त्रप्राप्तौ सत्यां तदपि भवत्येवेति मूलोक्तन्यायसिद्धिः । (२) वर्णोद्देश्यककार्यादङ्गोद्देश्यककार्यं बलवदित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु तृपेर्लुङि (स्पृशमृशे) ति सिज् विकल्पः कुतो नेत्यत आह—स्पृशमृशेतिसिज्विकल्पः पौषादिकस्यैव अङपवादत्वादिति । (उत्सर्गसमानदेशा अपवादाः) इति न्यायादिति भावः । किञ्चोक्तवार्त्तिके पौषादिकतौदादिकयोर्ग्रहणे पक्षे सिजभावे च्लेरेव श्रवणोपपत्तौ 'च्लिः क्वापि न श्रूयत' इति भाष्यविरोधो दुर्वारः स्यादित्यलम् ॥

ननु (१)(पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः) इति परिभाषया परत्वादियङः प्राग्लघूपधगुणः स्यादत आह—अन्तरंगत्वादियङिति । (२)(नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिरि) ति निषेधादन्तरङ्गपरिभाषाऽप्रवृत्त्या दोषस्य तादवस्थ्यमेवेति वाच्यम् । गुणेयङोः समकालप्राप्तिकत्वेनोक्तनिषेधपरिभाषाऽप्रवृत्तेरिति भावः ॥

इति तुदादिप्रकरणम् ।

अथ तिङन्ते रुधादिप्रकरणम् ।

जश्त्वं णुत्वमित्यादि । अत्र प्रक्रियाप्रदर्शनमात्र एव तात्पर्य्यम्, नतु क्रमदर्शने । शिण्ढीति सानुस्वार एव पाठः, अनुस्वारस्याऽऽदिष्टादचः पूर्वत्वेन स्थानिवत्त्वाप्रवृत्तावपि (दीर्घादाचार्याणामि) त्युत्तरं (अनुस्वारस्य ययि) (वा पदान्तस्य) (तोर्लि) (उदःस्था) (झयो हो) (शश्छोऽटी)ति षट्सूत्रीपाठोत्तरं (झलां जश्झशि) (अभ्यासे चर्च) (खरि च) (वाऽवसाने) (अणोऽप्रगृह्यस्ये)ति पञ्चसूत्रीपाठ इति भाष्यसम्मताष्टाध्यायीपाठपक्षे परसवर्णदृष्ट्या (झरो झरि) त्यस्य (झलां जशि) त्यस्य चाऽसिद्धत्वेन यय्परत्वाऽभावात्परसवर्णाऽप्राप्तेरिति ।

इति रुधादिप्रकरणम् ।

अथ तिङन्ते तनादिप्रकरणम् ।

(३) संज्ञापूर्वको विधिरनित्य इति न भवतीत्यात्रेयादय इति । अत्रारुचिबीजन्तु तनित्यत्वे भाष्यानुक्तत्वमेव ॥

ननु कात्पूर्वग्रहणं कालावधारणार्थं तदा सुट् भवति यदा कृतः कात्पूर्वो भवतीति तेनान्तरङ्गमपि द्वित्वादिकं बाधित्वा पूर्वं सुडिति 'अड्भ्यासव्यवायेऽपी'ति न कार्य्यमिति तत्प्रत्याख्यातं कात्पूर्व इत्यपि प्रत्याख्यातम्भाष्यकारेणेत्यत आह—पूर्वं धातुरिति । उपसर्गेणेत्यस्य तदर्थेनेत्यर्थः । अत एवाऽनुभूयत इत्यत्र कर्मणि लकारसिद्धिः एवञ्चा-

---

(१) बलवत्त्वप्रयोजकपरिभाषाप्रकरणस्थेयं परिभाषा । अर्थस्तु पूर्वशास्त्रात्परं शास्त्रं बलवत् विप्रतिषेधसूत्रबलात् । परशास्त्रान्नित्यं शास्त्रं बलवत् । नित्यशास्त्रादन्तरङ्गशास्त्रं बलवत् । अन्तरङ्गशास्त्रादपवादशास्त्रं बलवत् इति । पूर्वात्परं बलवत् स्वोत्तरत्वादित्याद्यनुमानप्रकारो बोध्यः ।

(२) अज्निष्ठान्यानन्तर्यनिमित्तकेऽन्तरङ्गे कर्त्तव्ये यदन्तरङ्गप्राप्तिस्तत्र च कर्त्तव्ये न बहिरङ्गत्वप्रयुक्तासिद्धिरित्यर्थः । अत्र षत्वतुकोरिति सूत्रस्थं तुग्ग्रहण ज्ञापकम् ।

(३) विधेयताप्रयोजकसंज्ञाशब्दघटितं शास्त्रमनित्यमित्यर्थः । इयं परिभाषा भाष्ये नोक्ता भाष्यकृतेति ध्येयम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न्तरङ्गार्थकोपसर्गनिमित्ताद्वृद्धिर्वाद्यपेक्षया सुडन्तरङ्ग इति तदाशयः। लावस्थायामडिति-पक्षे तु सम्परिभ्यां परत्वयोग्यस्य करोतेः सुडिति तदर्थान्सर्वथा पूर्वं सुडित्यदोषः॥

ननु 'समवाये चे'त्यनेन सम्पूर्वकस्य करोतेर्भूषणसंघातयोरर्थयोरेव सुटो विधानादन्यार्थे तद्विधानेन 'संस्कृतं भक्षा' इति सूत्रमसङ्गतिमाप्नुयादित्यत आह—सम्पूर्वस्य क्वचिद्भूषणेऽपि सुडिति। अत्रार्थेऽवतरणदलोक्तसूत्रस्यैव ज्ञापकत्वमित्यवसेयम्॥

इति तनादिप्रकरणम्।

अथ तिङन्ते क्र्यादिप्रकरणम्।

अवष्टभ्नोति। ननु [वेः स्कभ्नातेर्नित्यमि] ति सूत्रे श्नाप्रत्ययनिर्देशेन श्नाप्रत्ययसद्भाव एव षत्वस्य न्याय्यत्वेन श्नुप्रत्ययपक्षे षत्वं कथमिति चेन्न। धातुनिर्देशे श्तिप्प्रत्यये कृते विकरणस्यावश्यकत्वेन शवपवादश्नुश्नाप्रत्ययप्रवृत्तेरवश्यंस्वीकार्यत्वात्तत्राऽन्यतरोच्चारणस्य साधुत्वार्थत्वेनेतरनिवृत्त्यर्थत्वानभ्युपगमादिति भावः॥

दीर्घनिर्देशसामर्थ्यान्न ह्रस्व इति। ननु ज्ञाजनोर्जा इत्येव सूत्रकरणे (अतोदीर्घो यञी) ति दीर्घसिद्धौ दीर्घग्रहणस्य (१)(अङ्गवृत्तौ पुनर्वृत्तावविधिरि)ति परिभाषाज्ञापकत्वस्याऽऽकरे स्थितत्वाद्दीर्घनिर्देशस्योपक्षयेन कथं ह्रस्वाभावे ज्ञापकत्वमिति चेन्न। सत्येव ह्रस्वाभावे दीर्घनिर्देशस्योक्तपरिभाषाज्ञापकत्वात्। सनि ह्रस्वे तु पुनरंगकार्यस्य प्रवृत्तत्वान्न ज्ञापकत्वम्। एवञ्च न ह्रस्वाभावज्ञापने किमपि बाधकमिति भावः॥

इति क्र्यादिप्रकरणम्।

अथ तिङन्ते चुरादिप्रकरणम्।

तेषामिह ग्रहणं प्रपञ्चार्थमिति। (२)(अनिर्दिष्टार्थाः स्वार्थे भवन्ती) ति परिभाषया स्वार्थे विधानार्थत्वात्प्रपञ्चार्थत्वकथनं तेषामयुक्तमिति वाच्यम्। सत्यशब्दस्य कृञर्थं णिच्यापुगित्यर्थक (सत्यस्य कृञ्यापुगि) ति भाष्यविरोधात्। न च सत्यापग्रहणस्याऽऽपुङ्निपातनार्थमावश्यकत्वमिति वाच्यम्। अर्थवेदार्थभाष्यके वार्तिक एवोक्तशब्दग्रहणेनापुग्सिद्धेरिति भावः॥

ननु चितेरिदित्करणं व्यर्थमित्यत आह—चिन्तेति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिङ्गमिति। अयम्भावः व्यर्थमिदित्करणं चुरादेर्णिज्वेति ज्ञापयति। णिचो नित्यत्वे तु तेन व्यवहितत्वान्नलोपाप्राप्त्या व्यर्थमेवेदित्करणं स्यात्। न च णिजन्तात्क्विपि नलोपाभावार्थमिदित्करणस्य चारितार्थ्यम्। न च णिलोपस्य स्थानिवद्भावेन व्यवधानादेव नलोपवारणमिति वाच्यम्। [क्वौ विधौ न स्थानिवदि] ति स्थानिवत्त्वनिषेधेन दोषस्य तादवस्थ्यादिति वाच्यम्। 'असिद्धवदत्राऽभादि'ति णिलोपस्यासिद्धत्वेन क्वौ वि-

---

(१) अङ्गवृत्तेऽङ्गाधिकारकार्ये जाते पुनरन्यस्याऽगंकार्यस्य विधानं न भवतीत्यर्थः। ज्यादादीयस इत्याद्विधानेन ज्ञापिता चेयम्। द्वयोरिति निर्देशादनित्या च।

(२) येषां प्रत्यायानामार्थो न निर्दिष्टास्तेषां स्वार्थे विधानं भवतीत्यर्थः। प्रत्यय इति महासंज्ञाबलादर्थाकांक्षायामन्यानुपस्थितिरेवास्या बीजम्, स्पष्टाचेयं सुपिस्थ इत्यादिसूत्रेषु भाष्ये।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धावित्यस्य क्विशब्दमुच्चार्य विहितविधिविषयत्वेनादोषात्। न च क्वौ लुप्तं न स्थानिवदि-ति स्थानिवद्भावनिषेधात्क्विबन्ते दोषाऽभावार्थमिदित्करणस्यावश्यकत्वे ज्ञापकत्वायोग इति वाच्यम्। तस्यासार्वत्रिकत्वादिति प्राञ्चः। तन्त्रिमत्र्यादाविदित्त्वस्य व्यभिचरितत्वा-त्क्वौ लुप्तमित्याश्रयणे ज्ञापकत्वौचित्याच्चिन्त्येति पाठेऽर्धमात्रागौरवाच्च न णिचूशास्त्रबाधे मानमिति न भाष्यकृता णिचो वैकल्पिकत्वमुक्तन्नापि कैयटकृतेत्यपि बोध्यमिति प्राहु-र्नागेशाः।

एतच्च ज्ञापकं सामान्यापेक्षमिति। सर्वेऽपि चुरादयो धातवो विकल्पेन णिचं लभन्त इत्यर्थकमिदित्करणं ज्ञापकमित्यर्थः। न च ज्ञापकस्य सामान्यापेक्षत्वे 'आधृषाद्वे' त्यस्य वैयर्थ्यं सर्वचुरादीनां वैकल्पिकणिज्ज्ञापनेनैतसूत्रविहितवैकल्पिकणिचोऽकिञ्चित्क-रत्वादिति वाच्यम्। ज्ञापकसिद्धस्याऽसार्वत्रिकत्वेन सार्थक्यात्। एवञ्चास्मिन्पक्षे आधृ-षीयाणामेवैच्छिको विकल्पः, ज्ञापकस्य सामान्यापेक्षत्वादेव वृत्तिकृदुदाहृतस्य जागाणे-त्यादेः संगतिः। अन्यथोक्तप्रयोगानुपपत्तिः। अन्येषां तु शिष्टप्रयोगानुपपत्तिः। अन्येषां शिष्टप्रयोगाद्व्यवस्थित इति एतत्पक्षस्य [भाष्यविरुद्धत्वं] दर्शयति, तथा हि ज्ञापकस्य सा-मान्यापेक्षत्वे 'घुषिरविशब्दने' इति सूत्रस्थभाष्यं विरुणद्धि, तत्र हि, विशब्दनार्थस्योक्त-धातोश्चुरादित्वेन नित्यणिजन्तत्वाद्भूवादेश्चाऽ विशब्दनार्थ एव वृत्तेः सूत्रेऽविशब्दन इति व्यर्थमित्याशंक्य, एतदेव ज्ञापयति घुषेर्विशब्दने विभाषा णिच् तेन जुघुषिरिति सिद्ध-मित्युक्तम्, अत एव चुरादाविरित्वमति सार्थकम्॥

विशेषापेक्षमिति। असंयोगोपधेकारान्तचुरादेर्णिचो विकल्प इत्येवं रूपमित्यर्थः। ज्ञापकस्य विशेषापेक्षत्वादेव, 'आधृषाद्वे' त्यस्य चरितार्थ्यम्। न च पूर्वपक्षस्य शैथिल्ये वृत्तिकृदुक्तग्रन्थस्य कथं सङ्गतिरिति वाच्यम्। भ्वादेराकृतिगणत्वेन तत्रत्यधातोरुक्त-रूपोपपत्तेः॥

यत्तु इदित्करणाद्यन्त्रतीति माधवेनोक्तं तच्चिन्त्यमिति। नस्योपधत्वाऽभा-वेन नलोपाऽप्रसक्त्या ज्ञापितेऽपि चारितार्थ्याऽभावादिति भावः॥

नतु ह्रस्वोच्चारणेऽपि परतीत्यादिरूपसिद्धावुक्तरूपसिद्ध्यर्थं कथं दीर्घोच्चारणं णिचो वैक-ल्पिकत्वं ज्ञापयतीत्याह—**दीर्घोच्चारणं णिचः पाक्षिकत्वे लिंगमिति।**

इररारामपवाद इति। ऋकारोपधे (उपधायाश्चे)चि सूत्रेणाऽचीकृतदित्यादाविर प्राप्तः। अमीमृजदित्यत्र 'मृजेर्वृद्धिरि' त्यनेनाऽऽर् प्राप्तः। इतरेषामृदुपधानां अपीपृथदि-त्यत्राऽऽर् प्राप्त इति विवेकः। ननु इह उरित्यनूद्यमानः सवर्णान् गृह्णाति। ऋदिति विधी-यमानो न तान् गृह्णाति। तथाच, अचीक्लृपदित्यत्र 'उर्ऋत्' इत्यनेन सति ऋवर्णे अची-क्लृपदित्यापत्तिरिति चेन्न। लत्वस्यासिद्धत्वेन प्राक् उर्ऋत् इत्यस्य प्रवृत्त्या पश्चात् 'कृपो रोलः' इत्यनेन ऋकारैकदेशस्य लादेशविधानेनेष्टसिद्धेरित्यलम्॥

ननु अत उपधाया इत्यनेन कथयतीत्यत्र वृद्धिर्दुर्वारेत्यत आह—**अल्लोपस्य स्थान-वत्त्वान्न वृद्धिरिति।** अचः परस्मिन्निति सूत्रेणेत्यर्थः। नच स्थानिनि सति यत्कार्यं तस्यैव स्थानिवदित्यनेनातिदेशो नत्वादेशप्रयुक्तकारणम्। अन्यथा नायकः पावक इत्यादेर्न सिद्धिस्तथा चोक्तदोषस्तदवस्थ एवेति वाच्यम्। अचः परस्मिन्नित्यत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्थानिवदित्यनुवृत्त्या शब्दाधिकारपक्षाश्रयणात्स्थानिनि सति यन्न भवति तदादेशेऽपि न, स्थानिनि सति यद्भवति तदादेशेऽपीति भावातिदेशस्य सिद्धान्तितत्वेन स्थानि सत्यभवन्त्या वृद्धेरादेशेऽप्यभावात् । उक्तद्विविधातिदेशे न पदान्तसूत्रस्थयलोपादिग्रहणस्यैव प्रामाण्यमित्यलम् ॥

ननु ऊन धातोर्णिचि तदन्ताल्लुङि तत्स्थाने तिपि पकारेकारयोरित्वे लोपे च मध्ये च्लौ तत्स्थाने चङि आडागमे आ ऊन इ अदितिस्थितौ णिचो द्वित्वनिमित्तत्वाऽभावेन ('द्विर्वचनेऽची') त्यस्याऽप्राप्त्या द्वित्वात्परत्वादन्तरङ्गत्वाच्च कृतेऽल्लोपे निशब्दस्य द्वित्वे औननदितीष्टरूपाऽनापत्तिरित्यत आह—ओःपुयणजीति । विभावयिपति, अबीभवदित्यादावन्तरङ्गत्वाद्वृद्धावादेशे (सन्यत) इत्येव सिद्धं पूङ्यौतेश्च सनि (स्मिपूङ्रञ्ज्वशां सनि) सनीवन्तर्द्धभ्रस्जदन्भे)त्यादिनेटि द्वित्वनिमित्तसत्त्वात् (द्विर्वचनेऽची)ति सूत्रप्रवृत्त्या पूर्वं गुणाभावादभ्यासे उकारसद्भावेऽपि पिपविपते यियविपतीत्यत्रेत्त्वर्थं पयोरित्येव वाच्यम् । नच पिपविपत इत्यादौ गुणाऽवादेशयोः (अचः परस्मिन्नि)ति स्थानिवद्भावेनाऽवर्णपरयकारादिपरत्वाऽभावादित्वं न स्यादिति वाच्यम् । पयोरित्येतत्सूत्रारम्भसामर्थ्येन स्थानिवद्भावाप्रवृत्तेः; एवञ्च व्यर्थीभूतं वर्गादिग्रहणं णिचो द्वित्वनिमित्तत्वाऽभावे तन्निमित्तकाऽजादेशस्य द्वित्वे कर्त्तव्ये निषेधं ज्ञापयति, ज्ञापनफलं तु तुतावयिपति, अतूतवत्, ऊर्णनावयिपति, और्णुनवत्, पुस्फारयिषति, अपुस्फुरदिति । न च (ओःपुयणजी)ति सूत्रे णिचीत्याऽसत्त्वात्कथं णिच्यजादेशो नेत्यर्थलाभ इति वाच्यम् । द्वित्वनिमित्तेऽचि नाऽजादेशः स्थानिवदित्यर्थक'द्विर्वचनेऽचीत्यस्य (येन नाव्यवधानमि)ति न्यायेन एकवर्णव्यवधाने प्रवृत्त्या तल्लाभात् तेनाऽपूर्वनिषेधाज्ज्ञापनात् । अत एव दिववनीयिषतीत्यादौ नाऽतिप्रसक्तिः । तथा च द्वित्वनिमित्तेऽजादौ प्रत्यये एकप्रत्ययातिरिक्ताव्यवहिते परे तदन्यतरनिमित्तकादेशो नेति 'द्विर्वचनेऽची'त्यस्यार्थः फलित इति भावः । ननु उक्तरीत्योक्तज्ञापनेनाऽचिकीर्त्तदित्यत्र पूर्वं 'उपधायाश्चे'तीत्वमपि न स्यादत आह—यत्र द्विरुक्ताविति । ज्ञापकसाजात्याद्यत्र द्वित्वेभ्यासोत्तरखण्डस्याद्योऽच् प्रक्रियायां परिनिष्ठितरूपे वाऽवर्णो लभ्यते तत्रैवोक्तनिषेधादुक्तस्थले प्रक्रियायां परिनिष्ठितरूपे वाऽभ्यासोत्तरखण्डस्याऽऽद्यचोऽवर्णरूपत्वाऽभावान्नापत्तिरित्यलम् ॥

अदन्तत्वसामर्थ्याणिज्विकल्प इति । कथादिषु उपाधावृद्धिदीर्घसन्वद्भावविरहात्सारभामप्रभृतीनामुपधाह्रस्वस्य गृहमृगप्रभृतीनामुपधागुणस्य च व्यावर्त्तनाददन्तत्वस्य सार्थक्यम् । गर्वयतेस्त्वदन्तत्वं प्रागुक्तलाभावाद्व्यर्थं सत् णिचः पाक्षिकत्वं ज्ञापयति । नचादन्तत्वसार्थक्याय वाऽल्लोप इति प्राचोक्तमेव स्वीकर्त्तव्यमिति वाच्यम्। चिन्तयतेरिदित्त्वस्य सामान्यापेक्षज्ञापकत्वे उक्तस्याऽदन्तत्वफलस्य स्वष्टत्वेऽपि विशेषापेक्षज्ञापकत्वे तत्र तत्राऽऽकारोकाररूपानुबन्धानां ज्ञापकत्ववददन्तत्वस्य ज्ञापकत्वाक्षतेः । क्लप्तेनैव णिज्विकल्पेनैव कृतार्थत्वेनापूर्वलोपवाधकल्पनस्यायुक्तत्वात् । सत्येवं मतद्वयेऽप्येकमेव रूपमिति भावः ॥

परत्वाद्वृद्धौ सत्यां टिलोप इति । शब्दान्तरप्राप्त्या लोपोऽनित्यः । वृद्धिरपि तथा । उभयोरनित्ययोः परत्वाद्वृद्धिः । कृतायां तस्यामौकारस्याऽऽवादेशात्प्रा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गेव परत्वार्णादाङ्गस्य बलीयस्त्वाच्च औलोप इति । एवञ्चाऽनग्लोपित्वाद्दीर्घसन्वद्भावौ स्तः। न च टिलोपस्य स्थानिवद्भावेन व्यवधानाच्चङ्परणिपरलघुपरकाऽभावेन कथं दीर्घसन्वद्भावा-विति वाच्यम् । तथाऽप्यङ्गस्य णिच्परत्वाऽनपायात् । चङ्परे णौ यल्लघ्विति पक्षेऽपि अभ्यासस्याऽऽदिष्टादचः पूर्वत्वेन स्थानिवत्त्वमेव नास्तीति न कोऽपि दोषः, अत एव 'मुण्डमिश्रे'ति सूत्रे हलिकल्योरदन्तत्वनिपातनं सङ्गच्छते । पूर्वं लोपे तु इकारलोप्यग्लो-पित्वसत्त्वेन तद्वैयर्थ्यं स्यात् । एतन्निपातनमेवाऽत्र ज्ञापकम् । आयादेशात्प्रागेवाऽन्तरङ्ग-त्वाल्लोपेऽनग्लोपित्वाद्भवत्येव सन्वद्भाव इति ।

वृद्धेर्लोपो बलीयानिति। अत एव 'नाग्लोपी'तिसूत्रेऽगिति प्रत्याहारग्रहणस्य साफ-ल्यम् । (मुण्डमिश्रे)ति सूत्रे हलकलेत्यकारान्तस्यैव पाठात्, एतद्भाष्यप्रामाण्यादिदुप-धेभ्यो णिजन्तेभ्यो लुङोऽनभिधानाच्च न दोष इति दिक् ॥

इति चुरादिप्रकरणम् ।

अथ तिङन्ते ण्यन्तप्रक्रिया ।

अचीचकासदिति । चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपर इति व्याख्यातॄणां प्राचां मत एतत् । मतान्तरे त्विति । भाष्यसम्मतपक्षे तु चङ्परे णौ यल्लघ्वित्यर्थं सन्वद्भावाप्राप्त्या अचचकासदिति रूपम् ।

ननु अचुचुर इ अदिति स्थितौ णिनिमित्तणिलोपस्य स्थानिवत्त्वाच्चङ्परणिपराया उपधाया अभावात्तत्परलघोरभावाच्च ह्रस्वदीर्घौ न स्यातामित्याशयेनाशङ्कते—नचाग्लो-पित्वाद्द्वयोरप्यसम्भव इति । समाधत्ते—एयाकृतिनिर्देशादिति । 'ते प्राग्धा-तोरि'त्यादौ गत्याकृतिनिर्देशवदिति भावः । एतेन वर्णग्रहणे एव जातिग्रहणं नान्यत्रेति केषाञ्चिन्मतमपास्तम् । एवञ्च णित्वजात्याश्रयानेकणिचो ग्रहणेन णिच्चङ्परत्वाद्ध्रस्वदीर्घ-योरस्ति सम्भव इति वृत्तिकृन्मतम् । शेखरकृतस्तु—जातेः पौर्वापर्याभावेन दोषस्त-दवस्थ एव, जात्या न पौर्वापर्यव्यवहारः सम्भवतीत्याशङ्कायां [आर्द्धधातुक इति विषय-सप्तमी]तिभाष्येण व्यक्तिद्वारकपौर्वापर्यस्याऽप्यनङ्गीकारात् । किञ्च णावित्यस्याऽग्लोप-विशेषत्वाण्णित्वजातिनिमित्तकाग्लोप इत्यर्थेन एकणिनिमित्तकापरणिलोपस्यापि णित्व-जातिनिमित्तकत्वेनाऽग्लोपित्वस्य दुर्वारतया दोषस्य तादवस्थ्यम्, तथा च अवीवददिति भाष्येण[णेर्णिच्युपसंख्यानमि]ति 'वडी'ति सूत्रस्थवार्त्तिकेन चोक्तप्रयोगसाधुत्वमित्याहुः॥

ननु अन्तरङ्गत्वात्पूर्वं कृतयोर्वृद्ध्यायोः पश्चात्सम्प्रसारणेऽपि अशूशवदिति न स्यादत आह—सम्प्रसारणं तदाश्रयञ्च कार्यं बलवदिति । वच्यादीनां ग्रह्यादीनामनुवृत्त्यैवे-ष्टसिद्धौ'लिट्यभ्यासस्ये' त्यत्रोभयेषां ग्रहणसामर्थ्यादेतस्या लाभः । अन्यथा वव्रश्चेत्यत्र कृते हलादिशेषे वस्य सम्प्रसारणापत्तिरिति । नच णिच्यजादेशो न स्याद्द्वित्वे कर्तव्य इत्यर्थक 'द्विर्वचनेऽची' ति सूत्रप्रवृत्त्या वृद्ध्यादेरप्राप्त्या न दोष इति वाच्यम् । अशूशवदि-तिभाष्यप्रयोगेणोक्तज्ञापनस्यानित्यत्वात् । नच सूत्रसामर्थ्यादेवोक्तज्ञापनस्यानित्यत्वमिति वाच्यम् । तस्य द्वित्वे कृतेऽपि चरितार्थत्वादिति भावः ॥

ननु एधतेर्लुङि णिचि उपधासंज्ञायाः प्राक् धिशब्दस्य द्वित्वे तत एकारस्योपधात्वाऽभावा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दुह्रस्वाऽप्राप्त्या मा भवानिदिधदिति प्रयोगो न स्यादत आह—बहिरंगोऽप्युपधाह्रस्वो-द्वित्वात्प्रागेवेति । एवञ्च द्वित्वात्प्राग्ह्रस्वे सत्युक्तप्रयोगसिद्धिः । अत्र प्रमाणमाह—ओणेर्ऋदित्करणाल्लिङ्गादिति । ह्रस्वात्पूर्वं द्वित्वे तु णिशब्दस्य द्वित्वे सत्युपधाह्रस्वा-ऽप्राप्त्या तन्निषेधार्थं कृतस्य ऋकारस्य वैयर्थ्यं स्यात् उक्तज्ञापनेनोक्तार्थज्ञापने तु द्वित्वा-त्प्रागुपधाह्रस्वाप्राप्तौतद्व्यावृत्त्यर्थमृदित्करणस्यावश्यकत्वादुक्तार्थे ज्ञापकत्वं सुस्थमिति भावः॥

अयमुब्जधातुरुपदेशावस्थायां दकारोपधः उद्ज इति । ततो भुजन्युब्जावित्य-त्रोब्ज इति निपातनेन दकारस्य बकारः तस्य चान्तरङ्गत्वेपि न द्वित्वात्प्राग् प्रवृत्तिस्तथा सति ब्जिशब्दस्य द्वित्वे औब्जिजदितीष्टप्रयोगानापत्तिः । अर्थादुत्तरखण्डे बकारश्रवणा-पत्तिः स्यात् किन्तु दकारोच्चारणसामर्थ्यात् 'नन्द्राः संयोगादय' इतिनिषेधेन जिशब्दस्य द्वित्वे कृत एव, तथा च न कोऽपि दोष इत्यभिप्रेत्याह—उपदेशे दकारोपध इत्यादि दकारोच्चारणसामर्थ्यादित्यन्तमिति ।

ननु कृतात्वस्यापि स्थानिवत्त्वेन लीत्वान्नुक् स्यादत आह—लीई इति इकारप्र-श्लेषादात्वपक्षे नुक् नेति ।

ननु हेतुभय इत्युक्तेर्भयस्मयावित्यनुपपन्नमित्यत आह—भयग्रहणं धात्वर्थोपल-क्षणमिति ।

ननु हेतोः स्मयस्य गम्यमानत्वे सत्येवाऽऽत्वात्मनेपदयोर्विधानात्तत्रात्वाङ्गीकारे आत्मनेपदत्यागे च वक्ष्यमाणरघुकाव्यप्रयोगानुपपत्तिरित्याशङ्कते—कथन्तर्हि (१)विस्मा-पयन्विस्मितमात्मवृत्ताविति । समाधत्ते—अत्र मनुष्यवाचेति । अत्र मनुष्यवा-चेति करणादेव स्मयस्य गम्यमानत्वाद्धेतोरगम्यमानत्वेन न दोषः । हेतोस्तद्गम्यमानत्वे तु सत्यात्मनेपदे शानजापत्तिर्दुर्वारैव । मुख्यसमाधानमाह—सत्यमिति । समाधानान्त-रमाह—मनुष्यवाक् प्रयोज्यकर्त्रीति । यद्यपि प्रथमणिजर्थम्प्रति मनुष्यवागेव प्रयो-जिका तथापि द्वितीयणिजर्थाऽभिप्रायेणेदमुक्तम् । अत एवाऽऽत्वम्प्रवृत्तम् । प्रयोज्यस्य कर्त्री प्रयोज्यकर्त्रीति व्याख्यायां प्रथमणिजर्थाभिप्रायेणैव सुयोज्यमित्याहुः केचित् । ण्यन्ताण्णाविति । राजा विस्मयते तं मनुष्यवाग्विस्मापयते तया सिंहो विस्मापय-न्निति । एवञ्च प्रथमणिच् मनुष्यवाचो हेतुत्वादात्वपुकोरुपपत्तिरिति भावः ॥

ईर्ष्यतेस्तृतीयस्येति वक्तव्यम्—तृतीयस्येत्यस्य तृतीयव्यञ्जनस्येत्यर्थः । अत्र व्याख्याने फलं दर्शयति—एर्ष्यियदिति । एर्षिष्यदित्यस्यासाधुत्वापत्तिरत आह—द्वितीय-व्याख्यायामिति । ईर्ष्यतिप्रकृतिकप्रत्ययान्तधातोरित्यर्थे वीजाऽभावेन ण्यन्ते सन्नन्ते च प्रवृत्तिः । तृतीयस्येति । तृतीयव्यञ्जनसहितस्यैकाच इत्यर्थः ॥

ननु अर्थधातोरागर्वीयत्वेनात्मनेपदित्वात्प्रार्थयन्तीति प्रयोगानुपपत्तिरित्यत आह—निवृत्तप्रेषणाद्धातोरिति । उक्तञ्च निवृत्तप्रेषणाद्धातोः प्रकृतेऽर्थे नियुज्यत इति । तेन

---

(१) श्लोकोऽयं २ सर्गे रघुवंशकाव्ये—

तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम् ।
विस्माययन्विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रार्थनां कुर्वन्तीति विवक्षितेऽर्थे प्रयोगे इति भावः । यत्तु परस्मैपदसिद्ध्यर्थं प्रार्थनं प्रार्थस्तं कुर्वन्ति प्रार्थयन्तीति तन्न, धातुसंज्ञाप्रयोजकप्रत्यये चिकीर्षिते उपसर्गाणां पृथक्करणस्य वक्ष्यमाणत्वाद् 'अर्थवेदयोरि'त्यापुको दुर्वारत्वात् ॥

इति ण्यन्तप्रक्रिया ।

अथ तिङन्ते सन्नन्तप्रक्रिया ।

ननु प्रत्ययवाच्येच्छाया नियतकर्माकांक्षत्वात्प्रत्यासत्त्या प्रकृत्यर्थकर्मिकायामेवेच्छयां सनो विधानात्कर्मणो लाभे पुनस्सूत्रे तदुपादानं व्यर्थमित्याशङ्कते—कर्मणः किमिति । उत्तरयति—गमनेनेच्छतीति करणान्माभूदिति । अयम्भावः, कर्मण इत्यस्याऽभावे प्रत्यासत्तेः सर्वैर्दुर्बोध्यत्वादिच्छाकर्मकादेवेत्यर्थे निश्चिते समानकर्तृकाद्धातोरित्यनेन यस्य यस्य समानकर्तृत्वं तस्य सर्वस्योपस्थितौ करणभूतार्थवाचकादपि धातोः यत्किञ्चित्कर्मिकायामिच्छायामपि प्रत्ययापत्तिः तत्सत्त्वे तु न तथेति । सामानकर्तृकात्किमिति । प्रत्ययापत्तिमाश्रित्य प्रश्नः । पूर्ववदेवोत्तरम् ॥

ननु परत्वात्कत्वषत्वयोः कृतयोर्भष्भावो न स्यादत आह—सनः षत्वस्यासिद्धत्वाद्भषभाव इति । केचित्तु जागृह स इति स्थितौ सस्येणः परत्वात्प्राप्तषत्वस्यासिद्धत्वेन ढत्वे भष्भाव इति वदन्ति । पश्चेच कृत पश्चाद्भष्भावे कर्त्तव्ये सकारपरत्वाभावेन भष्भावो नेति पूर्वपक्षे प्रक्रान्तेऽस्य ग्रन्थस्य प्रवृत्तिरित्यन्ये ॥

ननु ध्वङः सनि [अत्रेटो दीर्घो नेष्टः] इत्यनेनेटो दीर्घाभावबोधनाद्दीर्घघटितप्रयोगोऽनुपपन्न इत्याशंकते—कथमुदिध्रोषुरिति । समाधत्ते भौवादिक ग्रोध्रृं ङ्ग्रूञेरिति । एवञ्च 'अज्झनगमां सनो' ति वक्ष्यमाणसूत्रेण दीर्घे प्रयोगोपपत्तिरिति भावः ॥

ननु दिदीषत इत्यत्र 'मिनाति मिनाति' इत्यनेनात्वं कुतो नेत्याशंकां समाधत्ते—एज्विषयत्वाऽभावादिति । उक्तसूत्रेणैज्विषय एवात्वविधानान्न तु तदभाव इति प्रकृतेऽतथात्वान्नात्वमिति अत्र प्रमाणमाह—अत एवेति । एज्विषयाऽभावेऽप्यात्वे 'स निमिमे' ति सूत्रे माग्रहणेन (१)[गामादाग्रहणेष्वविशेषः] इति परिभाषया मीधातोरपि ग्रहणसिद्धौ पृथक् तदुपादानं व्यर्थं स्यादितीदमेवैज्विषय एवात्वमित्यत्र बीजमित्यलम् ॥

ननु 'हलन्ताच्चे' त्यनेन इक् समीपस्थहलव्यवहितोत्तरस्य झलादिसनः किद्वद्भावविधानेन तितृक्षतीत्यत्र स न स्यात् सनो ऋकाररूपेक्समीपस्थनकाररूपहलः परत्वाभावान्मध्ये हकारेण व्यवधानादित्याशंक्य समाधत्ते—हल्ग्रहणं जातिपरमिति । एवञ्च हलत्र जात्याक्रान्तैकानेकहल् परस्य झलादिसनः किदित्यर्थे न दोष इति भावः ॥

ननु इषेः सनि द्वित्वगुणयोः प्राप्तौ नित्यत्वाद्द्वित्वेऽभ्यासस्यानर्थक्यादिटो गुणस्य चानापत्तौ एपिषिषतीतीष्टरूपन्न स्यादत आह—इह नित्यमपि द्वित्वं गुणेन बा-

---

(१) दाधाध्वदाविति सूत्रेऽदाब्दावित्येकदाप्पदेन दैपो ग्रहणाय दैप् शोधन इत्यत्रेत्संज्ञकः पकारः कृतः; स च दापदेन प्रतिपादकदारूपस्यैव ग्रहणात् निरनुबन्धपरिभाषया निरनुबन्धकस्यैव च ग्रहणाच्च व्यर्थः सन्नुक्तपरिभाषाज्ञापकः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ष्यत इति । अत्र प्रमाणमाह—उपधाकार्यं हि द्वित्वात्प्रबलमित्यादि । ओणेऋदित्करणस्य सामान्यापेक्षज्ञापकत्वेनोपधाकार्यमात्रस्य ह्रस्वगुणादेर्द्वित्वात्प्राबल्यबोधनेन द्वित्वात्प्राग् गुणे रूपमिष्टं सिद्ध्यतीति भावः । वस्तुतस्तु—'णौ चङीति' सूत्रस्थभाष्ये 'यदयमोणिमृदितं करोति तज्ज्ञापयति द्विर्वचनं ह्रस्वाद्बलीय' इत्युक्तत्वादस्य सामान्यापेक्षज्ञापकत्वं चिन्त्यम् । तस्माच्छब्दान्तरप्राप्त्या द्वित्वस्याऽनित्यत्वेन द्वयोरनित्ययोः परत्वादिड् वाच्यस्ततोऽपि प्राग् गुणेनेष्टसिद्धिरित्यलम् ॥

ननु ऊर्णोतेः सनि इडागमे द्वित्वात्प्राक् गुणेऽवादेशे च कृते पश्चान्न शब्दस्य द्वित्वेऽभ्यासे उकारश्रवणाऽनापत्तिरिति चेन्न । 'द्विर्वचनेऽची' ति सूत्रेण स्थानिरूपस्यातिदेशेन नोशब्दे नवशब्दे वा नुशब्दबुद्ध्या कार्यप्रवृत्त्या अदेशस्थ गुणस्य निषेधेन चाऽभ्यासे उकारश्रवणोपपत्तेः । नच द्वित्वम्प्रति सूत्रे पञ्चम्यन्ततयोपात्तत्वात्सनः कार्यित्वेन निमित्तत्वाऽभावाद्द्विर्वचनेऽचीत्यस्याऽप्राप्त्या दोषस्तदवस्थएवेति वाच्यम् । (१) [कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते] इति परिभाषया कार्यानुभवकर्तृत्वविशिष्टस्य कार्यिणो निमित्तत्वेनानाश्रयणादतादृशस्य कार्यिणो निमित्तत्वाक्षततया नुशब्दस्यैव द्वित्वेन सनोऽद्वित्वात्तस्येटो निमित्तत्वेनोक्तसूत्रप्रवृत्तेरदोषादिति भावः ।

ननु (लक्षणप्रतिपदोक्त) परिभाषया मिनोतेर्मीरूपस्य लाक्षणिकत्वेन मीग्रहणेन ग्रहणं न स्यादिति चेन्न । यत्र लक्षणाभिनिर्वृत्तत्वेन शब्दरूपापेक्षा तत्रैवोक्तपरिभाषोपस्थित्या प्रयोगाश्रयणे तदनुपस्थित्याऽदोषादित्याह—कृतदीर्घस्य मिनोतेर्मीरूपाऽविशेषादिसिति । अत्र मीरूपमात्रस्य प्रयोगाश्रयणात्परिभाषाऽप्रवृत्तिः । 'विभाषा दिक् समासे' इत्यत्र तु लक्षणाऽभिनिर्वृत्तस्य समासशब्दस्याश्रयणादुक्तपरिभाषाप्रवृत्त्या 'दिङ्नामान्यन्तराले' इति प्रतिपदोक्तसमासस्यैवाश्रयणम् । उक्तपरिभाषाया अनित्यत्वात्क्वचिदुपस्थितिः क्वचिदनुपस्थितिरिति निष्कृष्टोऽर्थ इति दिक् ॥

ननु ऋधातोः सनि इटि इसः सनोऽवयवस्य कार्यभागित्वेन कार्यिणो निमित्तत्वालाभेन द्विर्वचनेऽचीति निषेधाऽप्रवृत्त्या गुणेऽर् इजिति स्थितौ रिसशब्दस्य द्वित्वे हलादिः शेषे अरिरिषतीति सिद्धिरिति भावः ॥

ननु उच्छेः सनि तुकि चुत्वे, द्विर्वचने न पूर्वत्रासिद्धं प्रवर्तते इत्यर्थक (पूर्वत्राऽसिद्धीयमद्विर्वचने) इति परिभाषया द्वित्वदृष्ट्या चुत्वस्यासिद्धत्वाऽभावेन चकारछकारसहितस्यटो द्वित्वे उचिच्छिषतीति सिद्ध्यति । नच [निमित्ताऽपाये नैमित्तकस्याऽप्यपायः] इति परिभाषया चकाररूपस्य तुकोऽपायाच्चकारस्याऽभ्यासे श्रवणापत्तिरिति वाच्यम् । तस्या अनित्यत्वेनाऽप्रवृत्त्याऽदोषात् । एतदनित्यत्वे ज्ञापकमाह—च्छ्वोःशूडिति सूत्रे सतुग्ग्रहणाज्ज्ञापकादिति । तथा हि तुग्विशिष्टस्य छकारस्य शादेशेऽपि उक्तपरिभाषया तुङ्निमित्तस्य छस्याऽपाये नैमित्तिकस्य तुकोऽपायात्तच्छ्रवणापत्त्या सतुग्ग्रहणं व्यर्थं सज्ज्ञापयति उक्तपरिभाषाऽनित्येति । एवञ्चेह तदप्रवृत्त्या नोक्तदोषः । समाधानान्तरमाह—प्रकृतिप्रत्ययापत्तिवचनाद्वेति । पुष्ययोगं जानाति पुष्येण योजयतीत्येतत्साधके

---

(१) कार्यानुभवकर्तृत्वविशिष्टः कार्यी निमित्तं न भवतीति परिभाषार्थः । स्थण्डिलाच्छयितरीति सूत्रे शयितरीति निर्देशोऽत्र ज्ञापकः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'पुष्ययोगे ज्ञी' ति सूत्रे भाष्यकृत् कृताया: प्रकृतिप्रत्ययानुवृत्तेर्ज्ञापकम् , तत्र हि चजोरि ति घिति परे कुत्वं अन्यथा क्वल्लुकि निमित्ताऽपाय इति परिभाषयैव कुत्वव्यावृत्तौ व्यर्थैव तदनुवृत्तिः । किञ्च [आख्यानात्कृतस्तदाचष्टे] इति वार्त्तिकविहितप्रकृतिप्रत्यया-पत्तिवचनं तदनित्यत्वे ज्ञापकम् । वस्तुवस्तु एतैरुक्तपरिभाषाऽभाव एव ज्ञाप्यत इति दिक् ।

स्थादिष्वभ्यासेनेति नियमान्नेहेति—ननु नियमादेव निषेधे 'सुनोतेः स्यसनोः' अस्येह निर्विषयापत्तिरिति चेन्न अभिसुसूषतेरप्रत्ययेऽभिसुसूरित्यत्र षत्वनिषेधाय तदावश्य-कत्वादिति भावः ॥

इति सन्नन्तप्रक्रिया ।

अथ तिङन्ते यङन्तप्रक्रिया ।

ननु क्रियासमभिहार इत्युक्त्यैव धातोर्लाभात्सूत्रे पुनस्तदुपादानं व्यर्थमित्याशंकते—धातोः किमिति । उत्तरयति—ब्रुवोवचिरित्यादीति । वावच्यते चाख्यायते इत्यादिसिद्धिः प्रयोजनम् । धिगित्यव्ययस्यापि क्रियावाचित्वादेकाच्त्वाच्च ततः प्राप्तयङ्व्यावृत्त्यर्थकमपि धातुग्रहणमित्यलम् ॥

यस्येति संघातग्रहणमिति । तेन नाव्ययीदहर्यीदित्यादौ यलोपापत्तिः । संघातग्रहणसामर्थ्याच्चु (अर्थवद्ग्रहणे नाऽनर्थकस्ये)ति परिभाषोपस्थितौ न पुत्रकाम्यादौ यलोपातिप्रसक्तिः । वर्णग्रहणे तु तदनुपस्थित्या यलोपोऽत्र स्यादेवेति भावः ॥

दीर्घोऽकितः । अत्राऽग्रहणे यंयम्यते रंरम्यत इत्यादौ दीर्घापत्तिः । ननु सूत्रे दीर्घपदश्रवणादुपस्थिताऽचूपदेन 'अत्र लोपोऽभ्यासस्ये' त्यस्मादनुवर्त्तमानाऽभ्यासस्य विशेष्यत्वेन अजन्ताभ्यासस्य दीर्घ इत्यर्थे नोक्तस्थले दीर्घप्राप्तिरिति व्यर्थं तत् । नचाऽभ्यासावयवस्याचो दीर्घ इति वैयधिकरण्यान्वयाङ्गीकारे तस्य सार्थक्यमिति वाच्यम् । सामानाधिकरण्यान्वयसम्भवे वैयधिकरण्यान्वयस्यायुक्तत्वेन (येन नाप्राप्ति) न्यायेन नुको दीर्घापवादत्वाऽभ्युपगमेन च दोषाभावेनाकिद्ग्रहणवैयर्थ्यस्य तादवस्थ्यादिति चेन्न । डोढौक्यत इत्यत्राऽभ्यासह्रस्वबाधेनोक्तसूत्रप्राप्तदीर्घव्यावृत्तये (अभ्यासविकारेषु उत्सर्गविधीन् बाधका न बाधन्ते) इत्येतद्ज्ञापनायाऽकिद्ग्रहणस्यावश्यकत्वात् । एवञ्चोक्तज्ञापकसमर्थनाय वैयधिकरण्यपक्षाश्रयणेन यंयम्यत इत्यादौ दीर्घात्पूर्वं सत्यपि नुकि दीर्घवारणायावश्यकमिद्ग्रहणमिति भावः ॥

ननु अर्तर्यङि 'नन्द्राः संयोगादयः' इत्यनेन निषेधाद्रेफस्य द्वित्वाभावेन वक्ष्यमाणभाष्योदाहरणमसङ्गतं स्यादत आह—यकारपररेफस्य न द्वित्वनिषेधः । आरार्यत इति भाष्योदाहरणादिति । द्वित्वम्प्रति यङः कार्यित्वान्न निमित्तत्वयोग इत्यपास्तमेतेन । भाष्योदाहरणस्य सामन्यापेक्षज्ञापकत्वादार्यमाख्यदारर्यदिति सिद्धिः ॥

ननु विग्रहेण यङन्तप्रतिपाद्यविशेषाऽसम्प्रत्ययेन नित्यग्रहणमनर्थकमिति भाष्येण च नित्यग्रहणं न वाक्यनिवर्त्तकं किन्तु कौटिल्यपदान्वय्यावधारणार्थन्तदित्यह—कौटिल्य एवेति । इति वृत्तिकृद्रीत्या, 'धातोरेकाच' इति सूत्रभाष्यरीत्या तु गत्यर्थेभ्यः क्रि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यासमभिहारे यङ्भवत्येवेत्यवसेयम् । नच 'नित्यं कौटिल्ये गतावि' त्यत्र नित्यग्रहणं व्यर्थं (१)(तक्रकौण्डिन्य) न्यायेन तक्रदानेन दधिदानबाधवत्सूत्रे कौटिल्यपदोपादानेन क्रियासमभिहारे प्रत्ययाविधानान्नित्यपदासद्भावेऽप्यवधारणार्थलाभेनेष्टसिद्धेरिति वाच्यम् । तस्योक्तन्यायानित्यत्वज्ञापनेन सार्थक्यात् । अत एव 'मतिबुद्धिपूजार्थेभ्यश्चे' त्येतत्सूत्रविहितवर्तमानार्थक्तेन पूजार्थकधातुभ्यो भूते क्तस्याबाधात् 'क्तस्य च वर्तमाने' इति षष्ठ्यप्राप्त्या (पूजितो यः सुराऽसुरैरि)त्यत्र तृतीयायाः साधुत्वमिति भावः ।

अकित इत्युक्तेर्न दीर्घ इति—ननु अजन्ताऽभ्यासस्य दीर्घ इत्यर्थेन नुग्गादौ कृतेऽजन्तत्वाऽभावान्नीकि विशेषाभावाद्रीकि रीग्विधानेनैव सिद्धे रिग्विधिसामर्थ्यादेव तदभावसिद्धे किमकित इत्यनेनेति चेन्न । अभ्यासविकारविधौ वैयधिकरण्यान्वयज्ञापनार्थत्वात् । अत एव छयतेः सनि द्वित्वेऽन्तरङ्गत्वात्तुकि चिच्छासतीत्यादावभ्यासह्रस्वत्वेत्वसिद्धिः । नचैवमपि अपवादत्वान्नीगादिभिर्दीर्घबाधे व्यर्थमेव तदिति वाच्यम् । अभ्यासविकारे बाधका न इत्यर्थस्यापि ज्ञापनात् ।

इति यङन्तप्रक्रिया ।

अथ तिङन्ते यङ्लुगन्तप्रक्रिया ।

यङोऽचि च । अत्र सूत्रे अचोति प्रत्ययस्य ग्रहणं नतु प्रत्याहारस्य यङा साहचर्यात् । चकारेण बहुलमित्यनुकर्षस्तदाह—अच् प्रत्यये बहुलं लुगिति—चकारस्य फलान्तरमप्याह—चकारात्तं विनाऽपीति ।

अनैमित्तिकोऽयमन्तरङ्गत्वादादौ भवतीति—'सन्यङोः' इति षष्ठी न तु सप्तमी । सप्तमीस्वीकारे यङो लुका लुप्तत्वेन प्रत्ययलक्षणाऽप्रवृत्त्या यङन्तत्वाऽभावेन द्वित्वानापत्तिरिति भावः । नच 'न लुमताङ्गस्ये' त्यनेनाऽङ्गाधिकारविहितकार्यस्यैव निषेधेन प्रकृते तादृशकार्याऽभावाद्द्वित्वे बाधकाऽभावेन सप्तमीपक्षेऽपि न कोऽपि दोष इति वाच्यम् । उक्तनिषेधसूत्रेऽङ्गाधिकारस्याग्रहणेन प्रत्यये परतः पूर्वस्य विधीयमानं यदांगमनांगं कार्यं तस्य सर्वस्यापि निषेधात् । अत एव राजपुरुष इत्यदौ नलोपसिद्धिः । आङ्गकार्यस्यैव तेन निषेधे तु 'यचिभमि'त्यस्यानाङ्गत्वेन निषेधाऽभावाद्भत्वेन पदत्वबाधान्न लोपो न स्यादिति भावः ॥

धातुत्वाल्लडादय इति—क्विबन्तेष्विव प्रत्ययोत्पत्तेः प्राक् प्रवृत्ताया धातुसंज्ञाया (एकदेशविकृत)न्यायेनाऽवस्थितत्वात कार्यकालपक्षेऽपि भूवादिसूत्रप्रवृत्तेश्च । अथवा, चर्करीतमित्यस्याऽदादौ पाठाद्भ्वादित्वाद्भूवादिसूत्रेण धातुसंज्ञेति भावः ॥

ङित्वस्य प्रत्ययाऽप्रत्ययसाधारणत्वेनेति—ऋतेरीयङित्यादिषु प्रत्ययेषु चिन्ङादिष्वप्रत्ययेषु च ङित्वस्य दर्शनेन प्रत्ययस्याऽसाधारणरूपाश्रयणे प्रवर्त्तमानस्य प्रत्ययलक्षणस्यात्राऽप्रवृत्त्या न यङो ङित्वप्रयुक्तकार्यस्याऽऽत्मनेपदरूपस्य शङ्कालेशोऽपीति भावः । प्रत्ययस्याऽसाधारणरूपाश्रयण एव प्रत्ययलक्षणप्रवृत्तेरेव सुदृषत्प्रासाद इत्यत्राऽसिति

---

(१) सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति तदाकारः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रत्ययाऽप्रत्यययोः सत्त्वादसाधारणरूपानाश्रयणेन प्रत्ययलक्षणाऽप्रवृत्त्याऽसन्तत्वाऽभावान्न दीर्घ इति दिक् ॥

ननु येषामनुदात्तेतां प्रत्ययलक्षणमन्तरैव ङित्त्वं तेभ्यस्त्वात्मनेपदं दुर्वारमित्यत आह—**अनुदात्तङित इत्यनुबन्धनिर्देशादिति**—श्तिपाश्पाऽनुबन्धेनेति निषेधपरिगणनेऽनुबन्धपदसद्भावेन तत्प्रयुक्तकार्यस्य यङ्लुक्यभावबोधनात् 'अनुदात्तङित' इत्यत्राङित इत्यस्य इकारेत्संज्ञकाद्धातोरित्यर्थे ङकारस्याऽनुबन्धत्वस्य स्पष्टत्वान्न तन्निर्दिष्टात्मनेपदप्रसक्तिरिति भावः ॥

अतएवेत्यादि शपोलुगित्यन्तमिति—उक्तनिषेधपरिगणनेन गणनिर्दिष्टकार्यस्यान्यत्राप्रवृत्तिबोधनाच्छयन्नादेरप्राप्त्या तदनिर्दिष्टस्य शप एव प्रवृत्त्या तस्य (चर्करीतमि)त्यस्य विशिष्याऽदादौ पाठाल्लुगिति बोध्यम् ।

ननु यङ्लुगन्तभूधातोर्लटि तिपि प्रत्ययलक्षणेन यङन्तत्वाद्द्वित्वेऽभ्यासस्य जश्त्वे तस्य च गुणे 'यङो वे'ति इटि, तदभावे वाभू इति बोभूति इति स्थितौ 'सार्वधातुकार्धधातुकयोरि'ति प्राप्तगुणस्य 'भूसुवोस्तिङी'ति निषेधे बोभवीति, बोभोतीतीति चेष्टप्रयोगो न स्यादत आह—**बोभूतु तेतिक्ते इति छन्दसि निपातनादिति** ।

उक्तसूत्रेणैव गुणनिषेधसिद्धौ निपातनस्य यङ्लुगन्तभूधातोश्छन्दस्येव तत्रापि लोट्येव गुणाऽभावो नाऽन्यत्रेति नियमार्थत्वेन लटि गुणे न बाधकमिति । अत एव बोभूत्विति नियमार्थमत्रैव यङ्लुगन्तस्य गुणाऽभावो नान्यत्र बोभवीतीत्युक्तम्भाष्ये । अत एवेति । पूर्वोक्तनियमादेवेत्यर्थः । ननु समुदायस्य बोभू इत्यस्य भुवोऽतिरिक्तत्वेन तत्त्वाऽभावाद्भूसुवोस्तिङीति गुणनिषेधाऽप्राप्त्या निपातनस्य गुणनिषेधायावश्यकत्वेन नियमार्थत्वं न सम्भवतीत्याशंक्ते—**नच यङ्लुक्यप्राप्त एव णाभावो निपात्यतामिति** । सामाधत्ते—**प्रकृतिग्रहणेन यङ्लुगन्तस्यापि ग्रहणादिति** । एवञ्च भूग्रहणेन बोभू इत्यस्य ग्रहणाद्गुणनिषेधसिद्ध्या निपातनं नियमार्थमेवेति । प्रमाणमाह—**द्विःप्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्तादिति** । षष्ठाध्यायस्थसूत्रविहितद्विर्वचनस्य द्विः प्रयोगरूपत्वेन तत्त्वाक्षततया निषेधादिसिद्धिः । शेखरकृतस्तु, उत्तरखण्डस्य भूत्वाक्षततया भूसुवोरित्यस्य भूशब्दान्ताङ्गस्य न गुण इत्यर्थेन निषेधप्राप्त्या नियमसिद्धिः । द्विःप्रयोगपक्षेऽपि विशिष्टानुपूर्वीभेदात्प्रकृतिग्रहणेन तद्ग्रहणोपपादनं न सम्भवति । अत एव 'दयते र्दिगी'ति सूत्रे भाष्ये अस्तेर्भ्वादेशे यदि स्थाने द्विर्वचनं द्वित्वे कृते सर्वादेशो भूभावः प्राप्नोति । अथ द्विः प्रयोगो द्विर्वचनं तदा परस्य भूभावे कृते पूर्वस्य श्रवणं प्राप्नोतीत्युक्तमित्याहुः ॥

ननु 'आत' इत्यनेन सिज्लुकि सति आदन्तादेव झेर्जुसो विधानादिह जुस् न स्यादत आह—**अभ्यस्ताश्रयो जुसिति** । 'सिजभ्यस्तविदिभ्यश्चे, त्यनेन सिचः परत्वमाश्रित्य प्राप्तजुस एव नियमो नत्वभ्यस्ताश्रयस्य तस्येति न कोऽपि दोषः । नच परत्वात् अदभ्यस्तादि' त्यनेन कृतेऽदादेशे जुसोऽप्राप्त्या दोषस्य तादवस्थमेवेति वाच्यम् । अभ्यस्ताश्रयजुसोऽदादेशाऽपवादत्वेन दोषोद्धारादिति भावः ॥

ननु 'सिजभ्यस्तविदिभ्यश्चे'त्यनेनाऽभ्यस्ताश्रये जुसि कृते जुसि चेति गुणो दुर्वार

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्यत आह—नित्यत्वाद्वुगिति—(परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः) इति परिभाषया परत्वाऽपेक्षया नित्यत्वस्य बलवत्त्वबोधनाज्जुसि चेति गुणस्य परत्वात्तदपेक्ष्या कृताकृतप्रसङ्गित्वेन वुको नित्यत्वाद्गुणं बाधित्वा वुगेवेति भावः ॥

ननु (एकाच उपदेशेऽनुदात्तादि)त्यत्रैकाच्ग्रहणस्य श्तिपाशपानुबन्धेति निषेधवचनज्ञापकत्वेनैकाज्ग्रहणघटितशास्त्रस्य यङ्लुक्यप्रवृत्तिसूचनादिहोक्तसूत्राऽप्रवृत्तिरित्याह—एकाज्ग्रहणेनोक्तत्वान्नेण्निषेध इति ॥

ननु गमेर्यङ्लुगन्ताल्लोटि मध्यमपुरुषैकवचने सेर्ह्यपिच्चेति हौ तस्य 'अतो हेरि'ति लुक् स्यादत आह—अनुनासिकलोपस्याऽऽभीयत्वेनाऽसिद्धत्वान्न हेर्लुगिति । समानाश्रयाभीये कर्त्तव्ये समानाश्रयमाभीयमसिद्धमित्यर्थकस्य 'असिद्धवदत्राभादि'त्यस्य 'अनुदात्तोपदेशे'त्यत्रोपस्थित्या, अनुदात्तोपदेशानां यमिरमिगम्यादीनां, तनोत्यादीनां, वनतेश्चानुनासिकस्य लोपः स्याज्झलादौ किङ्तिपरे सचाऽसिद्धो भवतीत्यर्थे समानाश्रयस्य हेर्लुकोऽत्र कर्तव्यत्वे समानाश्रयस्यानुनासिकलोपस्यासिद्धत्वेन हेरतःपरत्वाऽभावान्न लुगिति भावः ॥

ननु यङ्लुगन्ताद्गमेर्लुङि 'च्लि लुङि' इत्येत्सूत्रविहितस्य च्लेः स्थाने 'श्तिपा शपे' ति निषेधपरिगणनेऽनुबन्धपदसद्भावात्तन्निर्दिष्टकार्यस्येह प्रकरणेऽभावप्रतिपादनात् 'पुषादिद्युताद्यलृदितः परस्मैपदेष्वि' तिसूत्रेण नाऽङित्याह—अनुबन्धनिर्देशान्नच्लेरङिति।

ननु हन्तेर्यङ्लुकि 'हो हन्तेर्ञ्णिन्नेष्वि'त्यतो हन्तेरित्यनुवर्त्य 'अभ्यासाच्चे'त्येतत्सूत्रविहितकुत्वस्याऽत्र प्रवृत्तिर्न स्याद्धन्तेरित्यत्र श्तिपो निर्दिष्टत्वादुक्तनिषेधादित्यत आह—श्तिपाशपेति निषेधस्त्वनित्य इति । अनित्यत्वे प्रमाणमाह—'गुणो यङ्लुकोः' इति सामान्यापेक्षज्ञापकादिति—अयम्भावः' सन्यङो' रिति द्वित्वविधायकेनैकाचोद्वित्वविधानात्तत्र च श्तिपाशपेति निषेधेन यङ्लुकि कुत्रापि द्वित्वाऽभावात् 'गुणोयङ्लुकोः' इत्यनेनाऽभ्यासस्य विधीयमानो यो गुणस्तस्य द्विर्वचनं विनाऽनुपपत्त्या व्यर्थीभूतं क्वचित्प्रवृत्तिं ज्ञापयति । विशेषाऽपेक्षज्ञापकत्वे तु एकाज्निबन्धनस्यैवाऽनित्यत्वं स्यादित्यलम् ॥

ननु हन्तेर्यङ्लुकि लोटि मध्यमपुरुषैकवचने हौ जङ्घहीत्यत्र 'हन्तेर्जः' इति जादेशः कुतो नेत्याशङ्कां समाधत्ते—श्तिपा निर्देशाज्जादेशो नेति । उक्तजादेशविधायकसूत्रे हन्तेरित्यत्र श्तिपो निर्दिष्टत्वेन तन्निर्दिष्टकार्यस्य च श्तिपा शपेति निषेधेन यङ्लुक्यप्रवृत्तिबोधनेन जादेशाऽभाव इति भावः ॥

ननु हन्तेर्यङ्लुकि आशीर्लिङि लुङि च कृतद्विर्वचनस्य हन्तेर्वधादेशे पुनर्द्वित्वं कुतो नेत्याशङ्कां समाधत्ते—वधादेशस्य द्वित्वं तु न भवतीति—अयम्भावः, सन्यङोरिति द्वित्वविधायके 'लिटि धातोरनभ्यासस्ये' त्यतोऽभ्यासस्ये' त्यतोऽनभ्यासपदानुवृत्तौ सन्नन्तस्य यङन्तस्य चानभ्यासभिन्नप्रथमैकाचो द्वित्वमित्यर्थे बध्यात् अवधीदित्यत्र वधादेशस्य स्थानिवद्भावेनाऽभ्यासत्वान्न द्वित्वप्राप्तिः । नाऽभ्यासो यस्मिन् यस्य ,वेति बहुव्रीहावभ्यासपदस्य धातोः समानाधिकरणविशेषणत्वम् । अस्तेरिति सूत्रस्थभाष्येणोत्तरखण्डस्यैव बधादेशो जंबध्यादित्येवरूपमिति बोध्यम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु आङ्पूर्वकाद्धन्तेर्यङ्लुकि 'आङो यमहनः' इत्यात्मनेपदं न स्याद्यङ्लुगन्तस्योक्तधातोरशुद्धधातुभिन्नत्वेन तद्ग्रहणेनाऽग्रहणात्सूत्रे च शुद्धधातोरेवोपादानादिति चेन्न । (१)(प्रकृतिग्रहणेन यङ्लुगन्तस्याऽपि ग्रहणात्) द्विः प्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्तितत्वादाह—आङ्पूर्वकात्तु 'आङो यमहन' इत्यात्मनेपदमिति ॥

ननु चरतेर्यङ्लुकि 'चरफलोश्चे'त्यभ्यासस्य नुकि 'उत्परस्यातः' इत्युत्वस्य गुणः कुतो नेत्यत आह—तपरत्वान्न गुण इति—ननु तपरकरणसामर्थ्याद्गुणव्यावृत्तिरिव दीर्घव्यावृत्तिरपि स्यादत आह—हलि चेति दीर्घस्तु स्यादेवेति—तत्र युक्तिमाह—तदृष्ट्याऽसिद्धत्वेनेति—उत्वविधायकदृष्ट्या गुणस्य सिद्धत्वात्तस्य च तपरत्वव्यावर्त्यत्वेन व्यावृत्तिः । दीर्घस्य तु उत्वदृष्ट्याऽसिद्धत्वेन तपरव्यावर्त्यत्वाऽभावेन नानेन तद्व्यावृत्तिरिति भावः ॥

ननु यौतेर्यङ्लुकि लटि 'उतोवृद्धिरि'ति वृद्धिः स्यादत आह—उतोवृद्धिरित्यत्र नाभ्यस्तस्येत्यतोऽनुवृत्तेरिति—अयम्भावः तत्र नाभ्यस्तस्येत्यस्यानुवृत्तावभ्यस्तभिन्नोकारस्य वृद्धिरित्यर्थे प्रकृतेऽभ्यस्तत्वान्नोक्तापत्तिरिति दिक् ॥

ननु स्वपेर्यङ्लुकि 'स्वपिस्यमिव्येञां यङि' इत्यनेन सम्प्रसारणं कुतो नेत्यत आह—लुका लुप्ते प्रत्ययलक्षणाऽभावादिति—उक्तसूत्रेण यङि सम्प्रसारणं विधीयते यङश्च 'यङोऽचि चे' त्यनेन लुक् तस्य च लुक्शब्देन कृताऽदर्शनात् 'न लुमताङ्गस्ये'ति निषेधेन प्रत्ययलक्षणाऽप्रवृत्त्या यङोऽभावान्न सम्प्रसारणम् , मूले उत्वं नेति फलितार्थकथनमुक्तसूत्रविधीयमानसम्प्रसारणन्नेति तदर्थः, । नच लुकः प्रागेव यङः सत्त्वेन तस्मिन्नुक्तापत्तिर्दुर्वारेति वाच्यम् । सर्वविधिभ्योलुग्विधेर्बलीयस्त्वेन (२) (अकृतव्यूह) परिभाषया लुकः पूर्वं तद्प्रवृत्तेरिति भावः ॥

ननु अर्तेर्यङ्लुकि लटि प्रथमपुरुषस्य बहुवचने झौ आरतीतिरूपं सिद्ध्यति तन्न स्यात् रर ऋ इति स्थितौ रुको रेफस्य 'रोरी'ति लोपे यणि कृते प्राप्तस्य 'ढ्रलोप' इति दीर्घस्य यणः स्थानिवद्भावेन निमित्ताऽभावेनाऽप्रवृत्तेरिति चेन्न । 'अभ्यासस्याऽसवर्णे' इत्यत्राऽसवर्णग्रहणेनाऽभ्यासकार्यं ऽभ्यासानवयवधात्ववयवादेशस्य तत्प्रतिबन्धकस्थानिवद्भावो नेत्यर्थज्ञापनाद्दीर्घविधौ स्थानिवत्त्वनिषेधाच्चोक्तानुपपत्त्यभावादिति ॥

ननु यङ्लुगन्ताद्ग्रहेर्लुकि 'ग्रहोऽलिटी' तिसूत्रेण कुतो नेटो दीर्घ इति चेन्न । तत्रैकाच्ग्रहणसत्त्वादेकाज्निबन्धनकार्यस्यात्र प्रकरणेऽभावबोधनादित्याह—ग्रहो लिटीति दीर्घस्तु न, तत्रैकाच इत्यनुवृत्तेरिति । माधवमते युक्तमेतदित्याह—माधवस्तु, दीर्घमाहेति । इत्थं हि तदाशयः, ग्रहोऽलिटी ति सूत्रस्थ(यङ्लोपे चोक्तमि)ति वार्त्तिकतदीयभाष्यादिपर्यालोचनात् जरीगृहितेत्यादौ यङन्ताद्ग्रहेस्तृचस्तासेर्वा इटो दीर्घाभावे

---

(१) प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमिति परिभाषास्वरूपम् । पाष्ठद्वित्वस्य द्विःप्रयोगत्वसिद्धान्तेन प्रयोगद्वयरूपे समुदाये प्रकृतिरूपत्वबोधनान्न्यायसिद्धमिदम् ।

(२) अकृतव्यूहाः पाणिनीया इति परिभाषास्वरूपम् । पाणिनीयशास्त्राध्येतारो निमित्तस्य विनाशोन्मुखत्वे दृष्टे तत्प्रयुक्तकार्यकारिणो न भवन्तीत्यर्थः । समर्थानां प्रथमाद्वेतिसूत्रस्थं समर्थग्रहणमत्र ज्ञापकम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

युक्तिद्वयम् । पूर्वस्मादपि विधौ स्थानिवद्भावः ग्रहेर्विहितस्येटो दीर्घ इति च, तत्र भाष्यवार्तिककृद्रीत्या प्रथमः पक्षः ताभ्यां पूर्वत्रासिद्धे न स्थानिवदिति स्वीकृत्य दीर्घग्रहणं प्रत्याख्यातम् । तन्मते त्रैपादिकदीर्घातिरिक्तदीर्घे कर्त्तव्ये स्थानिवद्भावः सुवचः । द्वितीयपक्षस्तु सूत्ररीत्या, एतन्मते सामान्यतो दीर्घविधौ स्थानिवद्भावनिषेधादसौ वक्तुमशक्यः। तथाच यङ्लुकि दीर्घप्रवृत्तौ न बाधकम् । यङ्लुकोऽनैमित्तिकत्वेन अज्झलादेशत्वेन च न स्थानिवद्भावः । द्विःप्रयोगो द्विर्वचनं पाठमिति सिद्धान्ताद्ग्रहेर्यङ्लुगन्ताद्विहितस्य ग्रहेर्विहितत्वापायो नेति ।

तद्भाष्यविरुद्धमिति । तथा हि 'एकाचो द्वे प्रथमस्ये' ति सूत्रे ग्रहेरङ्गादिति भाष्यमुपादाय कैयट आह तृचो हि जरीगृहित्यङ्गन्न तु ग्रहिः विशेषणसामर्थ्याद्धि यथाश्रुतविशेषणमिति । न च यङन्तप्रक्रमे एतत्समाधानस्य कैयटेनोक्तत्वात्कथं यङ्लुगन्ते तेन निर्वाह इति वाच्यम् । युक्तिसाम्याद्यङ्लुगन्तेऽप्युक्तसमाधानेन दीर्घाभावस्य लक्षितत्वात् । अत्र पक्षे यङ्लुकि दीर्घाऽप्रसक्त्या पूर्वस्मादपि विधौ स्थानिवद्भाव इति, ग्रहेर्विहितेटोदीर्घ इत्यस्य च समाधानस्योपायस्योपायान्तरादूषकत्वादिति न्यायेन यङन्तांशे उपायान्तरपरत्वेन नेयत्वम् । न च यथाश्रुतरूपपक्षे गृहीतमित्याद्यसिद्धिरिति वाच्यम् । अङ्गसंज्ञाप्रवृत्तिकाले यथाश्रुतरूपस्यैव सद्भावेन तत्सिद्धेः । ग्राहितमित्यादौ तु नैवम् , 'निष्ठायां सेटि' इति णिलोपे एकाच्त्वानपायादिति भावः ॥

भाष्ये ध्वनितमिति । तथाहि, अत्र क्ङितीत्यस्यानुवृत्तिर्नैवेतिपूर्वपक्षे सञ्जाते बहून्दोपानुद्भाव्य परिहृत्य चोक्तमेतावानेव विशेषः । अनुवर्त्तमाने क्ङिद्ग्रहणे छः षत्वम्वक्तव्यम् , अननुवर्त्तमाने तस्मिन् छः शत्वे कृते शान्तत्वादेव षत्वसिद्धौ 'व्रश्चादि' सूत्रे छग्रहणं न कर्तव्यम्भवतीति भावः । एवं वदन् भाष्यकार ऊठ्भाविभ्यो यङ्लुङ्नास्तीत्युक्तवान् । अन्यथा दिवेर्यङ्लुकि देदेति, देवेपि इत्यादौ ऊठो भावाभावाभ्यां महान् विशेषः स्यात् । ततश्च क्ङितोऽननुवृत्तावूठः प्रवृत्त्या देद्योति, देद्योषीत्यादिविशेषरूपलाभादेतावानेवेत्येवकारो विरुध्येतेत्यलम् ॥

इति यङ्लुगन्तप्रक्रिया ।

अथ तिङन्ते नामधातुप्रक्रिया ।

ननु गामिच्छतीति विग्रहे गव्यतीत्यादौ अन्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदत्वात् 'लोपः शाकल्यस्ये' ति वकारलोपः कुतो नेत्याशंकां समाधत्ते—न पदान्तत्वादिति । 'नः क्ये' इतिवक्ष्यमाणसूत्रेण क्यचि क्यङि च नान्तस्यैव पदत्वादिहाऽतथात्वान्न दोष इति भावः ॥

ननु गव्याञ्चकार गव्यितेत्यादौ 'यस्य हल' इति यलोपो दुर्वार इत्यत आह—सन्निपातपरिभाषया क्यचो यस्य लोपो नेति । यकारे परे यान्तादेशविधानाद्वकारो न यलोपनिमित्तम्भवतीति भावः ॥

ननु (सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः) इति वार्त्तिकेन प्रातिपदिकात्क्विपो वि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धानेन मालाशब्दस्य प्रत्ययान्तत्वेन प्रातिपदिकभिन्नत्वात्क्विप् न स्यादत आह (१) **लिङ्गविशिष्टपरिभाषयेति** । प्रातिपदिकस्य मालेत्यस्य ग्रहणे लिंगवोधकटाप्प्रत्ययविशिष्टस्य मालाशब्दस्याऽपि ग्रहणबोधनात्तदुपपत्तिः । समाधानान्तरमाह—**एकादेशस्य पूर्वान्तवत्त्वाद्वेति** । 'अन्तादिवच्चे' त्यनेन दीर्घरूपैकादेशस्याऽकाररूपपूर्वस्थानिघटितमालशब्दवृत्तिप्रातिपदिकत्वस्यैकादेशविशिष्टमालाशब्देऽतिदेशात्प्रातिपदिकत्वात्तदुपपत्तिरिति भावः ॥

ननु भूरिवाचरतीतिविग्रहे क्विबन्तादुक्तधातोर्लुङादौ 'गातिस्थेत्यादिसूत्राणां प्रासिद्धिर्वैरित्यत आह—**अभिव्यक्तत्वेन धातुपाठस्थस्यैव तत्र ग्रहणादिति** ।

उक्तञ्च—

अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः ।
शास्त्रार्थस्तेषु कर्त्तव्य उक्तेषु न तदुक्तिषु ॥ इति ।

पथीनतीति । पन्था इवाचरतीति विग्रहेऽन्तरंगत्वाद्दीर्घे गुणाऽभावाद्रूपमिदम् । माधवानुसारेणैतत् । परे तु हलन्तेभ्य आचारक्विपोऽभावादयुक्तमेतत् । किञ्च इन्हन्नि' त्यनेन शावेव दीर्घो नान्यत्रेति नियमात्प्रकृते दीर्घाऽप्राप्त्या गुणे सति पथेनतीत्येव रूपम् । नच तत्र सूत्रे शावित्युपादानाज्ज्ञापकस्य सजातीयापेक्षत्वे सुबानन्तर्यं एव नियमफलनिषेधप्रवृत्तिरिति वाच्यम् । तथा सति वृत्रघ्नः स्त्री वृत्रघ्नीत्याद्यसिद्ध्यापत्तेः । अत्र हन् शब्दस्य क्विबन्तत्वात्तत्राऽनुनासिकस्येतिदीर्घेऽस्मात्पुंयोगात्स्त्रियां वृत्त्या नान्तलक्षणङीपि कृतेऽल्लोपो न स्यादित्याहुः । येषामिन्नादीनां शावुपधादीर्घः परमदण्डिन्नित्यादौ तेषां दण्डिन्वृत्रहन्नादीनामेव, इन्हन्निति नियमो नतु पथ्यादीनामेतेषां तु शौ परे सुपन्थानीत्यादावुपधादीर्घप्रवृत्तावपि 'इतोऽत्सर्वनामस्थाने' इत्यत्वे कृते 'इन्हन्नि'ति नियमाप्रवृत्तेः । अन्यथा पन्थानावित्याद्यसिद्धिः । एवञ्च पूर्वोक्तरूपमेव साध्विति केचित् ॥

देवतीति माधव इति । अत्र 'दिव उत्' इत्येनेन दोत्वं भवति तेन पदान्तविषय एवोत्वविधानादिह पदान्तत्वाऽभावादिति भावः । **अत्र ऊठि द्यवतीत्युचितमिति** । लघूपधगुणं बाधित्वाऽन्तरङ्गत्वादूठि यण् । नच (असिद्धं बहिरंगमन्तरङ्गे) अनया परिभाषयाऽन्तरङ्गस्य यणः कर्त्तव्यत्वे बहिरङ्गस्योठोऽसिद्धत्वबोधनादच्परत्वाऽभावाद्यण् न स्यादिति वाच्यम् । अचोऽन्यानन्तर्यनिमित्तकेऽन्तरङ्गे कर्त्तव्ये न बहिरङ्गत्वप्रयुक्तासिद्धिरित्यर्थक (नाजानान्तर्ये बहिष्ट्वप्रक्लृप्तिरि)ति परिभाषयोक्तपरिभाषाया निषेधेनाप्रवृत्तेः। न च (वार्णादाङ्गं वलीयः) इत्यनया परिभाषया वार्णकार्य्यादाङ्गकार्यस्य वलीयस्त्वबोधनेन यणं बाधित्वा लघूपधगुणे ऊक्तप्रयोगासिद्धिरिति वाच्यम् । समानाश्रय एव तत्प्रवृत्तेः सिद्धान्तितत्वेनेह व्याश्रयत्वात्तद्प्रवृत्तेः । व्याश्रयेऽप्युक्तपरिभाषाप्रवृत्त्यभ्युपगमे तु अनित्यत्वेन तद्प्रवृत्तिकल्पनम् । अत एव सिवेरौणादिके न प्रत्यये स्योनः सिद्ध्यतीति भावः॥

---

(१) प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् । इति परिभाषास्वरूपम् । सामान्यरूपेण विशेषरूपेण वा प्रातिपदिकशब्दग्रहणे सति लिङ्गबोधकप्रत्ययविशिष्टस्य, अपि शब्दात्केवलस्यापि ग्रहणं बोध्यम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत्तु स्वामी स्वांचकारेति तदनाकरमेवेति। अनेकाच्त्वाभावादिति तदाशयः। अन्ये तु भाष्यकृता प्रत्ययग्रहणमपनीयेत्युक्तत्वात्प्रत्यायान्तत्वेन स्वामासेत्यादि रूपं साध्वेवेति वदन्ति।

युद्धे योऽयं ग्रामशब्द इति-अयम्भावः, युद्धे योऽयं ग्रामशब्दः स च समुपसर्गविशिष्ट एवास्ति न केवलग्रामशब्दस्ततो ग्रामशब्दपाठेनैव संग्रामशब्दलाभे पुनः समुपसर्गविशिष्टपाठो व्यर्थीभूतो ज्ञापयति धातुसंज्ञाप्रयोजकीभूतप्रत्ययस्य चिकीर्षितत्वे उपसर्गसमानाकारकपूर्वपदस्य पृथक्करणं भवतीति। ज्ञापने तूपसर्गसमानाकारेत्यंशानुपादाने संग्रामघटकसंशब्दस्य क्रियायोगाऽभावादुपसर्गत्वाऽभावेन ज्ञापकोपपत्तिर्न स्यात्। प्रयोगभेदेनोपसर्गस्यापि तत्समानाकारत्वं बोध्यम्। तत्र च चिकीर्षितपदोपादानात्पृथक्करणेन समासाऽभावकल्पनेऽपि तद्विषये क्यङादिप्रत्ययविधायकसूत्रे सुबन्तादित्यंशे यस्माद्विहितस्तदादीत्यंशाऽप्रवृत्त्या न दोषः। पृथक्क्रियत इत्यनेन जातसमासाऽभावकल्पनम्। अत एव, सुमनाय्येत्यादौ पुनः क्त्वान्तेन समासे ल्यप्सिद्धिः। उक्तञ्च तद् 'भृशादिष्विव त्यत्र भाष्ये संग्रामयतेरेव सोपसर्गान्नान्यस्मात्सोपसर्गादिति। ज्ञापनफलञ्च स्वमनायतेत्यादौ मनःशब्दात्प्रागडिति बोध्यम्।

ज्ञापकस्य सजातीयविषयत्वात्साजात्यं दर्शयति-तेनेत्यादिना। यत्र सकलस्योपसर्गरूपस्य श्रवणं नत्वादेशेनाऽपहरणं तत्रैव पृथक्करणं भवति नत्वन्यत्रेति। अत एव, आ ऊढः स इवाचर्य्य ओढायित्वेत्यत्र उन्मनाय्य अवगल्भ्येति वन्न ल्यबापत्तिः। ज्ञापकस्य विशेषविषयत्वे षष्ठाध्यायीसूत्रस्थवार्त्तिकस्य तद्भाष्यस्य च प्रामाण्यम्। एतच्च तथाहीत्यादिना मूले एव स्पष्टत्वान्नात्र लिखितम्। क्यजन्तादुस्राशब्दाल्लङि अंगस्याटि कृते 'उस्यपदान्तादि' त्यनेन प्राप्तपररूपस्य प्रतिषेधार्थमुक्तवार्त्तिकम्। न च औस्रीयदित्यत्रोसोऽनर्थकत्वान्न तत्प्राप्तिरिति वाच्यम्। छिन्द्युर्भिन्द्युरित्यादावप्युसोऽनर्थकत्वेन दोषापत्तेः। नच सर्वत्रोसोऽनर्थकत्वे क्व सूत्रप्राप्तिरिति वाच्यम्। अयुः, अबुरित्यादौ तत्प्रवृत्तेः सुघटत्वात्। एवञ्चाऽयमेव (उस्योमाङ्क्ष्विव)ति प्रतिषेधोऽत्रार्थवद्ग्रहणपरिभाषाप्रवृत्तिज्ञापकः।

औङ्कारीयदिति—अत्र 'ओमाङोश्च' इत्यनेन प्राप्तपररूपस्य प्रतिषेधः। आडागमस्याऽऽङिपरे उदाहरणं प्रदर्शयति—औढीयदिति। आदेशेन (एकादेशरूपेण) अपहृतस्थलेऽपि पृथक्कृतावाङः परत्राटो विधानादाडागमस्याऽऽङि पररूपाप्राप्त्या निषेधो व्यर्थः स्यात्। एवञ्चाऽयमेव निषेधो ज्ञापकस्य विशेषविषयत्वे प्रमाणमिति बोध्यम्। ज्ञापकस्य विशेषविषयत्वे न केवलषाष्ठवार्त्तिकतदीयभाष्ययोरेव प्रमाण्यमपि तु चशब्दं प्रयुञ्जानस्य सूत्रकारस्याऽप्यनुकूलस्य प्रामाण्यमित्याह—चशब्देनेति। एवञ्च विनिगमकाऽभावेन तस्य बाध्यसामान्यचिन्तया सर्वबाधकत्वम्। अन्यथा (पुरस्तादपवाद) न्यायेन ओमाङोश्चेत्यस्यैव बाधो नतु उस्यपदान्तादित्यस्येत्यवसेयम्॥

अत्राच्वेरित्यनुवृत्त्येति। अत एव लोहितभिन्नानां लोहितादिगणे पठ्यमानानां भृशादिपाठे नित्यात्मनेपदमेव प्रयोजनमुक्तम्भाष्ये न तु अभूततद्भावविषयतालाभोऽपीति तात्पर्य्यम्॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इष्ठवदित्यतिदेशात्पुम्वद्भावादय इति—आदिशब्देन रभावटिलोपादयः । एतदयतीति । न च परत्वादत्रातिदिश्यमानकार्याणामुपदेशस्यैव देशत्वाङ्गीकाराट्टिलोपः स्यादिति वाच्यम् । पुंवद्भावातिदेशसामर्थ्यात् अन्तरङ्गत्वाद् 'भस्याढे तद्धिते' इत्यस्य प्रत्ययोत्पत्तेः प्रागेव प्रवृत्त्या 'टेरि' त्यस्याऽप्रवृत्तेः । न च पुंवत्त्वस्यासिद्धत्वेन टिलोपस्याऽत्र दुर्लभत्वमिति वाच्यम् । एतयति श्येतयतीति भाष्योदाहरणेनाऽऽभीयासिद्धत्वस्यानित्यत्वाट्टिलोपस्य दुर्वारत्वादिति भावः ॥

ननु अतिदेशशास्त्रे पुंवद्भावग्रहणं व्यर्थं टिलोपेनैव एयतीत्यादिसिद्धेरिति चेन्न । दारयतीत्यस्य सिध्यर्थं पुंवद्भावग्रहणस्य सार्थक्यात्तदाह—**दरदमाचष्टे दारदयतीति** । दरदोऽपत्यं दारदः, 'द्वयञ्मगध' इत्यण् तस्य स्त्रियाम् 'आतश्चे' ति लुकि सिद्धिः । अत्र पुंवद्भावस्याऽभावे सति टिलोपे दरदयतीत्यापत्तिः ॥

ननु अजढदित्यत्र टिलोपे सति णिज्विशिष्टस्य द्वित्वे पश्चादभ्यासेऽकारो दुर्लभ इत्यत आह—**ओः पुयणजीतिसूत्रे वर्णप्रत्याहारग्रहणे लिङ्गमिति** । त्वां मां वाऽऽचष्टे इति विग्रहे त्वापयति, मापयतीति रूपम् । वस्तुतस्तु त्वादयति मादयतीत्येव युक्तम्, तदेवोपपादयति, । **अन्तरङ्गत्वादित्यादिना** । न च (वार्णादाङ्गं बलीयः) इत्येतद्बलाट्टिलोपस्यैव प्रवृत्तौ त्वापयतीत्येव स्यादिति वाच्यम् । समानाश्रये तत्प्रवृत्त्यभ्युपगमेनेह व्याश्रये तत्प्रवृत्तेः । न च भाष्ये प्रकृतिभावस्य प्रत्याख्यातेन दोषस्तदवस्थ एवेति वाच्यम् । प्रेष्ठाद्युदाहरणविशेषे भाष्यस्याऽन्यथासिद्धिपरत्वेनादोषात् । अयम्भावः, 'प्रकृत्यैकाजि'ति सूत्रस्य वृत्तिकारेण प्रेयान् प्रेष्ठ इत्याद्युदाहरणदानात्तत्र प्रकृतिभावं विनाऽपि प्रत्ययाद्यादेशविधायकसूत्रस्य 'असिद्धवदत्राभादि' त्यनेनासिद्धत्वात्प्रस्थादावकारोच्चारणसामर्थ्यात्तल्लोपाभावस्य भाष्ये साधनात् । स्रग्विन् स्रजिष्ठ इत्यादावपि लोपापवादविन्मतो र्लुकः प्रवृत्त्या न टिलोपः । नच प्रकृत्यैकाजिति सूत्रस्यैतावता प्रत्याख्यानमेवाङ्गीकरणीयमिति वाच्यम् । त्वापयतीत्याद्यर्थन्तदावश्यकत्वादिति ॥

टेरित्यस्यैवेति—एवकारेण 'नस्तद्धिते' इत्यस्य व्यावृत्तिः । वस्तुतः प्रकृत्यकाजि'ति सूत्रेऽनेकाजित्येव सिद्धे प्रकृतिग्रहणेन (येन नाप्राप्ति) न्यायप्रवृत्तिबोधनात् प्रकृतिभावस्य टेरित्येतन्मात्रबोधकत्वमयुक्तम् । तथाच नस्तद्धित इत्यस्यापि प्रकृतिभावस्यान्याय्यत्वेन श्वानयतीत्येव रूपम् । सम्प्रसारणविधायकस्य श्रूयमाणान्नन्त एव प्रवृत्त्या टिलोपेऽपि सम्प्रसारणं दुर्लभमेवेत्यलम् ॥

शुनयतीति—ननु सम्प्रसारणे कृते पूर्वरूपत्वं बाधित्वा (वार्णादाङ्गमि) तिन्यायेन टिलोपे दुर्लभमिदं रूपमिति चेन्न । शुशुवतुरित्यादौ सम्प्रसारणे कृतेऽनेन न्यायेन 'एरनेकाजि' तियणि रूपाऽसिद्धया पूर्वरूपविषयेऽनित्येन तन्न्यायाप्रवृत्तेरिति भावः ॥

अन्ये तु शुनयतीति रूपमाहुरिति—इदमत्रारुचिबीजं ब्रह्मवच्छन्दादिष्ठनि मतोर्लुकि टेरित्यस्याप्रवृत्त्या नस्तद्धित इत्यस्य प्रवृत्तिदर्शनादिष्ठनि तस्याद्दष्टत्वादित्यसङ्गतम् । किञ्च ब्रह्मिष्ठ इत्यादावित्यप्यसङ्गतम् । तथाहि, केवलाद्गुणवचनत्वेन इष्ठनि एव दुर्लभः । मत्वन्तादिष्ठनि मतोर्लुकि तेन टेरित्यस्य प्रवृत्तिमात्रबोधनेन लुगुत्तरं तदप्रवृत्त्यापरत्वादित्यस्यासङ्गतिः । किञ्च टेरित्यपेक्षया नस्तद्धित इत्यस्यैव परत्वमिति ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अङ्गवृत्तपरिभाषया सम्प्रसारणन्नेत्येक इति—अयम्भावः, टिलोपेनासो लोपे सम्प्रसारणाऽप्राप्त्योक्तपरिभाषोपन्यासो व्यर्थः ॥

विदावयतीत्यन्य इति—अत्र पूर्ववदेवाऽरुचिबीजम् । एवञ्च विद्वयतीत्येव रूपमिति बोध्यम् ।

उदीचयतीति—उदञ्चमाचष्ट इति विग्रहे उद उपसर्गत्वात्पृथक्करणेनैकाच्त्वात्प्रकृतिभावे रूपम् ॥

तिरायतीति—तिर्यञ्चमाचष्ट इति विग्रहे तिरसोऽनुपसर्गात्पृथक्करणाऽभावादेकाच्त्वाऽभावेन प्रकृतिभावेन प्रकृतिभावाऽप्राप्तौ टिलोपे रूपम् ।

असिद्धवदत्रेति चिणोलुङ्न्यायेय प्रथमटिलोपोऽसिद्ध इति—अपाचितरामित्यत्र चिणः परस्य तशब्दस्य लुकि पुनस्तरप्प्रत्ययस्य लुग् न भवति प्रथमलुकोऽसिद्धत्वेन व्यवधानात्तद्वदित्यर्थः ॥

इति नामधातुप्रक्रिया ।

अथ तिङन्ते आत्मनेपदप्रक्रिया ।

कर्तरि कर्मव्यतिहारे—अत्र कर्मपदेन क्रियाग्रहणं व्यतीहारपदस्य विनिमयः, परिवर्त्तनम्वाऽर्थः, तच्च स्ववस्तुदानपूर्वकपरवस्त्वाङ्गीकाररूपम् । कर्मव्यतिहारपदेन न केवलक्रियाविनिमयो गृह्यते अपि तु परस्परकरणपरिवर्तनमपि, संप्रहरन्ते राजान इति कैयटोदाहरणात् । 'अनुदात्तङित आत्मनेपदमि'ति सामान्यसूत्रेणाऽत्मनेपदसिद्धौ अस्य पृथगारम्भसामर्थ्यात्कर्तृग्रहणमेतत्सूत्रघटकमुत्तरार्थमिति भावः ॥

नेर्विशः । अत्रार्थवद्ग्रहणलक्षणप्रतिपदोक्तपरिभाषाभ्यां नेरुपसर्गस्य ग्रहणात् मधूनि विशन्ति भ्रमरा इत्यत्र नात्मनेपदापत्तिः । ननु अटा व्यवायाद्न्यविशतेत्यत्र नात्मनेपदमिति चेन्न । स्वाङ्गस्याऽव्यवधायकत्वात् । नचाऽङ्गभक्तस्याऽटो विकरणान्तं प्रत्यवयवत्वेऽपि धातुम्प्रत्यनवयवत्वेन तदवस्थ एव दोष इति वाच्यम् । (उपसर्गनियमेऽड्व्यवाय उपसंख्यानमि) ति वार्त्तिकेनोपसर्गात्परधातुतो विहितकार्यस्योपसर्गधात्वोरन्तरालपतिताऽड्व्यवायेऽपि बोधनेनाऽदोषात् । ननु निरुपोपसर्गविशिष्टविशेरात्मनेपदविधाने इत्युक्त्वा मैथिली भर्त्तुरङ्के निविशतीं भयात्, इति कथं सङ्गतमिति चेन्न । अङ्गानि विशतीमिति पाठभेदेन तत्संगतेरित्यलम् ॥

ननु अपाच्चतुष्पाच्छकुनिष्वित्यत्र । (सुडपि हर्षादिष्वेवे) ति वार्त्तिकम् । अत्र हर्षादिष्वित्यस्याऽभावे अपकिरति कुसुममित्यत्रसुडापत्तिः । तत्सत्त्वे तु आलेखनाभावात्सुडभावः, म्रियमाणो वृषभः पादैर्भुवमपकिरतीत्यत्र हर्षाद्यभावान्नासावित्यभिप्रायेणाह मूले-हर्षादिष्विति किम् । अपकिरति कुसुममिति । नेष्यत इति । अत एव भाष्ये ससुट्कान्येवोदाहरणानि दृश्यन्ते । गजोऽपकिरतीति । स्वभावाख्यानमत्र ॥

णेरणाविति । अत्र चत्वारि वाक्यानि प्रतीयन्ते । तथाहि, णेरित्येकं वाक्यम्, अणौ यत्कर्म णौ चेदिति द्वितीयम्, स कर्तेति तृतीयम्, अनाध्याने इति चतुर्थम्, आत्मनेपदस्याधिकारः द्वितीययोगे कर्मपदस्य क्रियापरत्वम्; तृतीययोगे द्वितीययोगस्यानुवृ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्तिस्तत्र कर्मपदस्य कर्मकारकबोधकत्वम्, तथा च, ण्यन्तादात्मनेपदं स्यादणौ या क्रिया सैव ण्यन्तेनोच्येत अणौ यत्कर्मकारकं स चेण्णौ कर्ता स्यान्नत्वाध्यान इति तदर्थः । एतदुदाहरणानि तु अपरिस्पन्दनसाधनसाध्यः कर्तृस्थभावकाः सपरिस्पन्दनसाधनसाध्याः कर्तृस्थक्रियाश्च, एतच्च तथाहीत्यादिना मूले एव स्पष्टत्वान्नोपपादितम् ॥

ननु पश्यन्तीत्यादिना निवृत्तप्रेषणक्रियाम्प्रतिपाद्याऽध्यारोपितप्रेषणक्रियाम्प्रतिपादयति—यद्वेति । हेतुत्वारोपादिति । प्रेषणांशत्यागात्प्रेषणान्तरारोपेणापि सौकर्यप्रतीतेरनुभवसिद्धत्वादत्रापि सौकर्यविवक्षाया एव हेतुत्वमिति भावः । अर्थः प्राग्वदिति । पक्षद्वयेऽप्युदाहरणीभूतान्त्यकक्षाद्वयस्य प्रेषणांशप्रतीत्यभावादिति भावः। आधिक्यादिति । अत्र पक्षे णौ चेत्यनेनाऽधिक्यमात्रस्य व्यवच्छेदो नतु न्यूनत्वस्यापि सः । अन्यथा तृतीयकक्षायामपि न स्यात् । प्रकृत्युपात्तप्रेषणांशत्यागेन न्यूनत्वापत्तेरिति भावः ॥

इत्यात्मनेपदप्रक्रिया ॥

अथ तिङन्ते परस्मैपदप्रक्रिया ।

ननु 'अनुपराभ्यां कृञः, इत्यनेन कर्तरि परस्मैपदविधानात्कर्मकर्तर्यपि तत्प्रसक्तिरिति चेन्न । कार्यातिदेशशास्त्रातिदेशपक्षद्वयमध्ये कार्यातिदेशपक्षस्यैव प्राधान्यात्कर्मकर्तर्यात्मनेपदादिविधायकस्य 'कर्मवत्कर्मणे' त्यस्योक्तसूत्रापेक्षया परत्वादनेन तद्बाधेन तदप्रसक्तेः । नच कार्यातिदेशपक्षेऽप्यतिदिश्यमानकार्याणामुत्पत्तिदेशस्यैव देशत्वांगीकारात्, शास्त्रातिदेशपक्षे कर्मवत्कर्मणेत्यनेनात्मनेपदाद्यविधाने तद्विधायकं 'भावकर्मणोरि'ति शास्त्रस्य वातिदेशात्तस्य च अनुपराभ्यामित्यतः पूर्वत्वेनानेनैव तद्बाधाद्दोषस्तदवस्थ एवेति वाच्यम् । 'कर्तरिशप्'शेपादि' ति सूत्रद्वयात्कर्तृपदानुवर्त्तनेन कर्तृरूपे कर्तर्येव परस्मैपदं नतु कर्मरूपे कर्तरीति व्याख्यानेनादोषादिति भावः । नच कर्तैव यः कर्तेति व्याख्याने पदार्थतावच्छेदकैक्येन(१)घटो घट इत्यत्रेव शाब्दबोधो न स्यादिति वाच्यम् । एकस्य कर्तृशब्दस्य स्वतन्त्रपरत्वादपरस्य व्यापाराश्रयपरत्वेन स्वतन्त्राऽभिन्नव्यापाराश्रय इत्यर्थे पदार्थतावच्छेदकस्य भेदेनादोषादित्यलम् ॥

इति परस्मैपदव्यवस्था ।

अथ तिङन्ते भावकर्मप्रक्रिया

ननु उत्पत्त्यर्थकाद्भवतेर्णिजन्तात् 'एरचि' इत्यचि निष्पन्नस्य भावशब्दस्य विवरणमाह—भावनेति । भवतेरुत्पत्त्यर्थत्वं ण्यन्तस्य भवतेः शुद्धेन करोतिना समानार्थत्वं च दर्शयति—उत्पादना क्रियेति । उत्पादना च फलोत्पत्त्यनुकूलव्यापारः । न च फलशब्दस्यो-

(१) (अभेदान्वयबोधश्च विरूपोपस्थितयोरेव) तिव्युत्पत्त्यनुरोधाद्विरुद्धधर्माभ्यामुपस्थितनामार्थद्वयस्यैवाऽभेदान्वयलाभेन नीलो घट इत्यादौ विरुद्धधर्माभ्यां नीलत्वघटत्वाभ्यामुपस्थितयोर्नीलघटपदार्थयोरभेदान्वयो भवति। घटो घट इत्यत्र तु घटत्वधर्मस्यैक्येन पदार्थयोर्विरुद्धधर्माभ्यामुपस्थित्यभावान्नाभेदान्वय इति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रूपत्याश्रयबोधकत्वेन द्रव्यादिषु सत्त्वात्स्थीयत इत्यत्र स्थितेरुत्पत्यभावादनुपपन्नमिति वाच्यम् । कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थत्वरूपस्यैव फलत्वात् । कर्मणि प्रत्यये विशेषणविशेष्यभावव्यत्यासेऽपि फलव्यापारयोः फलत्वासम्भवनिरासाय कर्तृप्रत्ययसमभिव्याहार इति विशेषणम् । विशेष्यता च न केवलमुख्यविशेष्यतैव, किन्तु प्रकारत्वावच्छिन्नविशेष्यताऽपि गृह्यते । विशेष्यताशब्देनैतादृशविशेष्यताग्रहणादेव गत्यर्थकधातुप्रकृतिकणिजन्तस्थले संयोगस्य फलत्वोपपत्तिः । तद्धात्वर्थत्वं तद्धातुवाच्यत्वम् । चेतनाचेतनवृत्तिफूत्कारयत्नादीनां क्रियात्वधात्वर्थत्वयोर्बोधनायाऽनेकपर्यायशब्दोपादानम् । क्रियाया धातुवाच्यत्वादेव व्यापारार्थकक्त्वा विवरणविव्रियमाणयोः समानार्थत्वस्य, कथं ज्ञायते क्रियावचनाः पचादयः यदेतेषां करोतिना सामानाधिकरण्यमित्यनेन 'भूवादि' सूत्रस्थभाष्ये स्पष्टप्रदर्शनम् । क्रियात्वञ्च धातुवाच्यत्वसमानाधिकरणो जातिविशेषः । भूवादिसूत्रमेव तत्परिचायकमिति बोध्यम् ।

सामानाधिकरण्याभावादिति । असत्त्वभूतक्रियायाः सत्त्वार्थकयुष्मदादिसामानाधिकरण्यासम्भवादिति भावः ॥

तिङ्वाच्यभावनाया असत्त्वरूपत्वेनेति । असत्त्वरूपत्वञ्च, लिङ्गाद्यनन्वयित्वं सर्वनामपरामर्शयोग्यत्वं चेति ॥

तदुक्तम्—

असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते । इति

औत्सर्गिकत्वेनेति । द्विबह्वोर्द्विवचनबहुवचने एकवचमिति भाष्योक्तन्यासेनैकवचनमित्यस्यौत्सर्गिकत्वं बोध्यमिति प्राञ्चः । शेखरकृतस्तु एकक्रियेति 'रूपवादि' सूत्रस्थभाष्येण क्रियाया एकत्वमस्त्येव, तस्य प्रकृत्यर्थेऽन्वयादेकवचनं, स्वोत्तरतिङ्वाच्यकारकगतस्य द्वित्वादिकस्य तत्रारोपात्कर्तृकर्मतिङ्षु द्विवचनादेः सिद्धिः । द्वित्वादिकस्यापि प्रकृत्यर्थे एवान्वयः । यथा हतशायिकाः शय्यन्ते इत्यादौ हतशयनसदृशानि शयनानीत्यर्थं उपमाने बहुत्वोपादानसामर्थ्यादुपमेये तिङर्थक्रियारूपे उपमानगतबहुत्वारोपेण बहुवचनं तद्वत्तिङ्वाच्यकारकगताया एवारोपो नत्वन्यकारकगताया इत्यत्राऽर्थशक्तिस्वभाव एव हेतुरिति ।

तदुक्तं हरिणा—

एकत्वेऽपि क्रियाख्याते साधनाश्रयसंख्यया ।
भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रयः । इति ॥

ननु प्रथमपुरुषस्यापि शेषसमानाधिकरणत्वनियतत्वात्सोऽपि न स्यादिति चेन्न ! शेषग्रहणं त्यक्त्वा प्रथमस्योत्सर्गत्वकरणेन तदुपपत्तेः । भावाख्यातस्थले एकवचनमेवेति वदतो दीक्षितस्य (तव)मतेऽपि यत्रैकवचनञ्चान्यच्च प्राप्नोति तत्रैकवचनमेवेति नियमांगोकार एवेष्टसिद्धिः । अन्यथा द्वित्वे द्विवचनमेव बहुवचनमेवेति नियमेन द्विवचनबहुवचनयोरनियतत्वादेकत्वेऽप्यापत्तिः । किन्त्वेकवचनमेव तस्यौत्सर्गिकत्वेन संख्यानपेक्षणादिति दीक्षितोक्तिस्तु न समीचीना, वक्ष्यमाणप्रकारेण प्रथमपुरुषैकवचनोपपत्तेः । तथाहि, यथा कर्मण्येव द्वितीयेत्यादिरीत्या प्रत्ययनियमेऽव्ययेभ्यो विभक्तिसामान्याऽभावप्रसक्तौ सत्यामेक-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वचनमिति सूत्रस्याप्राप्तप्रापणार्थत्वेनाऽविशेषात्सर्वविभक्त्येकवचनविधायकत्वन्तथा प्रकृतेऽपि सर्वेषाम्पुरुषाणामनेकवचनानि प्राप्नुवन्ति । उक्तप्रकारेणैकवचनमित्यस्य नियमत्वे तु येषाम्प्रत्ययानामेकवचनञ्चान्यच्च प्राप्नोतीत्याकारकोक्तिबोध्यत्वं तेष्वेकवचनमेवेति नियमे प्रथमपुरुषैकवचनमेव भवतीति भावः ॥

ननु आर्द्धधातुक इत्यादेर्विषयसप्तमीत्वाद्वधादेशस्यान्तरंगत्वेन चिण्वत्त्वं बाधित्वा वधादेश एव स्यादत आह–आशीर्लिङि वधादेशस्येति । अपवाद इति । वाक्यार्थबोधवेलायां बाधनाऽभावेन हन्तेरपि सीयुटा सम्बन्धेन तस्य निरवकाशत्वात्तस्यापवादत्वम् । भाष्ये तु वधिभावात्सीयुटि चिण्वत्त्वं विप्रतिषेधेनेत्युक्तम् । एवञ्चायुक्तमेवापवादत्ववर्णनमित्यलम् ॥

ननु चिण्वद्भावेन चिणि दृष्टकार्यस्य विधानादवधीदित्यादौ चिणि वधादेशस्य दृष्टत्वादत्रापि वधादेशो दुर्वार इत्याशङ्कते—नच स्यादिष्विति । समाधत्ते—अङ्गस्यैवातिदेशादिति । चिण्निमित्तकाङ्गसम्बन्धिकार्यस्यैव विधानादवधीदित्यादौ लक्ष्यानुसारिव्याख्यानाच्च चिण्निमित्तकवधादेश इति ॥

ननु ह्रस्वपदानुवृत्त्यैव विकल्पसिद्धौ 'चिण्णमुलोरि'त्यत्र दीर्घग्रहणमनावश्यकमित्यभिप्रेत्याह—प्रकृतो मितां ह्रस्व एव तु न विकल्पित इति ॥

दीर्घविधौ हि णिचो लोपो न स्थानिवदिति । 'न पदान्त' सूत्रेण दीर्घविधौ स्थानिवत्त्वनिषेधादिति । नच 'असिद्धवदत्रे'ति णिचोऽसिद्धत्वमिति वाच्यम् । समानाश्रयत्वाऽभावेनाऽऽभीयासिद्धत्वाऽप्राप्तेः । भाष्ये तु उक्तनिषेधसूत्रे दीर्घविधेः प्रतिदीव्न इत्युदाहरणदानात् त्रैपादिकदीर्घस्यैव ग्रहणेवोचितमेव तत्प्रत्याख्यानमित्यर्वाचामभिप्रायः ॥

नन्वेवं ण्यन्ताण्णौ दीर्घविकल्पानापत्तिर्व्यवधानादत आह—णाविति जातिपरो निर्देश इति । दीर्घग्रहणं मास्त्विति । ह्रस्वविकल्पेनाऽपीष्टसिद्धिरिति भावः । वस्तुतस्तु 'चिण्णमुलोरि'तिसूत्रस्थं दीर्घग्रहणमावश्यकमेव, घटादिपठितहेडेश्चिणि अहिडि अहीडीति रूपसिद्ध्यर्थं दीर्घग्रहणं, ह्रस्वविकल्पे तु अहेडीति स्यात् । एवं ण्यन्ताण्णिचि रूपसिद्ध्यर्थमपि दीर्घग्रहणमिति दिक् ॥

इति भावकर्मप्रक्रिया ।

अथ तिङन्ते कर्मकर्तृप्रक्रिया ।

यदा सौकर्येति । सुखेन कर्तुं योग्यः सुकरस्तस्य भावस्सौकर्यम् । कर्त्तुर्व्यापारो न विवक्ष्यत इति—सौकर्यातिशयबोधनाय कर्मादिकारकव्यापारस्यैव प्रधानधात्वर्थत्वेन विवक्षणात्कारकान्तराणामपि स्वस्वव्यापाराश्रयत्वेन कर्तृत्वाक्षतेः । सकर्मका अपि प्रायेणाऽकर्मका इति—व्यापारव्यधिकरणफलाश्रयाभावेन तेषामकर्मकत्वम् । द्विकर्मकधातूनां कर्मणः कर्तृत्वात्प्रायेणेत्युक्तम् । तेन यगात्मनेपदचिण्चिण्वदिटः स्युरिति । ननु कार्यातिदेशेऽप्यतिदिश्यमानकार्याणामुत्पत्तिदेशस्यैव देशत्वाङ्गीकारात्परत्वाच्छ्यप्परस्मैपदे एव नतु यगात्मनेपदे इति चेन्न । 'न दुहस्नुनमामि'त्यादिसामर्थ्यात्परस्यापि बाधेन तदप्राप्तेरिति भावः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु शास्त्रातिदेशेऽपि लक्ष्यसिद्धौ कार्यातिदेशाङ्गीकरणं किमर्थमिति चेन्न । शास्त्रस्यापि कार्यार्थत्वेन मुख्यत्वात्कार्यातिदेशस्यैवाङ्गीकारादित्याह-कार्यातिदेशोऽयमिति ।

ननु सौकर्यातिशयबोधनार्थं कर्तृव्यापारविवक्षणे कर्मादेः कर्तृत्वेन धातोरकर्मकत्वेन ततः कर्तृभावयोर्लकारविधानेन तत्र भावे लकारविधाने कर्तृरनभिहितत्वातिदेशेन तस्य कर्मवद्भावेन द्वितीया दुर्वारै त्याशयेनाह—द्वितीया स्यादिति । नचैतदपेक्षया तृतीयायाः परत्वादेतदापत्तिप्रदर्शनस्यैवौचित्येन द्वितीयापत्तिप्रदर्शनमयुक्तमिति वाच्यम् । अतिदिश्यमानकार्यायां कार्यातिदेशस्यैव देशत्वमित्यर्वाचीनमते द्वितीयायाः परत्वेनादोपात् । भाष्यमते तृतीयापत्तिरेव, तस्याश्च 'न दुहस्नुनमां यक्चिणौ' 'कुषिरजोरि' त्याद्यारम्भसामर्थ्यात्परस्मैपदे विधीयमानशप्परस्मैपदबाधेऽपि प्रथमाबाधे मानाऽभावः समाधानम् । तथा च पूर्वोक्तापत्तिस्तदवस्थैवेति चेन्न । भावे प्रत्यये कृते कर्तृर्लकारेणानुपस्थित्याऽतिदेशाप्रवृत्तेः । (व्यत्ययो बहुलं) (लिङ्याशिष्यङि)ति संहितापाठेऽनुस्वारस्य परसवर्णेन जाते लकारे द्विलकाराल्ल इत्यनुवृत्त्या लकारवाच्यस्यैव कर्तुः कर्मवद्भाव इत्यर्थलाभेन यगादिकमेव नतु द्वितीयेति भावः । अत एव कृत्यक्तखलर्था न कर्मकर्तरि किन्तु भाव एवेति भावः । लकारेणैव कर्मकर्तुरुपस्थानेन कृदादिप्रसक्तिर्न, उक्तार्थानामप्रयोगात् । लविधेः पूर्वं तु सुतरां न तत्प्रसक्तिर्लकारोपस्थाप्यकर्तुरभावेन कर्मवत्त्वाऽभावादितिभावः ।

ननु तुल्यत्वं नाम सादृश्यं तस्य च भेदनिबन्धनत्वेन प्रकृते कर्मणः कर्तृत्वविवक्षायां कर्मस्थफलरूपक्रियाया एव कर्तृस्थत्वेन भेदाऽभावात्सूत्रमिदमसंगतमित्याशंकते—ननु पचिभिद्योरिति । वास्तविकभेदाऽभावेऽप्युपाधिकृतभेदोऽस्त्येवेत्यभिप्रेत्य समाधत्ते—कर्मत्वकर्तृत्वेति—यथा पीतघटो नीलघटभिन्न इत्यत्र विशेषणभेदाद्भेदस्तथैव कर्तृत्वसमानाधिकरणा कर्मत्वसमानाधिकरणा च क्रिया भिन्नैवेति भावः ॥

तुल्यत्वव्यवहार इति । प्रत्यासत्त्या समानधातौ कर्मस्थक्रियया तुल्यक्रियाश्रयगात् पचत्योदनं देवदत्त इत्यत्र कर्मणो राध्यत्योदन इत्यत्र कर्तृत्वेऽपि न कर्मवद्भाव इति भावः । कर्मणेति किमिति । एतदभावेऽसिस्थाल्योर्व्यापारसत्त्वात्क्रियया तुल्यक्रियत्वस्याक्षतत्वाद्दोषः । तत्सत्त्वे तु सामर्थ्याद्दृश्यमानकर्मनिष्ठविशेषप्रयोजककर्मस्थक्रियाया ग्रहणान्न साध्वसिरित्यादौ दोष इति भावः ॥

ननु करणत्वाद्यवस्थायां वस्तुतः सन्नप्यसिस्थाल्योर्व्यापारो, न धातूपात्तः, प्रकृतसूत्रे च 'धातोरेकाच' इत्यतो धातोरित्यनुवर्त्य धोतोर्वाच्यक्रियया तुल्यक्रिय इत्यर्थे न दोषोऽत आह—किञ्चेति । कर्मणेत्येतत्सामर्थ्येन दृश्यमानकर्मनिष्ठविशेषप्रयोजककर्मस्थक्रिया लक्ष्यत इति भावः ॥

गच्छति ग्राम इत्यादि । अत्र गम्यमानग्रामादिकर्मनिष्ठविशेषप्रयोजककर्मस्थक्रियाया अभावात्कर्तृस्थक्रियात्वमिति भावः ॥

सकर्मकाणां प्रतिषेध इति । सौकर्यविवक्षणाऽभावेपि प्राप्तकर्मवद्भावनिषेधार्थं वार्त्तिकमिदम् । पच्यते ओदन इत्यत्रात एव दोषो न ।

अन्योऽन्यं स्पृशत इति । अयम्भावः, कर्मपदेन तत्स्थक्रिया लक्ष्यते नतु तेन कर्मत्वोपयोगिनी तत्स्था क्रिया मानाभावात्, एवञ्चाऽन्योऽन्यमित्यादावुभयोः शब्दभेदेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कर्तृत्वकर्मत्वसत्त्वादेवैकस्मिन् संयोगानुकूलक्रिया संयोगो वा सैवाऽपरस्मिन्कर्तरीति कर्मस्थक्रियकर्तृसत्त्वात्प्राप्तिः। आश्रयभेदेन च तुल्यत्वम्। नच स्पर्शस्य कर्तृस्थत्वेन कथमेतत्प्रवृत्तिरिति वाच्यम्। तयोः कर्मणोरन्योऽन्यसंयोगकृतहर्षादिलक्षणविशेषदर्शनात्कर्मस्थत्वेन तत्प्रवृत्तेरिति भावः॥

अजा ग्रामं नयतीति—गमनानुकूलव्यापाररूपेणाऽजानिष्ठफलेन नेतृव्यापारेण वा तत्र विशेषादर्शनेन कर्मस्थक्रियत्वाऽभावादिदं चिन्त्यम्। यदि ग्रामसंयोग एव तथेत्युच्यते तर्हि ग्रामं गच्छतीत्यादौ ग्रामेऽपि पुरुषसंयोगरूपविशेषदर्शनेन गम्यर्थस्यापि कर्मस्थत्वं स्यात्। अत एव अन्योऽन्यमाश्लिष्यत इत्येवोदाहृतम्भाष्ये इत्यलम्॥

विध्यर्थमिदमिति। उपवासादितपः तापसन्तपति दुःखयतीत्यर्थः। एवञ्च तापसस्य कर्मत्वे तपेर्दुःखजननमर्थः। तापसस्य कर्तृत्वे तु अर्जनमर्थः। तापसस्तपस्तप्यते अर्जयतीत्यर्थः। एवञ्च क्रियाभेदात्सकर्मकत्वाच्चाऽप्राप्ते विधिरिति भावः। एवकारस्तु व्यर्थ एवेति वृत्त्यनुसारिण इति। भाष्ये तु (सकर्मकाणां प्रतिषेधो वक्तव्यः) इत्यत्र प्रत्याख्यानाय एवकारसामर्थ्यान्नियमार्थत्वमुक्तं तपेरेव सकर्मकस्य नान्यस्येति दिक्॥

इति कर्मकर्तृप्रक्रिया समाप्ता॥

इति मैथिलवंशोद्भवस्य ठक्कुरोपनामकश्रीकनकलालशर्मणः कृतौ फक्किकारत्नमञ्जूषायामुत्तरार्द्धे तिङन्तप्रकरणं समाप्तम्॥

अथोत्तरार्द्धे कृदन्तप्रकरणम्।

प्रणम्य तावच्चरणारविन्दं श्रीविश्वनाथस्य ततो गुरोश्च।
कृतेर्निजायाः क्रियते शुभायाः कृदन्तभागः कृतिना मयाऽस्याः॥१॥

ननु 'कृदतिङि' त्यनेन तिङ्भिन्नप्रत्ययस्य कृत्संज्ञाविधानेन कृताञ्च तिङ्ज्ञानाधीनज्ञानेन तिङ्निरूपणोत्तरमेव कृन्निरूपणस्यौचित्यात्तिङं निरूप्य कृतं निरूपयितुमारभते धातोरिति। नच 'स्पृशोऽनुदके' 'ऋत्विक् दधृगि' त्यादिशास्त्रेण प्रागेव तिङ्निरूपणात्क्विन्नादिकृतान्निरूपितत्वात्पुनरिह तेषान्निरूपणमयुक्तमिति वाच्यम्। तत्र तेषां प्रसङ्गतो निरूपणेऽपि प्राधान्येनाऽत्रैव कृतां निरूपणस्यौचित्येनोक्ताशङ्कानुदयादित्यलम्॥

प्राग्लादेशाद्धात्वधिकार इति पक्षस्यायुक्तत्व ध्वनयितुमाह—**आतृतीयसमाप्तेरिति**। तृतीयाध्यायसमाप्तिपर्यन्तमित्यर्थः। लादेशात्प्राग्धात्वधिकारे तु 'तिङ्शित्सार्वधातुकमि'त्यत्र धात्वधिकाराभावाच्छित्प्रत्ययमात्रस्य सार्वधातुकसंज्ञाविधानेन शसोऽप्युक्तसंज्ञापत्तौ तस्य च 'सार्वधातुकमपिदि'ति ङित्वे हरीनित्यादौ 'घेर्ङिती' ति गुणो दुर्वारः स्यादिति भावः। विधेयानिर्देशात्स्वरितत्वाच्चाऽधिकारसूत्रमिदमित्याह—**अधिकारोऽयमिति**। एतदधिकारसूत्रसत्त्वे एव सोपसर्गाणामङ्गत्वव्यावृत्तिर्भवति। अयम्भावः, एतत्सूत्राऽभावे 'वर्तमाने लडि'त्यादेर्वर्तमानाद्यर्थे प्रत्यासत्त्या तादृशार्थप्रतिपादकेभ्यो लडादयः स्युरित्यर्थे सोपसर्गाणामपि तादृशार्थप्रतिपादकत्वेन तेषामङ्गत्वापत्तावडाद्यग्रत-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्थापत्तेरिति । नच तृतीयाध्यायसमाप्तिपर्यन्तं 'धातोरेकाजि'ति सूत्रस्थधातोरित्यस्य सम्बन्धेन धातोरेव लडाद्यापत्त्या नतु सोपसर्गाणामङ्गत्वप्रसक्तिरिति वाच्यम् । द्वितीयस्य धातोरित्यस्याऽधिकारसूत्रस्याऽभावे 'तिङ्शिदि'त्यस्य 'आर्द्धधातुकमि' त्यस्य च धातोर्यं तिङः शितश्च ते सार्वधातुकाभिन्नास्तेभ्योभिन्नाश्चार्द्धधातुकाऽभिन्ना इत्यर्थापत्त्या क्विब-न्तलूपूप्रभृतीनामपि धातुत्वेन लुभ्यां पूभ्यामित्यादौ भ्याम आर्द्धधातुकत्वस्य सत्त्वादि-डापत्तिः । द्वितीयधातोरिति सत्त्वेन उक्तसूत्रयोर्धातोर्धातोरित्येवमानुपूर्वीकशब्दोच्चारणेन विहितानान्ते संज्ञे इत्यर्थे न भ्याम आर्द्धधातुकत्वप्रसक्तिरिति भावः ॥

भावे औपसर्गिकस्यैकवचनं क्लीबत्वञ्चेति—भावे प्रत्ययविधानात्तत्र च लिङ्ग-संख्याऽभावेन सामान्ये नपुंसकमिति नपुंसकत्वमुत्सर्गतश्चैकवचनं भवति । यत्र लिङ्गत्रय-मध्ये कस्यापि लिङ्गस्य विवक्षा न तत्र नपुंसकलिङ्गमेव भवति, यत्र च कस्याश्चिदपि संख्याया न विवक्षा तत्रैकवचनमेव भवतीति भावः ॥

वृत्तिकारस्तु कर्मकर्तरि चायमिष्यत इत्याहेति—(केलिमर उपसंख्यानमि)-तिवार्त्तिकविहितकेलिमरप्रत्ययः कर्मण्यर्थे भवति नत्वन्यस्मिन्नर्थे इति सिद्धान्तः, तत्रोक्त-प्रत्ययस्य कर्मणि कर्मकर्तरिचेत्युभयस्मिन्नर्थे विधानमङ्गीक्रियते वृत्तिकृतेति दीक्षित उक्त-वान् । परमेतन्मतमयुक्तमित्याह—तद्भाष्यविरुद्धमिति । तत्र हि भिदेलिमा इत्यस्य भेत्तव्या इति विवरणं प्रदर्शयन्भाष्यकृन्नये कर्मण्येवोक्तप्रत्ययो लभ्यते नतु कर्मकर्तर्यपीत्यतो भाष्यकृन्मताद्वृत्तिकृन्मतं विरुद्धमिति तन्मतमुपेक्ष्यमिति भावः ॥

विहितविशेषणं किम् । यका व्यवधानेऽपि यथास्यात् । प्रयाप्यमाणं प-श्येति । विहितविशेषणकरणे प्रपूर्वकयातेर्णिचि पुकि ण्यन्तस्य धातुत्वेन वर्तमाने कर्मणि लटि तत्स्थाने शानचि तस्य शित्त्वात्सार्वधातुकत्वे यकि णिलोपे मुकि शानचो ण्यन्ताद्वि-हितत्वेन तन्नकारस्य णेर्विभाषेति णत्वे च रूपं सिद्धयति । विहितविशेषणाकरणे तु ण्य-न्तात्परस्योपसर्गस्थनिमित्तोत्तरकृत्स्थनकारस्य णत्वं वेतिसूत्रार्थे शानचो यका व्यवायेन ण्यन्तात्परत्वाभावाण्णत्वाऽप्राप्त्या रूपं न सिद्धयति । नच अड्व्यवायेऽपीति सूत्रेणैव णत्वसिद्धौ विहितविशेषणमनावश्यकमेवेतिवाच्यम् । णेर्विभाषेत्यत्र ण्यन्तकृतोरव्यवधान-स्यापेक्षणादड्ग्रहणेन वारणाऽसम्भवेन विहितविशेषणस्यास्यावश्यकत्वादिति भावः ॥

ननु 'इजादेः सनुमः' इत्यस्य प्रसङ्गनीयमित्यत्र 'कृत्यचः' इत्यनेन प्रासगत्वव्यावृत्तये विहितविशेषाङ्गीकारेऽपि न नियमार्थत्वं नुमो नकारेण व्यवधानात्कृत्यच इत्यस्याऽप्रा-प्त्या प्रेन्वनमित्यत्र विध्यर्थत्वादत आह—नुम्ग्रहणमनुस्वारोपलक्षणार्थमिति । 'अट् कुप्वाङ् नुमि'त्यत्रैव प्रकृतेऽपि नुमाऽनुस्वारस्य लक्षितत्वान्न शङ्काकलङ्कलेशोऽपीति भावः ॥

ननु ण्यन्तस्य प्रकृत्यन्तरत्वेन प्रकृतिग्रहणेनाऽग्राह्यत्वान्निषेधानापत्त्या प्रभापनीयमि-त्यादौ णत्वं दुर्वारमेवेत्यत आह—ण्यन्तभादीनामुपसंख्यानमिति । केचित्तु 'ईश्च-ण्डी'ति सूत्रेऽचण्डीति पर्युदासेन (प्रकृतिग्रहणे ण्यधिकस्याऽपि ग्रहणमि)ति ज्ञापनात्सिद्धमि-दमित्याहुस्तन्न, ज्ञापनस्य कुत्वमात्रविषयपरत्वेन भाष्यादौ सिद्धान्तितत्वादित्यलम् ॥

ननु प्रख्यानीयमित्यत्र, अट्कुप्वाङ्नुमित्यनेन णत्वं दुर्वारमित्यत आह—ख्याञः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शस्य यो वेत्युक्तमिति । चक्षिङः ख्याञ् इत्यनेन न ख्याञादेशः किन्तु खशाञादेश एव, तस्य शकारस्य णत्वप्रकरणोपरस्थितेन शस्य यो वेतिसूत्रेण यत्वे रूपं सिद्ध्यति, एवञ्च अट्ङ्कुप्वाङ्नुमित्येतद्दृष्ट्या यत्वस्यासिद्धत्वाच्छकारेणाऽतिरिक्तेन व्यवधानान्न णत्वप्राप्तिरिति भावः ॥

ननु 'अचो यदि' त्यत्राऽज्ग्रहणं हलन्ताद्यतोऽभावाय तस्य च ऋवर्णान्तादिवद्धलन्तादपि ण्यता बाधेनोपपत्तौ व्यर्थमेव तदित्याह—अज्ग्रहणं शक्यमकर्त्तुमिति । केचित्तु अजन्तभूतपूर्वादपिधातोर्यत्प्रत्ययार्थमज्ग्रहणं तेन दित्स्यं धित्स्यमित्यत्र यति कृते 'यतोऽनाव' इत्युदात्तत्वसिद्धिः । अन्यथा यति कृते 'तित्स्वरितमि'ति स्वरितत्वापत्तिरित्याहुस्तन्न, (१)आर्धधातुकविवक्षायामकारलोपेऽज्ग्रहणस्योक्तफलकत्वसम्भवेन तस्मिन्परे तु तस्याऽकिञ्चित्करत्वात् । लोपस्य परनिमित्तकत्वानङ्गीकारे तु गणयतीत्यादावुपधावृद्धिप्रसक्तिः ॥

ननु जन्यमिति रूपस्य यता ण्यता वोभयथा सम्भवाद्धलोर्ण्यदिति ण्यतैव रूपसिद्धौ तकिशसिचतीतिवार्त्तिके जनेर्ग्रहणं व्यर्थमित्यत आह—जनेर्यद्विधिः स्वरार्थ इति । यतोऽनाव इत्याद्युदात्तस्वरार्थ इत्यर्थः ॥

ननु ण्यद्यतोरसरूपत्वेन वाऽसरूपोऽस्त्रियामित्यनेन यता ण्यतो वैकल्पिकबाधेन पक्षे ण्यत्प्रत्ययो दुर्वार एवेत्यत आह—नानुबन्धकृतमसारूप्यमिति । अनेकान्तपक्षेऽनुबन्धानामनवयवात्तत्कृताऽसारूप्यस्य न ग्रहणम् । एकान्तपक्षेऽपि ददातिदधात्योर्विभाषेति विभाषाग्रहणज्ञापकादनुबन्धकृताऽसारूप्यस्यानाश्रयणादुक्तपक्षद्वये न ण्यतः प्रसक्तिरितिभावः॥

ननु धातूनां हलन्ताजन्तभेदेन द्वैविध्यात्तत्र हलन्ताण्ण्यतो वक्ष्यमाणत्वात्परिशेषादजन्तादेव यतो विधानेन तव्यदादिष्वेव तद्ग्रहणादिष्टसिद्धौ पृथग्योगो नावश्यक इत्यभिप्रेत्याह—योगविभागोऽप्येवम् , तव्यदादिष्वेव यतोऽपि सुपठत्वादिति ।

ननु 'पोरदुपधादि' त्यनेनाऽकारोपधपवर्गान्तधातोर्यद्विधानेन आङ्पूर्वकाल्लभेर्यादिप्रत्ययविवक्षायामेव नुमि तदाऽकारोपधत्वाभावान्न यत्किन्तु ण्यदेवेत्याह—नुमि कृतेऽदुपधत्वाभावाण्ण्यदेवेति । ण्यति कृते आलम्भ्य इत्यत्र समासान्तोदात्तत्वं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेणेष्टस्य स्वरितान्तत्वस्य सिद्धिः । यति प्रत्यये तु 'यतोनाव' इत्यनेनाऽऽद्युदात्तत्वादनिष्टस्योत्तरपदाद्युदात्तत्वस्यापत्तिरिति भावः ।

ननु यमेः पवर्गान्तत्वेन पोरदुपधादित्यनेनैव सिद्धौ (गदमदे)ति सूत्रे तद्ग्रहणं व्यर्थमित्यत आह—यमेर्नियमार्थमिति । यमेश्चेदनुपसर्गादेवेतिनियमाकारः' तेनोपसर्गविशिष्टस्य तु प्रयाम्यमित्येव तत्रापि (न तत्र भवेद्विनियम्यमि)ति वार्त्तिकप्रयोगदर्शनात् विनीत्युपसर्गद्वयातिरिक्तोपसर्गविशिष्टस्य माभूदिति संकोचः ।

शतेन वर्या कन्येति । अत्र शतशब्दोऽनियतपरस्तेन कन्याया वरणे वरयितॄणां नि-

---

(१) आर्धधातुकविवक्षायामकारलोपे तदानीं हलन्तत्वात् ण्यतः प्रसक्तिः । आर्धधातुकपरे लोपस्तु प्रत्यये सत्येव लोपः, लोपे सत्येव हलन्तत्वसम्भवः, इति प्रत्ययोत्पत्तिकालेऽजन्तत्वस्यैव सत्वाददेवेति केचिदित्यादिना प्रतिपादितमसङ्गतमेवेति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यमो नास्तीत्यर्थः । अयम्भावः, सूत्रेऽनिरोधग्रहणसद्भावे सामर्थ्यादनिरोधरूपार्थकादेव वृञो यति वर्येति सिद्धम् । अनिरोधग्रहणाऽभावे तु विनिगमका भावेन वृङ्वृञोरुभयोरपि ग्रहणापत्त्या ततो यदापत्तिरित्येतद्ध्वनयन्नाह—वृत्यान नि । ननु 'एतिस्तुशास्वृ' इत्यत्र वृङ्ग्रहणे सामर्थ्याञ्चास्य तत्राग्रहणमिति चेन्न । अत्रत्यवृङ्ग्रहणस्य पुंसि चरितार्थत्वात् । तत्र सूत्रेऽवद्यादीनि निर्विभक्तिकानि नतु द्वन्द्वः, तेन वर्या स्त्रियामेव विधीयते । अस्त्रियां तु वृङः 'ऋहलोर्ण्यत्' वार्या ऋत्विजः । सूत्रे द्वन्द्वाभिप्रायेण सुग्रीवो मम वर्योऽसावित्यादयः प्रयोगा बोध्या इत्यलम् ॥

वदः सुपि क्यप् च । ननु लः कर्मणीत्यनेन यथा सकर्मकेभ्यः कर्मणि कर्तरि लकारविधानादकर्मकेभ्यो भावे कर्तरि च, तथा 'तयोरेव कृत्यक्तखलर्थाः' इत्यनेनापि सकर्मकेभ्यः कर्मणि कर्तरि कृत्यप्रत्ययविधानादकर्मकेभ्य एव भावे तद्विधानमिति सिद्धान्तात्सकर्मकधातुभ्यो भावे कृत्प्रत्ययविधानं दुर्लभमित्यत आह—भाव इत्यपकृष्यत इति ।

ननु भुवो भावे इत्यत्राऽनुपसर्गे इत्यनुवर्त्य निरुपसर्गस्य भवतेरकर्मकत्वात् तयोरेवेति सूत्रेण भाव एव कृत्यप्रत्ययसिद्धौ भावग्रहणं व्यर्थमिति चेन्न, तस्योत्तरार्थत्वेन सार्थक्यस्य भाष्येऽभिहितत्वात् । एतद्भाष्यमतानुयायिमतं प्रदर्शयति–कर्मणि प्रत्ययावित्येके इति ।

ननु सूत्रे सामान्यरूपेण वृशब्दोपादानाद्वृञ्वृङो ग्रहणं स्यादत आह—वृइति वृञो ग्रहणं न वृङ इति । ईडवन्द इति सूत्रज्ञापकान्न वृङो ग्रहणमिति तदर्थः । तत्र हि ईडवन्द साहचर्यादात्मनेपदिनो वृङ एव ग्रहणम्, अत्र वृञो ग्रहणे तु तत्र वृग्रहणं व्यर्थं स्यादिति भावः,

पुनः क्यबुक्तिः परस्यापिण्यतो बाधनार्थेति । 'ओरावश्यके' इति विहितस्य ण्यतोऽवकाशः आवश्यकविवक्षायां लाव्यमिति, क्यपोऽवकाशः स्तुत्य इति, अवश्यस्तुत्य इत्यादौ द्वयोः प्राप्तौ विप्रतिषेधसूत्रबलेन परत्वाण्ण्यत् स्यादतस्तद्बाधनार्थं पुनः क्यबुक्तिरिति भावः ।

इचेति ह्रस्वः सुपठ इति । इत्थं हि दीर्घपठतः सूत्रकारस्याऽभिप्रायः, इ इ इति प्रश्लेषाद्द्वितीय इकारो 'ये विभाषे'त्यात्वबाधनाय, अन्यथा येइति विषयसप्तमी तेन यकारादौ प्रत्यये बुद्धिस्थ एव प्राप्तस्याऽऽन्तरङ्गत्वेन क्यपा सह विधानादिकारस्य बहिरङ्गत्वेनात्वं दुर्वारं स्यादिति । दीर्घस्य प्रत्याख्यानं कुर्वतो भाष्यकर्तुस्त्वयम्भावः, क्यप्सन्नियोगशिष्टत्वादित्वमन्तरङ्गम्, ये इति परसप्तम्याश्रयणादात्वं बहिरङ्गम्, तथा च युक्त एवाऽऽत्वस्येत्वेन बाधः, न च ह्रस्वादेशे 'पत्वतुकोरि'ति गुणस्यासिद्धत्वे तुगिति वाच्यम्, पदान्तपदाद्योरेवैकादेशस्याऽसिद्धत्वात्, एतदनङ्गीकारे वृक्षेच्छत्रमित्यत्र नित्यतुगापत्तिः, इष्टस्तु वैकल्पिक इतिप्राञ्चः । शेखरकृतस्तु ये विभाषेत्यत्र ये इति विषयसप्तमीत्वेऽपि जनादिसाहचर्येण यादिप्रत्ययोत्पत्तिपूर्वकाले नान्तरस्यैवात्वविधानेन क्यबुत्पत्तेः प्रागेवेत्वेनाऽत्र तदप्राप्त्या नस्येत्वे आद्गुणेन रूपसिद्धेः, एतत्क्लेशवारणायैव दीर्घोच्चारणमित्याहुः ॥

ननु 'भृञोऽसंज्ञायामित्यत्राऽसंज्ञाग्रहणसत्त्वेन तत्रैव क्यपो विधानाद्भार्या वधूरित्यत्र संज्ञायामेतद्प्राप्तावपि संज्ञायां क्यप्विधायकेन 'संज्ञायां समजनिषदनिपते' त्यनेन क्यप्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दुर्वार इत्याशङ्क्ते—अथ कथं भार्या वधूरिति । ननु असंज्ञाग्रहणसामर्थ्यात्तत्र सूत्रान्तरेणाऽपि क्यप् न स्यादत आह—संज्ञापर्युदासस्तु पुंसि चरितार्थ इति । उक्तापत्तिं वारयति—विभर्तेर्भृ इति । (तदनुवन्धकग्रहणे नातदनुबन्धकस्ये)ति परिभाषया डुभृञ्धातोः क्यब्विधौ ग्रहणेन विभर्तेर्ण्यता रूपसिद्धिरितिभावः ।

ननु "चजोः" इति सूत्रे निष्ठायामनिट इति पठित्वा निष्ठायामनिट् धातोश्चजोः कुत्वमित्यर्थे गर्जधातोर्निष्ठायां सेट्त्वेन गर्ज्यमित्यादौ 'न क्वादेरि'ति सूत्रोदाहरणे कुत्वभावं सम्पाद्य वार्त्तिककारेण प्रत्याख्यातन्तत्सूत्रम् । अर्जितर्जिप्रभृतीनां निष्ठायां सेट्त्वेन कुत्वाभावः । मुचुग्लुञ्चुप्रभृतीनां क्वादिगणपठितत्वेऽपि 'ऊदितोवे' तिक्त्वायामिड्विकल्पत्वेन 'यस्य विभाषे' ति निष्ठायामनिट्त्वात्कुत्वम्भवत्येव सूत्रकृन्मते तु स्यादिति परस्परविरोधेऽपि उत्तरोत्तरमुनिवाक्यस्य प्रामाण्याद्वार्त्तिककृन्मतमेव ज्याय इत्याह—यथोत्तरं मुनीनां प्रामाण्यादिति प्राञ्चः । नागेशास्तु वार्त्तिकस्य सूत्रदूषणाय प्रवृत्तत्वाद्भाष्यकृता च वार्त्तिकमते शोक इत्यस्यासिद्धिमाशंक्य सूत्रकृन्मतेऽपि ण्यति कुत्ववारणाय नियमार्थमावश्यकेन शुचेर्घञीति वचनेन समाधानाद्वार्त्तिकमतस्यैवाऽभ्यनुज्ञानाच्चेत्याहुः ॥

ननु 'प्रघातिसर्गे' ति सूत्रे चकारेण लोटोऽनुकर्षणात्तेन कृत्यप्रत्ययाऽबाधाय कृत्यग्रहणं, (वासरूप) विधेर्नित्यत्वे विकल्पबाधेन पक्षे कृत्यप्रत्ययसिद्धौ सूत्रे पुनस्तद्ग्रहणेन सामर्थ्यादुक्तविधेरनित्यत्वज्ञापनेन (क्त्ल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ती) तिसिद्धिरित्यभिप्रायेणाह—इह लोटा बाधेत्यारभ्य नेति सिद्धमित्यन्तमिति । वस्तुतस्तु वासरूपविधेरनित्यत्वे (अर्हेकृत्यतृचश्चे)ति सूत्रस्यैव ज्ञापकत्वमिति लिङ्गा बाधा माभूदित्यादिना मूले एव स्पष्टमिति भावः । मूले क्वचिन्नेत्यस्य क्त्वाप्रत्ययेन तुमुनो नित्यबाधाऽभावेन आसित्वा भुंक्ते आस्यते भोक्तुमिति च भवतीति फलम् ॥

आगमस्य दीर्घत्वसामर्थ्यादभ्यासह्रस्वो हलादिः शेषश्चनेति । नच दीर्घाऽऽगमोच्चारणस्य सवर्णदीर्घबाधकत्वेनोपक्षयात्सामर्थ्याभावेन मूलोक्तमसङ्गतमिति वाच्यम्, (अनन्तरस्ये) ति न्यायेन हलादिः शेषस्यैव बाधात्, वस्तुतस्तु दीर्घप्रवृत्तिकाल एव वैयर्थ्योपस्थित्या तद्बाधस्यैव न्याय्यत्वम्, हलादिः शेषबाधनं तु अभ्यासस्याऽनचीति भाष्योक्तवचनेन साध्यम् । अभ्यासस्य यदुच्यते तदज्निमित्ताऽभ्यासभिन्नस्येत्यर्थः । अत एव लोलुव इत्यादौ गुणः । यद्यप्यत्र वचने वेति भाष्ये नास्ति तथापि रात्रिंचर इत्यादिप्रयोगदर्शनादाश्रितमिति ।

खशोऽन्यत्र नेष्य इति हरदत्त इति । अत्रारुचिबीजन्तु भाष्यानानुकूल्यम् 'टिड्ढाणञि' तिसूत्रे प्रत्यासत्या टिदाद्यवयवयकारस्यैव ग्रहणं समुचितं भाष्यप्रामाण्यात् । न च टित्त्वसामर्थ्यादतिरिक्ताऽकारस्यापि ग्रहणमिति वाच्यम् । तथासति, धयेत्यत्राऽपि ङीबापत्तेर्दुर्वारत्वात् । नच टिदाद्यवयवाकारस्यैव ग्रहणे स्तनन्धयीत्यत्रापि ङीब् न स्यादिति वाच्यम् । गौरादित्वेन तदुपपत्तेः । नच ङीपि स्वरे विशेष इति वाच्यम् । ङीप्यपि उदात्तनिवृत्तिस्वरप्राप्त्या स्वरे विशेषाऽभावादित्यलम् ।

ब्रह्मज्य इति । ब्रह्मरूपोपपदाज्जिनातेर्डे डित्वसामर्थ्यादभस्यापि टेर्लोपे रूपम् । नच कप्रत्यये आकारलोपेनाऽपि रूपसिद्धौ डविधानं व्यर्थमिति वाच्यम् । तथा सति स-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

म्प्रसारणे इयङादेशे च ब्रह्मजिय इत्यापत्तेः । नच कप्रत्ययेऽपि 'एरनेकाच' इति यणि रूप-सिद्धौ डविधानं व्यर्थमेवेति वाच्यम् । अङ्गस्यैकाच्त्वेन ज्याधातोरेव प्रत्ययविधानेन वि-शिष्टादविधानेन च तदप्राप्तेः । नच कर्मण्यधिकारे अकर्मकाज्ज्याधातोः कथं डविधानमि-ति वाच्यम् ।क्वविधौ सर्वत्रेति वचनसामर्थ्यात् ब्रह्म प्राप्तुं जिनातीत्यर्थाच्चाकर्मकादपि त-तस्माड्डविधानोपपत्तेः । वस्तुतस्तु अकर्मकेष्वपि सुपीत्यस्य सम्बन्धेन सुप्युपपदे धातोः प्रत्ययविधानेनाऽदोषादितिभावः ॥

आह्व इति । नचाऽत्र केऽपि आलोपं बाधित्वा सम्प्रसारणे ततो (वार्णादि) ति न्यायेन पूर्वरूपत्वं बाधित्वा लोपे तस्याभिया सिद्धत्वेनोवङोऽप्राप्तौ यणि आह्व इति सि-द्धौ डविधानं व्यर्थमिति वाच्यम् । आभीयासिद्धत्वानित्यत्वे वार्णादीति न्यायानित्यत्वे वाऽस्य ज्ञापकत्वात् । तेन जुहुवतुरिति सिद्धमिति भावः ॥

अच्वौ किम् आढ्यीकुर्वन्त्यनेनेति । ननु अत्र ख्युनोऽभावेऽपि 'करणाधिकरण-योश्चे'त्यनेन ल्युट् स्यादत आह—प्रतिषेधसामर्थ्यादिति । आढ्यीकरणमिति रूपस्य ल्युट्ख्युनोस्तुल्यत्वम् । नच ख्युनि मुम्ह्रस्वौ स्यातामिति वाच्यम् । 'ऊर्यादिच्विडाच-श्चे'ति निपातसंज्ञकत्वेन च्व्यन्तस्याऽव्ययत्वेन मुम्विधायकेऽनव्ययस्येति पर्युदासेन तदप्रा-प्तेः । नच ख्युनि 'उपपदमतिङि'ति नित्यसमासलाभो न ल्युटीति वाच्यम् । तत्रापि गतिसमाससम्भवेन तस्यापि नित्यसमासत्वात् । नच ङीट्टाबभ्याम्विशेष इति वाच्यम् । (नञ्स्नञी)ति वार्त्तिकेन ख्युन्यपि ङीपो विधानात् । नच स्वरे विशेष इति वाच्यम् । ल्युट्ख्युनोर्लिद्नित्स्वराभ्यां छ्न उदात्तत्वाऽविशेषादित्यलम् ॥

भाष्यविरोधादुपेक्ष्यमिति । उक्तं हि भाष्ये सुपीति वर्तमाने पुनःसुब्ग्रहणं किम-र्थम्, अनुपसर्ग इत्येव तदभूत् । इदं सुप्मात्रे यथा स्यात्, उदासारिण्यः, प्रत्यासारिण्य इति॥

भाष्यकारवचनाच्छ्रीशब्दस्य ह्रस्वो मुममोरभावश्चेति । अयम्भावः य-था प्रष्ठादिशब्दानां पुँयोगात्स्त्रियां वृत्तिः प्रष्ठी गणिकेति तथेह श्रीशब्दः परित्यक्तस्वलिङ्गः क्लीवः सन् कुले वर्त्तते । तत्र 'ह्रस्वो नपुंसके'ति ह्रस्वः । नच क्लीवत्वे नुमापत्तिरिति वा-च्यम् । अपवादेनाऽमा तद्बाधात् । स्वमोर्नपुंसकादित्यमो लुक् स्यादिति वाच्यम् । अ-म्विधानसामर्थ्येनैव तद्बाधादिति प्राञ्चः । शेखरकृतस्तु, अत्र 'स्वमोरि'ति लुम्न, वा-क्यसामान्यचिन्तया 'सुपो धात्वि'ति लुग्वत् अस्यापि अम्विधिसामर्थ्येन बाधात् । किञ्च बहिरङ्गतयाऽपि नाऽमो लुक् । त्रिपाद्यां तदप्रवृत्तेः । तस्माच्छ्रियं मन्य इत्येव भाष्य-सम्मतमित्याहुः ॥

चतुर्विधोऽत्र नियम इति । अत्र सूत्रे श्रुतत्वात्पूर्वं ब्रह्मादय उद्देश्यास्ततोऽनन्तरं प्रकृतित्वाद्धन्तिः, ततः परिशेषाद्भूत इति क्विबिति सूत्रार्थः, तत्र विनिगमनाविरहेणाऽविशे-षाच्चतुर्ष्वपि एवकारसम्बन्धः । तत्र ब्रह्मादिष्वेव भूतार्थाद्धन्तेरिति प्रकृतिनियमे हन्तेरुपप-दान्तरसम्बन्धवृत्तिफलो धातुनियमः, ततश्च भूत इत्याश्रयणेन कालान्तरेऽपि भवति पुरुषं हन्ति हनिष्यति वेत्यर्थे पुरुषहेति । ब्रह्मादिषु भूतार्थादेव हन्तेरिति प्रत्ययनियमे वर्तमा-नभविष्यत्कालयोः पूर्वप्रयोगसिद्धिः । ब्रह्मादिषु भूतार्थाद्धन्तेरेवेत्युपपदनियमे भूत इत्या-श्रयणेन कालान्तरे धात्वन्तरादपि भवत्येव वृत्रं जयति जेष्यति या वृत्रजित् । न वृत्रं जि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तवानिति भूते प्रयोगः । ब्रह्मादिषु भूतार्थाद्धन्तेः क्विबेवेतिकालनियमे पितृव्यं हतवान् पितृव्यघातीति भूतेऽपि प्रत्ययान्तरविशिष्टः प्रयोगः । ब्रह्मघातीति प्रयोगाभावो नियमफलं बोध्यम् । द्विविधो नियम इति भाष्यमिति । तथाच भाष्यमुभयतोऽयं नियमः ब्रह्मादिष्वेव क्विबेवेति च । युक्तञ्चैतत् श्रुत्योपस्थितोपपदप्रत्यययोरुपरोधापेक्षया प्रकरणलक्षणजघन्यप्रमाणोपस्थितधातुकालयोरेवोपरोधो न्याय्यः । एकञ्चैतद्भाष्यविरोधात्पूर्वोक्तमयुक्तमित्यलम् ॥

नन्तु धृषधातोराकारेत्संज्ञकत्वेन 'विभाषाभावादिकर्मणोरि'ति विकल्पे प्राप्ते तदंशे नित्यार्थो विधिः स्यात् ततश्च भावादिकर्मभ्यामन्यत्र वैयात्याऽभावेऽपि 'आदितश्चे'तिनिषेध एव स्यादत आह—भावादिकर्मणोस्तु वैयात्ये धृषिर्नास्तीति । अनभिधानादिति भावः । अत्र प्रमाणमाह—अत एव नियमार्थमिति । तेन भावादिकर्मभ्यामन्यत्र वैयात्याभावेऽपि न 'आदितश्चे'ति निषेधः । हरदत्त इति–अवैयात्ये भावादिकर्मणोरनभिधानाद्वैयात्ये च नियमादादित्वस्य साफल्यमस्त्येवेत्यभिप्रेत्याह–माधवस्तु भावादिकर्मणोरवैयात्ये विकल्पमाहेति ॥

नन्तु 'द्वेचे'त्यनेन द्वित्वे कृतेऽपि प्रत्यासत्त्या पाष्ठद्वित्व एवाभ्याससंज्ञाप्रवृत्त्याऽऽष्टमिके तदप्रवृत्त्या स न स्यादत आह—दृशिग्रहणादभ्याससंज्ञेति ॥

इति पूर्वकृदन्तप्रकरणम् ।

अथोत्तरकृदन्तप्रकरणम् ।

नन्तु उणादयो बहुलमित्यत्रत्यबहुग्रहणस्याऽपरिपूर्णोणादिपरिपूर्णार्थकस्य फलं प्रदर्शयति–केचिदविहिता अपीति । केचिदनुक्ता अपि धातवः प्रत्ययाश्चोणादिषु ऊह्याः तर्कणिया इत्यर्थः । तथाहि, शकुलेति प्रयोगदर्शनात् हपेरुलजितिंसूत्राद्विहित उलच्प्रत्ययः शकिधातोरपि भवतीति । किञ्च कुत्राप्यविहितयोः फिडफिड्डप्रत्यययोरर्तिः प्रकृतिरूह्यते तयोः कित्वञ्च प्रकल्प्यते । तथा पण्ड इत्यत्र सत्वाभावश्चोह्यते ।

नन्तु द्वन्द्वान्ते श्रूयमाणपदस्य प्रत्येकमभिसम्बन्धस्य प्रसिद्धत्वेन शकधृषेति सूत्रस्थार्थग्रहणस्य तत्सूत्रस्थपदेष्वन्वयः स्यादित्यशंक्य समाधत्ते—अर्थग्रहणमस्तिनैव सम्बध्यत इति । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेतिन्यायेनाऽनन्तरेणास्तिनैवार्थग्रहणस्य सम्बन्धो नतु शकादिभिरिति भावः ।

पर्यायोपादानमर्थोपलक्षणार्थमिति—नन्तु कालशब्दोपादानादेव समयवेलाशब्दाभ्यामपि तुमुन्सिद्धौ पर्यायोपादानं व्यर्थमिति चेन्न । तस्याऽर्थोपलक्षणार्थत्वेन सार्थक्यात् । तथा च कालसमयवेलार्थेषूपपदेषु तुमुन्नित्यर्थेऽनेहाशब्दादपि तुमुन्सिद्धः ।

नन्तु सृस्थिर इति सूत्रेऽण्यन्तस्य सरतेरुपादानादतीसारो व्याधिरिति प्रयोगो नोपपद्येतेत्यत आह—अन्तर्भावितण्यर्थोऽत्र सरतिरिति–अतीसार इत्यत्रोपसर्गाकारस्य 'उपसर्गस्य घञ्यमनुष्ये बहुलमि'त्यनेन दीर्घः ।

नन्तु श्रमेरुदात्तोपदेशत्वान्मान्तत्वाच्च 'नोदात्तोपदेशस्य मान्तस्याऽनाचमेरि'ति वृद्धि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निषेधे विश्रम इति प्रयोगे न स्यादत आह—विश्राम इति त्वपाणिनीयमिति—श्रमेर्णिजन्तादच् विधाने तु विश्राम इति प्रयोगःसाधुरेव भवितुमर्हति, अत एव धुर्यान्विश्रामयेति स इति रघुकाव्यपद्यसङ्गतिः । नच णिच्यपि वृद्धिनिषेधः स्यादितिवाच्यम् । नोदात्तोपदेशेत्यत्र कृतीत्यस्यानुवर्तनेन णिचि वृद्धिनिषेधाप्राप्तेः । 'मितां ह्रस्व' इति ह्रस्वोऽपि नाशङ्क्यः । वेत्यनुवर्तनाद्व्यवस्थितविभाषाश्रयणेन ह्रस्वाभावात् । एवं चोक्तरीत्या प्रयोगस्य साधुत्वेऽप्यर्थभेदः स्यादेव । वस्तुतस्तु—निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिति विवक्षायां न दोष इति भावः ।

ननु 'श्रिणीभुवोऽनुपसर्गे' इति सूत्रेऽनुपसर्गपदसत्त्वादनुपसर्गाद्भुवो घञो विधानादुपसर्गात्ततो घञोऽविधानात्प्रभाव इति प्रयोगो न स्यादित्यभिप्रेत्य शंकते—कथं प्रभावो राज्ञ इति । समाधत्ते—प्रकृष्टो भाव इति । प्रादिसमास इति । अनुपसर्गाद्भुवो घञ्विधानेन भाव इति संसाध्य पश्चात्प्रशब्देन सह प्रादिसमासे प्रभाव इति प्रयोगोपपत्तिरिति भावः ।

ननु श्रिणीभुव इति सूत्रेण नयतेर्घञि नाय इत्यस्य साधुत्वे नय इति न स्यात् तथाच वक्ष्यमाणप्रयोगो विरुध्येतेत्याह—कथं राज्ञो नय इति । समाधत्ते—बाहुलकादिति । सूत्रे बहुलग्रहणानुवृत्त्या घञो वैकल्पिकत्वेनोक्तप्रयोगसिद्धिरिति भावः ।

अस्याधिकाराः किल पुंस्तकस्य मुहुर्मुहुर्मुद्रणकादयश्च ।
प्रकाशकाधीनकृता हि सर्वे नान्यस्य कस्यापि जनस्य सन्ति ॥

इति ठक्कुरोपनामकश्रीकनकलालशर्मणः कृतौ फक्किकारत्नमञ्जूषायां
कारकादिकृदन्तान्तो द्वितीयः खण्डः समाप्तः ॥

(चतुर्थ संस्करणम्)

(विद्याविलास यन्त्रालये मुद्रितम्)

सर्वविधपुस्तकप्राप्तिस्थानम्—

श्रीहरिकृष्णनिबन्धभवनम्

बनारस सिटी ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

प्रौढमनोरमा

महामहोपाध्याय–श्रीभट्टोजीदीक्षित–विरचिता ।

महामहोपाध्याय-श्रीहरिदीक्षितविरचित--लघुशब्दरत्नव्याख्यासमेता।
महामहोपाध्यायश्रीभैरवमिश्रविरचित–शब्दरत्नव्याख्यया, लवपुरीय-
प्राच्यमहाविद्यालयप्रधानाध्यापकवेदान्त–व्याकरणाचार्य –साहित्य–
मीमांसातीर्थमहामहोपाध्यायश्रीमाधवशास्त्रिभाण्डारीविरचित–
प्रभानामकटिप्पण्या, आयुर्वेद–व्याकरणाचार्य–
साहित्यतीर्थ–धर्मशास्त्रशास्त्रिपदवीकश्रीयुतपण्डितजग-
न्नाथशास्त्रिकृतयाऽव्ययीभावप्रकरणस्थ–शब्द-
रत्नप्रदीपकनामकटिप्पण्या
च समलङ्कृता ।

विद्वद्वृन्द ।

आप लोगों को यह सूचित करते अत्यन्त हर्ष होता है कि उपरोक्त मनोरमा शब्दरत्न तथा भैरवी व्याख्याके साथ वेदान्त–व्याकरणाचार्य–साहित्य–मीमांसातीर्थ म० म० श्रीयुतपं०माधवशास्त्री भाण्डारी विरचित प्रभाटिप्पणी तथा अनेकशास्त्र के विद्वान् श्रीयुत पं० जगन्नाथशास्त्रीजी कृत अव्ययीभावप्रकरण पर शब्दरत्न प्रदीपक नामक टिप्पणी से अलङ्कृत होने से यह संस्करण इतना सुन्दर तथा परीक्षोपयोगि हुआ कि सीर्फ अल्प समय में ही प्रथम संस्करण हाथो हाथ बिकगया, इस परिवर्धित द्वितीय संस्करण में व्याकरणशास्त्र के परम विद्वान् पं० सदाशिवशास्त्रिकृत "विभा" नामकी टिप्पणी भी नवीन दी गई है। ग्रन्थ अत्यन्त उत्तम नवीन, अक्षरों से ग्लेज़ चिकने मोटे कागज पर छपा है । मूल्य भी अल्प केवल ४) है। विद्यार्थियों को कमीशन काट कर ३।) में दिया जायगा ।

सर्वविधपुस्तकप्राप्तिस्थानम्—
श्रीहरिकृष्णनिबन्धभवनम्
बनारस सिटी ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

छप गया ! छप गया !! छप गया !!!

परीक्षा तथा शास्त्रार्थ के लिये अत्यन्त उपयोगी

शास्त्रार्थकलाटीकासहित

व्युत्पत्तिवाद

टीकाकार—कौमुदीकल्पलतिकापरिष्कारदर्पणाद्यनेकग्रन्थकार [illegible] वैयाकरणशिरोमण्याद्यनेकपदवीक प्रसिद्ध शास्त्रार्थी जौनपुर मछलीशहर उदयपुरगेलहवा निवासी—

शुक्ल श्रीवेणीमाधवशास्त्री जी।

माननीय संस्कृतानुरागि विद्वज्जन एवं स्वाध्यायतपःप्रवृत्त छात्रवर्ग !

यह आप लोगों से छिपा नहीं है कि शब्दखण्ड के लिये म० म० श्रीमद्गदाधरभट्टाचार्य जी का बनाया हुआ व्युत्पत्तिवाद कितना उपकारक एवं परमसहाय ग्रन्थ है ! इसी लिए व्याकरण तथा न्याय की सब स्थान की राजकीय आचार्यपरीक्षाओं के अन्तिम खण्डों में पाठ्य रूप से यह ग्रन्थ निर्धारित किया गया है। इस ग्रन्थ पर अभी तक कोई भी ऐसी टीका नहीं निकली थी जो कि शास्त्रार्थ तथा परीक्षा दोनों ही को उपयोगी हो। इस लिये हमने श्रीमान् शास्त्री जी से इस अपूर्व टीका को बनवा कर द्वितीया कारकपर्यन्त इस पुस्तक को प्रकाशित किया है। इस टीका में "इति परीक्षालेखप्रकारः" "अथ शास्त्रार्थप्रकारः" ऐसे विभाग बने हैं जिससे विद्यार्थियों को परीक्षा में उत्तीर्ण होना सरल हो गया है। टीकाकार के सुपुत्र शुक्ल श्री राजनारायणशास्त्री जी ने इस ग्रन्थ का जो विविध टिप्पणियों द्वारा सुन्दर सम्पादन किया है। पुस्तक की मनोहारिता तथा उपयोगिता देखने से ही मालूम हो जायगी। उपकार और प्रचार की दृष्टिसे लगभग ३०० पृष्ठ की, सुन्दर छपाई ग्लेज़ कागज आदि से युक्त सजिल्द पुस्तक का मूल्य भी लागत मात्र २) रु० कमिशन काट कर १॥।) रक्खा गया है। आशा है कि आपलोग इस सुअवसर को हाथ से न जाने देंगे।

प्राप्तिस्थानम्— श्रीहरिकृष्णनिबन्धभवनम् बनारस सिटी।

Kirtikant Sharma Collection, Najafgarh

38420

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

महाकविश्रीभासप्रणीतं

स्वप्नवासवदत्तं

नाम

नाटकम्

"प्रबोधिनी"-नामकसंस्कृतव्याख्यया,

तथा

"प्रकाश"-नामकहिन्दीभाषान्तरेण च सहितम् ।

टीकाकार तथा सम्पादक काशी के सुप्रसिद्ध विद्वान्-

साहित्याचार्य-पं० श्रीअनन्तरामशास्त्रीजी वेताल

तथा

साहित्याचार्य-पं० श्रीजगन्नाथशास्त्रीजी होशिङ्ग ।

संस्कृत साहित्य में भास कवि का नाम किसने न सुना होगा ? ये सरस्वती के हास कहलाते हैं। इनके विरचित अनेक नाटक प्रकाशित हुए हैं। परन्तु इनकी लोकोत्तरता या प्रसिद्धि विशेष कर स्वप्नवासवदत्त नाटक के कारण ही हुई है। अस्तु, आजतक जो इतर टीकायें इस ग्रन्थ पर हुई हैं वे विद्यार्थियों के लिये प्रायः दुर्बोध व केवल टिप्पणीमात्र हैं। इस लिये विद्यार्थियों की कठिनाइयों को दूर करने के लिये हमने नवीन "प्रबोधिनी" नामक संस्कृत टीका तथा "प्रकाश" नामक हिन्दी टीका सहित यह ग्रन्थ प्रकाशित किया है। इस ग्रंथ की उपर्युक्त टीका विद्यार्थियों के लिये कैसी परीक्षोपयोगी हुई है, इसकी विशेष प्रशंसा स्वयं न लिखते हुए मुझे यही कहना है कि इस पुस्तकालय से आज तक जितनी भी परीक्षोपयोगी पुस्तकें प्रकाशित हुई हैं वे सब एक से एक दिग्गज एवं प्रगाढ सुप्रसिद्ध विद्वानों द्वारा निर्मित तथा संपादित हुई हैं और जिन्हें आज तक आप लोगों ने बड़ी उत्सुकता और प्रेम से अपनाया है। अतः परीक्षार्थी छात्र तथा अध्यापकों से प्रार्थना है कि इस पुस्तक की जितनी प्रतियों की आवश्यकता हो शीघ्र मंगवा लेवें। कारण पुस्तक अल्प छपी हैं, अन्यथा द्वितीय संस्करण की प्रतीक्षा करनी होगी। पुस्तक नवीन टाईप उत्तम सफेद मोटे कागज पर अत्यन्त रमणीक छपी है।

मूल्य सर्वसाधारण के लिये बहुत अल्प सवारुपया १।) रक्खा गया है, विद्यार्थियों को कमीशन काट कर केवल १) रुपये में प्राप्त होगी।

प्राप्तिस्थानम्-श्रीहरिकृष्णनिबन्धभवनम्, बनारस सिटी।

Kirtikant Sharma Collection, Najafgarh